CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं॰
४२८५

लेखक: — वाल्मीकि:

अथ रामगीता सटीका प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना
रघुत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप
रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य
थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतव् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्गिशान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः सं-
न्सारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथाञ्जसम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ य
थाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि मा
म् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवमपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुराद‍ृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्यवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतज्ज्ञानमेवमूलकारणत्वादज्ञानज्ञानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतज्ज्ञानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
ट्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानीज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यता। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

नन्नुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्योक्तमंत्रे विवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजनने निरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदान्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाश्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्यतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयनिराणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसाहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

याबच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलंनिषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्याया इतरनिरपेक्षाया एव मोक्षकारणत्वमुक्तं युक्तिपूर्वकं पुनः कथयति श्रोतृदार्ढ्याय । यदीति । यदि नष्टा तत्त्वज्ञानना बाधिता सा न पुनः प्रसूयते नोत्पद्यते तदा कारणाभावादहं मतिः कथं भवेत् । कथमपि न भवेदित्यर्थः । तदभावाच्च तत्काले कर्माभावइति स्वफलजनने सा स्वतन्त्रा इ

यदि स्मनष्टा नपुनः प्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैव न किमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहाया यत्र विमोक्षाय विभाति तत्फलिका भवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

अत्रार्थश्रुतिरपिप्रमाणमित्याह सेति सा प्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावात् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैः कर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवसुखीभवेत् । सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिरितइवेत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणातत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थावविभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतानानात्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यनत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्येतषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूम्यादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्। तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादिं उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्वरादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मिन्महावाक्येपरितोविचारितेऽस्याविचारितेमत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्व रजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोऽव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तद्ध्यानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽज्यत्वायमंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारेहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाऽज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भःप्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तर्गत्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिःसारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन
जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम
तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द
स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः
अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविका ग्शून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिबगद्धानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणि आत्मनिसंसृतिहेतवः भासमानसंसारकारणं
सदा कालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा तद्धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातततउद्भवोयस्याः बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरमात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रार्थोबोध्यः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभाननिमितदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स्परतादात्म्यायोगपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवतार्कि कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बंस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥

अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ २२ ॥
॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमुइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थं सः
रा. गी. त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदन्तीतिशेषः साचोदिनाकारकैर्देहान्तरमापककर्मभिः स

२१ ॥

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथांपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेऽतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि
र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः
आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
तुसर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनेनेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट्
ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसातिनभवेत् । सर्व
स्यब्रह्मणिप्रविलयात् ॥ ४९ ॥ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन मकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवाद्द्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयेदेषा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशं मकारं तद्वाच्यं प्राज्ञं च कारणं कारणत्वाभिमानिनं पुरुषमिहात्मनि चिद्घने परे विलापयेत् तथा भावयेत् । ततः सोऽहं सर्वविलापाधिष्ठानं परब्रह्मैव भावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्य रागद्वेषादिमलिनस्य कथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थं विशिनष्टि । उपाधितो मुक्तः अत एवामलः तथा भावने साधनं विज्ञानदृक् विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपा दृक् निदिध्यासनं सत्साक्षात्कारे साधनं यस्य सः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः। अचलंनिश्चलंवारियस्यताहशासिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो
यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपस्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ॥ २७ ॥
ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा. गी.

सर्वधर्मापेक्षयाऽयमेव धर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तमानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणी
भूतं विधिवादं यज्ञं तत्त्यादिभिश्चोदितं बाधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

॥ २८ ॥

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्तेनाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रं द्रष्टव्यम् ॥ ५५ ॥

स.

॥ २८ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्नसन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृततत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशिदिग्भ्रमादयः॥ ५७॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहार्दे अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपाय इत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति स.

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव। सर्वदुःखनिवृत्त्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः। यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणमाप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्वर्थे । गुणात्मकं सर्वज्ञत्वा-
 दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन् लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञाप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनी:	सम्बन्धिनी:	२	२	१	छामे	छानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
चोधोऽासि	चोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्वन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	वेदान्त	वेदान्त	५	१	१	कारांतः	कारान्त;	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्वं	५	१	२	वृंत्ति	वृंत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	वुद्ध्या	५	१	६	स्ववाना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१	ल्लाभ	ल्लाभे	१८	१	८	विभान्यत	विभान्यते	२५	१	४ मु
नर्दष्टा	र्नदष्टा	१२	१	४	इतिः	इति	१८	२	२	लिङ्गेद	लिङ्गदे	२६	१	२
र्वाद्धे	र्वाद्धे	१२	१	७	ज्ञानन	ज्ञानेन	१९	१	१	वोधकः	वोधतः	२५	१	६
त्याभिः	त्माभिः	१२	२	६	वुद्वया	वुद्ध्या	२०	१	५	विज्ञानं ब्रह्म	विज्ञानंनिदि ध्यासनं ब्रह्म	२६	२ ६	३
शुद्द	शुद्ध	१३	१	१	रागादि	रागादे	२१	१	३	भेदेरा	भेदरा	२७	१	६
जीवया	जीवयो	१३	१	२	त्रिलय	विलय	२१	१	७	रुपा	रूपाः	२७	२	६
निर्वाध	निर्बाध	१४	१	१०	धम	धर्म	२१	२	१	आत्म	अत्मा	२७	२	६
भव	भव	१५	१	४	म्त्रस्य	म्वंयस्य	२१	२	२	मुनिति	मुनिस्ति	२८	१	२
अर्जोद्व	अर्जोऽद्व	१६	२	६	वुधे	बुधे	२३	१	५	भव	भवं	२८	२	१
द्धात्	द्धात्	१७	२	१	एव	एवं	२३	२	१					
					द्रष्ट	द्रष्टृ	२४	१	२					

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

श्री ५ को सरकार
... पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं॰ ४२७६

लेखकः — व्यासः (पद्मपुराण, पाता॰ ख॰)
(काशीमाहा॰

अथश्रीकाशीमाहात्म्यंप्रारभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीगणेशाय नमः॥ सूत उवाच॥ एकदा सुखमासीनं रेवायाः पुलिने भृगुं॥ मुनयो विनयोपेताः पप्रच्छु

र्लोमशादयः॥१॥ मुनय ऊचुः॥ भगवन्सर्वतत्त्वज्ञ तत्त्वं यत्तव निश्चितं॥ निर्वाण परिनिर्माण कारणं मुक्ति
कांक्षिणां॥२॥ यद्रहस्यं च वेदानां तं निःकृष्य विविच्य च॥ ब्रूहि नः श्रद्धयोपेतान्करुणालय तत्त्वतः॥३॥
वयं हि मायया मुग्धा निश्चयं न लभामहे॥ सूत उवाच॥ एवं पृष्टः स भगवान्भृगुस्तत्त्वार्थदर्शनः॥ यदुवा
च तदाख्यामि शृणुध्वं सुसमाहिताः॥४॥ भृगुरुवाच॥ साधु साधु महाभागाः साधु साधु तपोधनाः॥ भवद्भि
र्यदहं पृष्टस्तत्त्वं तत्त्वविवित्सया॥ तत्त्वं ज्ञातुं कथयितुं याथातथ्येन पद्मजः॥ भूयसा समयेनापि नालं भव
ति तत्त्वतः॥ तदहं च यथापूर्वं श्रुतवानस्मि तत्त्वतः॥ तथा किंचित्प्रवक्ष्यामि नमस्कृत्य स्वयंभुवे॥ उपक्र
मोयं सुमहानुत्तरस्य तपोधनाः॥ शंभोः स्मरणमेवैकं सहायं प्राप्य चारभे॥९॥ अत्रेतिहासं सुमहांतमद्भु
तं मनोमलक्षालनशीलमादिमं॥ शृणुध्वमंतःकरणादि निश्चलं विधाय मेधाभिविवृद्धिसाधनं॥१०॥ क
ल्पांते सूर्यचंद्रादिविनाशे समुपस्थिते॥ पृथिव्यादिमहाभूते नष्टे च सति सर्वतः॥११॥ गुणसाम्ये समाप॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नेमायया श्रीपतेः पुनः ॥ गते बहुतिथे काले सर्गोन्मुखतया विभोः ॥१२॥ पचेलिमायाप्रकृतौ साश्रयायां
तदात्मनः ॥ व्योमाभवत्ततो वायुस्ततस्तेजो जलं ततः ॥१३॥ जलाङ्कूरभवत्तानि क्रमेणाधिकतामियुः ॥ एवं
क्रमेण भूतानि सृष्ट्वा सर्वेश्वरः प्रभुः ॥१४॥ भक्तानुग्रहमान्नार्थं लीलादेहमधारयत् ॥ इंदीवरदलश्यामं
चतुर्बाहुं स्वलंकृतं ॥१५॥ पद्मनेत्रं पद्मनाभं पद्मारिदरधारिणं ॥ जलांतर्गतमुद्भासि पीतांबरसमावृतं ॥
१६॥ तस्य नाभ्यां सरसिजं तरुणादित्यवर्चसं ॥ शतयोजनविस्तीर्णं ततो जायत पद्मजः ॥१७॥ चतुर्मुख
श्चतुर्दिक्षु न ददर्श च कंचन ॥ तदा मेने स्वमात्मानं भूतेशं भूतभावनं ॥१८॥ अहंकारगृहीतात्मा विष्णुना
भिसरोजजः ॥ एवमज्ञानसंभूतं विज्ञाय भगवान्हरिः ॥१९॥ स्वं रूपं दर्शयामास कोसीति द्रुहिणं ब्रुवन्
॥ ब्रह्मोवाच ॥ अहं भूतेश्वरः साक्षाद्भवतः कारणं परं ॥२०॥ सर्वमेतन्मया सृष्टं किं मां वेत्सि न तत्वतः ॥ नारा
यण उवाच ॥ अहो अविद्यामाहात्म्यमयं मन्नाभिपद्मजः ॥२१॥ ईश्वरं मां न जानाति विरिंचिर्मे दमूढधीः
पद्मयोने पश्य हेतुं स्वीयं मन्नाभिपंकजं ॥२२॥ दृष्ट्वा पश्चान्निजगुरुं मामेव शरणं व्रज ॥ भृगुरुवाच ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तौविविदंतौह्रिपरस्परममर्षणौ॥२३॥ अहंपूर्वमहंपूर्वमितिवाग्युद्धमीयतु४॥ संरब्धावपवान्योन्यौस्वा
नुभावसमुत्थितैः॥२४॥अस्त्रैःशस्त्रैस्ततःख्यातैःक्षतजोक्षितपुद्गलौ॥हरिदुहिणयोरेवंयुध्यतोःशतवत्स
राः॥२५॥ अतीतानानयोर्मध्येपराजीयतकश्चन॥ अपश्यतामथाभ्याशेलिंगंतेजोमयंपरं॥२६॥शर
च्चंद्रायुतसमंप्रभाभासुरमैश्वरं॥ वीक्ष्यतद्व्यापकंज्योतिर्निःप्रभौविस्मितौचतौ॥२७॥ कर्त्तव्यंनान्वपद्येतां
मोषत्यागतसाध्वसौ॥किंचिदग्रेमहाज्योतिःकिंचिदग्रेस्थितंकुतः॥२८॥तर्कयंतौविधिहरीदहशातेतदं
तरा॥पुरुषंपिंगजटिलंदिग्वाससमलंकृतं॥२९॥भुजगैर्नृकपालैश्चकुंदेंदुविमलद्युतिं॥तंदृष्ट्वाथत
योरासीदयमेवपरःपुमान्॥इतिबुद्धिस्ततस्ताभ्यांसंस्तुतोवैदिकैःस्तवैः॥३०॥ महादेवउवाच॥भवद्भ्या
मिदमुद्भासिमल्लिंगंदृष्टमद्भुतं॥स्तुतंचतेनप्रीतोहंवृणीतांवरमादिजौ॥३१॥ तावूचतुः॥सदाशिवप्रस
न्नश्चेत्त्वयिनौनिश्चलामतिः॥सदाभवतुभूतेशवरेनान्यंवृणीमहे॥३२॥एकंपरान्कुरुविभोसंशयंनौ
हृदिस्थितं॥यद्भवांस्तेजसंलिंगमधितिष्ठतिनिस्पशः॥३३॥ तत्किंसमाख्यंकिंरूपंकिंप्रभावंकिमाश्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥एतत्सर्वं महेशान वक्तुमर्हस्यशेषतः॥३४॥ महादेव उवाच॥ यदेतत्परमं लिंगं पश्य त्वं पुरतः स्फुरत्
॥ तद्विश्वेश्वरसंज्ञं हि सच्चिदानंदविग्रहं॥३५॥ लयं लिंगशरीरस्य विशेषं गमयेत्परं॥ तेन लिंगमिति
ख्यातमपवर्गैकसाधनं॥३६॥ व्यापकत्वेपि चैतस्य निर्विकारस्य तत्वतः ॥परिच्छिन्नप्रभाव धिर्नमः
यान च विष्णुना॥३७॥ यथा व्योमापरिच्छिन्नं शब्दहेतुतया समं॥ स्वयमेव परिच्छिन्नं प्राप्नोतीदमपीदृशं
॥३८॥ प्रभावः श्रूयतामस्य नित्यानंदस्वरूपिणः॥ अत्र त्यक्तासवः संतः सच्चिदानंदरूपतां॥३९॥ यथा यो
ग्यं लभंते हि नात्र कार्या विचारणा॥ अत्र प्रविष्टमात्रस्य जंतोः ¯पापं पुराजितं॥४०॥ विनाशमाप्नोति परं पु
ण्यराशिश्च वर्द्धते॥ निर्वाणपदमेवैतद् धितिष्ठामि नित्यशः॥४१॥ म्रियमाणस्य जंतोर्हि वाक्यं कर्णे समु
च्चरन्॥ विना वाक्योपदेशेन ब्रह्मात्मैक्यं न भासते॥४२॥ ब्रह्मात्मैकत्वविज्ञानादृते मुक्तिर्न जायते॥ नियमेने
ह कथयेत्तदहं यस्य कस्यचित्॥४३॥ स्वे स्वे कर्मणि निष्णातानुत्तमानथ मध्यमान्॥ अधमानप्यमार्गस्था
न्न यामीह परां गतिं॥४४॥ पंडितो वापि मूर्खो वा मूर्खजो वा तथांत्यजः॥ अस्मिं ल्लिंगे त्यजन् प्राणान्धर्मक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मोक्षमाप्नुयात्॥४५॥निराश्रयमिदं लिंगं विश्वेषामाश्रयःपरं॥भवंतावपि लिंगेस्मिन्स्थितात्तत्त्वमवाप्स्य
थः॥४६॥भृगुरुवाच॥एवमुक्त्वासभगवान्विश्वेशोंतर्हितोभवत्॥माधवःपद्मजश्चैवगतरोषौवि
न्वेरतुः॥४७॥भवद्भिर्यदहंपृष्टोमोक्षहेतुंप्रतिद्विजाः॥तदुक्तंविश्वनाथस्यकथाकथयतामया॥४८॥यल्लिं
गंदृष्टवंतौहिनारायणपितामहौ॥तद्देवलोकेवेदेचकाशीतिपरिगीयते॥४९॥अत्रमुक्तिस्तुसकलभापा
णौफलमिवाहितं॥तस्यादर्शनमात्रेणपापंयातिसहस्रधा॥५०॥इत्येतत्सर्वमाख्यातंभूयःकिंनिगदा
मिवः॥५१॥ऋषयऊचुः॥भृगोसर्वमुनिश्रेष्ठअस्माभिस्तपसःफलं॥लब्धमद्यैवयत्काशीप्रभावस्त्वन्
मुखाच्छ्रुतः॥५२॥काश्याएवमहाबुद्धेभूयःकथयसत्कथाः॥विस्तरेणसमासेनसर्वेषांहितकाम्य
या॥५३॥किंमाहात्म्यंकथंवेद्यंसेव्याकैश्चद्विजोत्तम॥परिमाणंचतस्याःकिंकेनोपायेनलभ्यते॥५४॥
एतत्सर्वंस्फुनिश्चित्यकथयाथविशेषतः॥श्रोत्रपात्राणिचास्माकंकांसंतित्वद्वचोमृतं॥५५॥भृगुरुवाच॥।
सावधानाःशृणुध्वंमेवचःकाशीगुणार्थकं॥यच्छ्रुत्वासर्वपापेभ्योमुंचतेसर्वशोजन॥५६॥आसीत्कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युगेश्रीमान्सुमृत्यबलुवाहनः॥ भूरिद्युम्नोमहाराजःसमामंडलपालकः॥५७॥ तस्यासंशतसाहस्राः प्र
मदाकमलेक्षणाः॥ तासांविभावरीश्रेष्ठाबभूवननुमध्यमा॥५८॥ तस्यामेवाहितमतिर्भूरिद्युम्नोनिरंतरं
॥चिक्रीडवनखंडेषुपौलोम्याइवदेवराट्॥५९॥ तस्यैवंक्रीडतःकालोगतोबहुतिथोद्विजाः॥ नसराज्ये
मतिंचक्रेमन्मथाक्रांतचेतनः॥६०॥ इत्थंविलासासक्तस्यराज्यंकोशोबलंस्त्रियः॥ शत्रुणामित्रवृंदेन
न्हृतंनातिप्रयत्नतः॥६१॥ नष्टेत्वाशोकसंतप्तोन त्वानारींविभावरीं॥ जगामविंध्यकांतारंखड्गमात्रायुधो
भवत्॥६२॥ बभ्रामक्षुत्पिपासार्तःस्त्रीसुतः सच भूपतिः॥ बहुभिर्दिवसैःप्रापविंध्यकांतारमुल्वणं।
॥६३॥ शार्दूलश्वापदयूथेनमृगयूथविमर्दिना॥ सेवितंरोषचलितोक्षिप्तलांगूलसेविना॥६४॥ क्वचिन्मातं
गनिनदैःक्वचित्संचास्यगर्जितैः॥ क्वचिन्महिषहुंकारैराकुलंविश्वभीषणं॥६५॥ तंदृष्ट्वाविंध्यकांतारंकांता
राजानमब्रवीत्॥ विभावर्युवाच॥ राजन्केयमवस्थातेसत्त्वसह्यापस्यवागता॥ यदत्रश्वापदाकीर्णकांतारं
प्रतिपद्यसे॥ कथंवनेस्मिन्राजेंद्रस्थातव्यंभवतामया॥६७॥ निर्मानुषेनिरन्नेचपायस्तोयविवर्जिते॥ इ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दानीमेव बाधंते क्षुत्पिपासाद्योग्रहाः ॥ सुखं च ते ति विम्लानं नंनत थामेस्ति भूपते ॥ प्राप्यापि महतीं मृद्धिं न
त्वयासुकृतं कृतं ॥ ६९ ॥ नीतः कालो वृथा राजन्कामभाजोपसेवया ॥ धर्मार्थौ यः परित्यज्य काममात्रं प्रसे
वते ॥ ७० ॥ भवानिव सुदुःखार्तः परिभ्रमति संकुलं ॥ भृगुरुवाच ॥ इत्यंगनावचः शृण्वन्क्षुधितः सपिपा
सितः ॥ न किंचित्सत्फला चैनां स्वपराधं विचिंतयन् ॥ दंपती तौ वने भीमे भ्रमंतौ क्षुत्तृषार्दितौ ॥ ७३ ॥ पंच
भिर्दिवसैः प्राप्तौ शालंकायनमाश्रमं ॥ पूजितस्तेन विधिवत्फलमूलजलादिभिः ॥ ७४ ॥ उवास तत्र निःशं
कः कथितस्वार्तिसाधनः ॥ एकां रात्रिं तत्र नीत्वा पूनर्वभ्रामतद्वने ॥ ७५ ॥ तयामृगदृशा सार्धं दिनानि सुब
हून्यपि ॥ कुकर्मपरिपाकेन नैव प्राप फलादिकं ॥ ७६ ॥ विशुष्यद्धृदनो राज्ञीसहितो विंध्यकानने ॥ तदा
तस्याभवद्दुष्टिः क्रूरा पापस्य राक्षसी ॥ ७७ ॥ भक्षणाय विभावर्यास्तदासा तद्धनाशनी ॥ अब्रवीच्च तदा
साध्वी भूरिदुःखं गतव्यथा ॥ ७८ ॥ विभावर्युवाच ॥ राजेंद्र क्षुधयाते त्वपीडा प्राणविजानता ॥ लक्ष्यते ते नम
ज्ञात्वान्मां समुत्सृज्य भक्षय ॥ ७९ ॥ मा विलंबं कुरु विभो न मे दुःखं भविष्यति ॥ स्त्रीणामतः परो धर्मो नास्त्येव पृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थिवीपते॥८०॥ भर्तुर्येनोपकारः स्यात्तत्कार्यमविशंकया॥ अत्रापि गाथां गायंति ये पुराणविदो जनाः॥८१
॥ आपदर्थे धनं रक्षेत् दारान्रक्षेद्धनैरपि॥ आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥८२॥ भृगुरुवाच॥ इत्येवं वा
दिनीं तां तु जघान तरसा बली॥ हत्वा भक्षीतु मारेभे प्रियामांसं स पापकृत्॥८३॥ तदैव सिंहाः खेलंतस्त
त्राजग्मुरितस्ततः॥ तान्दृष्ट्वा तद्द्विजायास्तु भार्यास्त्राणपरीप्सया॥८४॥ पलायमानः सहसा योजनानंत
रं द्विजान्॥ चतुरो पश्यदव्यग्रानीवारान्नृत्यगच्छतः॥८५॥ वेदवेदांगसंपन्नान्ब्रह्मचारिव्रतेस्थिता
न्॥ दृष्ट्वैव खड्गमुद्यम्य न्यवधीत्तान्स किल्बिषी॥८६॥ हत्वा नीवारकान्सोऽक्तुमुपविष्टः स कानने॥ उप
वीतानि ददृशे तेषां साजिनकानि च॥८७॥ दृष्ट्वा ब्राह्मण्यसंपन्नान्ब्रह्महत्याभयार्दितः॥ पपात भूमौ दुःखे
न किंकृतं मेति निंदितं॥८८॥ विशस्ता ब्राह्मणा ह्येते हता भार्या पतिव्रता॥ प्राणलोभेन महता कृतं निःकृ
तिवर्जितं॥८९॥ एकब्राह्मणविच्छेदो नरकाय स्यात्पये त्परान्॥ यावत्कल्पशतं पूर्णं स्त्रीघातश्च तदर्धकं॥
॥९०॥ चत्वारो ब्राह्मणाः शस्ता एका स्त्री च पतिव्रता॥ एकाधिकं शतं पूर्वं मया सह यमालये॥९१॥ निरये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षुपतिर्व्यंति पतितास्एवतेथवा॥ अतःपरंमयाकिंचित्तयाकार्यंविजानता॥ ९२॥ यथैतत्पापमतुलंतत्लव
ड्वस्म्मसाङ्गवेत्॥ भृगुरुवाच॥ भूरिद्युम्नो विचार्यैवंभ्रमंस्तत्रैवकानने॥ ९३॥ शालंकायनजंविप्रमपश्यत्त्वा
श्रमस्थितं॥ दूरेस्थित्वाभिवाद्यैनंकथयामासदुःखितः॥ यद्वृत्तंतत्समाकर्ण्यसमुनिर्दुःखितोभवत्॥ ९४
गच्छेतःपापबुद्धेत्वंनात्रस्थेयंकथंचन॥ इत्युक्त्वासमुनिस्तस्मात्सरागास्योभवत्पुनः॥ ९५॥ भूरिद्युम्नो
पितमृषिंपुनःपुनरपृच्छत॥ स्वयंकृतस्यपापस्यनिःकृतिंविलपन्बहु॥ ९६॥ तस्यैवंपृच्छतःकृत्वादी
नवाक्यंदयानिधिः॥ विमृश्योवाचराजानंशालंकायनजोमुनिः॥ ९७॥ शालंकायनउवाच॥ काशींगच्छ
महाराजसर्वपापापनोदिनीं॥ तांप्राप्यसकलंपापंक्षपयिष्यसिसर्वदा॥ ९८॥ मत्ययार्थंचराजेंद्रनीलीनि
चयसंभवान्॥ अनिशंकंचुकान्यंचपरिधत्स्वपरंतप॥ ९९॥ आकाशीदर्शनात्तेहिदृश्यास्त्वंद्रसन्नि
भाः॥ कंचुकाहियदानेत्यंजत्यःकाशीविलोकनात्॥ १००॥ तदात्वंनत्स्वकलुषंस्मपितेवेत्सितत्वतः।
भृगुरुवाच॥ इतिश्रुत्वावचस्तस्यभूरिद्युम्नोविधायतत्॥ १०१॥ जगामकाशींविप्रेंद्रानत्वातंमुनिपुंगवं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समस्तदिवसैः काशीमपश्यद्दुष्टमानसः ॥ २ ॥ स्फुरुचिरभवनेनविश्वभर्तुर्मणिमयकुट्टिमचंचदंशुजा
लैः ॥ रविकरनिकरप्रभाभिभूतिं विरचयतारचितांनितांतरम्या ॥ ३ ॥ कलिमलकुलकालकालराजक्षपितनि
वासिजनांतरायजालां ॥ हरवृषभपिनद्धकिंकिणीनांक्कणमुखरीकृतदिव्यदिग्विभागां ॥ ४ ॥ भवभयप
रिभीतिनाशहेतुं सुरनरकिन्नरसेवितां समंतात् ॥ विविधलिंगसमर्चनतत्परैः शिवशिवेतिमुहुः प्रतिजल्प
नैः ॥ ५ ॥ वदनवाद्यविधानतत्परैः स्वरसालककदंबकोटिवृक्षैः ॥ कुसुमनिचयभारनम्रशाखैरधिकतरं सुतरां विरा
जयंती ॥ ६ ॥ दुरितविलोपिगतपापगणो भवति क्षणं समवलोकयतः ॥ सददर्श तां हरपुरीं परितः परिवा
रितायनिकरां प्रमथैः ॥ ७ ॥ भृगुरुवाच ॥ अहो काशीमहिमानं पश्यत द्विजसत्तमाः ॥ भूरिघ्नोपि यां दृष्ट्वा
शरच्चंद्राम्बरोभवत् ॥ ८ ॥ विवेश काशीं निःपापः पूजयामास चेश्वरं ॥ महादेवं विधानेन प्रतीतो नैत्यनाः
शनात् ॥ ९ ॥ वसंस्तत्र महाभागः कालेकालमुपेयिवान् ॥ शिवोपदिष्टवाक्यसन्दले भेब्रह्मैकतां द्विजाः ॥ १०
एवमन्येपि बहवो मुक्ताः काशीनिषेवणात् ॥ काश्यां परित्यजन्प्राणान्परियजति संस्तृतिं ॥ ११ ॥ पापकृन्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का·मा· यतेकाश्यांयदिप्राक्पु ण्यगौरवात्॥ नजातुनरकंयातिकाकयाधर्मतत्परे॥१२॥ भूमौजलेनेरिक्षेवायत्रवापि
६ मृतोद्विजाः॥ब्रह्मात्मैकत्वमाप्नोतिकाशीशक्तिरुपाहिता॥१३॥काशीतिवर्णद्वितयंस्मरन्त्यजतिपुद्गलं॥
यत्रक्वापिभवेत्तस्यकैलासेवसतिःसतः॥१४॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥आसीत्पुराकुरुक्षेत्रे
भालुकेस्तनयःकृशः॥१५॥अधर्मनिरतोनित्यंपिंगाक्षाश्रमकेलिकृत्॥ कृशास्यपिंगनेत्रस्तुसांगवेदम
दिष्टवान्॥१६॥तथापिधर्मेनप्रीतिंचकारकुलपांसनः॥ भालुकिःपिंगनेत्रश्चधर्मंतस्मैसमूचतुः॥१७॥वे
दंपुराणंनीतिंचश्रावयामासतुस्तदा॥तथापिनैवधर्मात्मामतिंधर्मेसमादधे॥१८॥ ततःकालेनतारुण्यं
प्राप्तःसुंदरविग्रहः॥मातुःसपत्नींसंनीतिंगुरुपत्नींचहेमनीं॥१९॥उभेनीत्वास्ववशेजगाममधुरां
रीं॥ताभ्यांक्रीडन्सदुष्टात्मापुष्पान्स्वर्णानिभूभुजां॥२०॥मदिरादिरसास्वादलंपटःसमपद्यत॥एवंद्वा
दशवर्षाणिगतानितस्यक्रीडतः॥२१॥अथतेनिधनंप्राप्तेगुरुपत्न्यौक्रमेणतु॥सोपिदुःखाकुलोगच्छत्कलिंग राम
प्रतिचभ्रमन्॥२२॥कलिंगदेशेतीव्रेणज्वरेणार्त्तोभवत्कृशः॥पीडितश्चिंतयामासकिंकर्मसुकृतंकृतं॥२३॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकल्मषाणि संस्मृत्य कलिंगे वीक्ष्य च स्थितिं ॥ परलोकं न सुखदं स्वस्याद्राक्षीद्विचारयन् ॥२४॥ श्रुतका
शीकथः पूर्वं सस्मार किल काशीकां ॥ काशीति द्व्यक्षरं मंत्रमुच्चरन्निजहावसून् ॥२५॥ यमदूतास्तदा क्रूरा
व बंधुमौलुकेः सुतं ॥ अथाजग्मुः शिवगणास्त्रिशूलोद्यतपाणयः ॥२६॥ विमानमादाय परं तरुणादित्यव
र्चसं ॥ दिव्यांगनाभिरध्यस्तं चलच्चामरपाणिभिः ॥२७॥ तान्दृष्ट्वा यमदूतास्ते कृशास्योत्तुकुकर्मनत् ॥ यमदूता
ऊचुः ॥ अयं पापसमाचारो यथा वहिर्दितो हि वः ॥ अमुं नेतुं कथं प्राप्ता यूयं धर्मिजनप्रियाः ॥ शिवगणा ऊ
चुः ॥ यद्यप्ययं दुराचारः सर्वदेवभृदाः कृशः ॥ तथाप्यंते तु काशीति काशीनाम समुक्तवान् ॥ तेनास्य दु
रितं क्षीणं कैलासे स्थाप्यसे सुगं ॥ ततः पुनः सुपुण्यात्मा काश्यां मुक्तिमवाप्स्यति ॥ भृगुरुवाच ॥ एवमुक्त्वा
शिवगणाः कृशं नीत्वा ययुः शिवं ॥३१॥ यमदूताः स्वराजानं सर्वमूचुस्तदादितः ॥ समाकर्ण्य ततो वाक्यं दू
तानां तानुवाच ह ॥३२॥ यम उवाच ॥ प्राणप्रयाणावसरे ये काश्यां संगता नराः ॥ ये वा काशीति भाषंते ये वा
विष्णुपरायणाः ॥३३॥ ये वा महादेवरता ये वा सत्तीर्थमृत्यवः ॥ तेषां नाहं प्रभुः क्वापि त्याज्यास्तु ग्राभिरेव ते ॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृगुरुवाच॥ इत्थंतपोधनाः काश्यामाहात्म्यंप्रोक्तवाहनं॥ यच्छ्रुत्वापिविलीयंतेपापानिसुमहांत्यपि॥३६॥
॥ इतिश्रीपद्मपुराणेपातालखंडेकाशीमाहात्म्येप्रथमोध्यायः॥१॥ ॥ सूतउवाच॥ कथयित्वाकथा
मेतांसभृगुर्भृगुनंदनाः॥ पुनःप्रोवाचमाहात्म्यंवाराणस्याविशेषतः॥१॥ भृगुरुवाच॥ शृणुध्वंभोमुनिः
श्रेष्ठाः पुनःकाशीकथांशुभां॥ यांश्रुत्वासंशयंजंत्यूः सकलंमुक्तिसाधने॥२॥ काश्यांयोगोनदुःप्रापःका
श्यांमुक्तिर्नदुर्लभा॥ ततोनिशंनिषेवेतकाशींमोक्षाप्तयेजनः॥३॥ गणयतिनकथंचित्त्वंकरः काशिकायां
मयमिहममभक्तोब्राह्मणःपुल्कसोवा॥ उपदिशतिसदांतेवाक्यमेकात्मनिष्ठंद्विजकुलनिरपेक्षोभाव्यत
त्राधिकारः॥४॥ केवलंधर्मसापेक्षः कर्णेजपतितद्वचः॥ अधर्मिष्टस्यतत्क्षेत्रेपातनांतेद्विशोन्मतिं॥५॥ का
श्यांकृतस्यपापस्यभोगोरुद्रपिशाचता॥ एकैकस्यचपापस्यसमानामयुतत्रयं॥६॥ तस्मात्पापंनकर्त
व्यंमनसापिविभोःपुरे॥ येकाश्यांधर्मभूयिष्ठानिवसंतिमुनीश्वराः॥७॥ तेनारयंतिचात्मानंशतपूर्वान्
शतापरान्॥ काशींप्रतिप्रस्थितानांजनानांपापकर्मणां॥८॥ घूर्णतेसर्वपापानिसर्वधातुगतान्यपि॥ का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यामुद्दिश्य यातानां सर्वस्यात्समयः शुभः॥९॥ मंगलं सकलं वस्तु न नत्किंचिद्विचारयेत्॥ देवाः सर्वे भवेयु
र्नैव प्रतिबंधकराः परं॥१०॥ तानुपेक्ष्यैव गंतव्या काशी मुक्तिप्रकाशिका॥ काश्यां ये निजधर्मेण मुमुक्षुस्तिष्ठ
ति द्विजाः॥११॥ अनायासाविलंबाभ्यां स एव फलमश्नुते॥ ये का श्यां संशयाविष्टा मुक्तौ तेषां शरीरिणां॥
॥१२॥ प्राणप्रयाणसमये प्रमाणं परमेश्वरः॥ तत्र स्वल्पं हुतं दत्तं जप्तं तप्तं द्विजोत्तमाः॥१३॥ भूयादनंतफल
दं तत्क्षेत्रस्य प्रभावतः॥ यत्र देवनदी गंगा यत्र सा मणिकर्णिका॥१४॥ किं चित्रं तत्र विप्रेंद्रा मुक्तिर्यत्तनूभृ
तां॥ तद्धि क्षेत्रं ये भिपद्यंति धीराः श्रद्धोपेता धर्ममार्गैकनिष्ठाः॥ ॥१५॥ लभंति ते देहसंत्यागमात्राद्दात्मं
ज्ञानं निष्कलं प्राप्तहेतुं॥ अविमुक्तं न विमुंचेत्कथंचित्सत्यं सत्यं कथयामीह विप्राः॥१६॥ संसारं च विरसं भावयि
त्वा देहांतं तत्र तिष्ठेत्स नीतः॥ ब्रह्मात्मैक्यद्योतकं तत्र वाक्यं महादेवस्तारकज्ञानहेतुं॥ १७ ॥ कर्णेज
पत्यनिशं चांतकाले कस्तां काशीं मनसा हातुमिच्छेत्॥१८॥ मुनय ऊचुः॥ इत्थं मुक्तिप्रदायिन्यां सत्यां का
श्यां भृगो भुवि॥ ऋषयो मुनयश्चान्ये किमर्थं मुक्तिसाधने॥१९॥ क्लिश्यंति श्रवणे ध्याने मननेऽधीतकल्मषाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इमंनः संशयंछिन्धिभगवन्मुनिपुंगव॥२०॥भृगुरुवाच॥श्रूयतांमुनिशार्दूलायत्तद्वक्ष्यामितत्वतः॥संशयोने
हकर्तव्योयुष्माभिर्धर्मबुद्धिभिः॥२१॥विचित्ररुचयोलोकाबहुश्रद्धाःक्वचित्क्वचित्॥यथेष्टंहिविचेष्टंतेस्व
तंत्रास्तत्रतत्रहि॥२२॥वर्णाश्रमपरिग्राह्यधर्मानुष्ठानकोविधिः॥नित्योनैमित्तिकःकाम्यःकाम्यस्तुस्वेच्छया
भवेत्॥२३॥अनेकोपायलभ्यंहिफलंभवतिब्राह्मणाः॥प्रवृत्तिःस्वेच्छयातत्रसर्वलोकेहिदृश्यते॥२४॥यथाव
श्चित्रसूनार्थीसमानासुलतासुच॥समानश्रमगम्यासुसमानकुसुमासुच॥२५॥विद्ययानासुकस्यांचित्प्र
वर्तेतनसर्वतः॥तथालोकायथाकामंश्रयंतेमुक्तिसाधनं॥२६॥समानवर्णगोक्षीरंतुल्यपात्रेप्रतिष्ठितं॥यु
गपन्नैवगृह्येतकिंचित्पूर्वंहिगृह्यते॥२७॥तद्वन्निर्वाणहेतूनांबाहुल्येपिमुमुक्षुभिः॥सुशक्यत्वेनयत्नांतेनि
त्यंतेस्तन्निषेव्यते॥२८॥अन्यच्चश्रूयतांकाश्यामाहात्म्यंमुनिपुंगवाः॥वामदेवेनयत्प्रोक्तंवसिष्ठंप्रतिसादरं॥२९
॥आस्तेसरस्वतीतीरेवसिष्ठस्याश्रमःपरः॥तत्रजगामतत्वज्ञोवामदेवोयदृच्छया॥३०॥पूजितःसयथान्यायं
वसिष्ठेनप्रयत्नतः॥दत्तानिफलमूलानितस्मैधर्मविदुत्तये॥३१॥वामदेवोपितंसर्वंप्रतिजग्राहभक्तितः॥ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पविष्टौतौविप्रौकथयामासतुःकथां॥३२॥वेदास्त्रयोविचित्रार्थाधर्ममोक्षोपयोगिनीं॥तदापप्रच्छविनयाद्वसि
ष्ठोमुक्तिसाधनं॥३३॥वसिष्ठउवाच॥वामदेवात्मतत्त्वज्ञब्रह्मज्ञानैकसाधनं॥विनासाधनसंपत्त्यायद्यस्तिव
दतन्मम॥३४॥वामदेवउवाच॥कथंवसिष्ठवेदोक्तसाधनेनविनाभवेत्॥ब्रह्मात्मैकत्वविज्ञानंनहिदीपंवि
नाप्रभा॥३५॥तथापिविद्यतेब्रह्मन्नल्पायासेनसत्वरं॥तादृशज्ञानफलदंशंभोःक्षेत्रंमहात्मनः॥३६॥वाराण
सीतिविख्यातंत्रिषुलोकेषुराजते॥आदिमध्यावसानेनस्थानंविश्वेशाधिष्ठितं॥तत्रस्थितस्यजंतोर्हिभोगः
मोक्षप्रदःशिवः॥उपपातकिनश्चैवमहापातकिनश्चये॥३८॥तेषांतत्क्षेत्रमाहात्म्याद्यानिक्षयमाप्नुयुः॥मा
रुतेरितकाशीस्थरेणुयोगेनकिल्बिषं॥३९॥दूरीभवतिविप्रर्षेनात्रकार्याविचारणा॥स्वधर्मनिरतस्यैव
हीनस्याप्युत्तमस्यच॥४०॥समानागतिरुद्दिष्टावाराणस्यांप्रभावतः॥अनंतकाननंतद्धिशंकरस्यातिव
ल्लभं॥४१॥नविमुंचतिविश्वात्माअविमुक्तंततःस्मृतं॥काश्यांतिष्ठंतियेकेचित्तान्पश्यंतिसुरोत्तमाः॥४२॥चतुर्भु
जांस्त्रिनयनांश्चंद्रांशुभासितशेखरान्॥दानंतत्रानंतफलंप्रदिष्टंस्नानंतद्वत्तत्रजप्यादिकर्म॥४३॥एवंपापंतत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्दर्शितं स्यात्तद्प्यनंतं नात्र संदिग्धमस्ति हि जंतुर्धर्मनिरतं योवर्षाशनदानतः॥ स्थापयेच्छ्रद्धया युक्तस्तस्य
पुण्यफलं शृणु॥ यावत्यः सिकताः संति गंगायां मुनिसत्तम॥४५॥ तावद्वर्षसहस्राणि क्रीडेदिंद्रेण संगतः॥ पश्चा
दत्र महाराजो जायते निर्मले कुले॥४६॥ दीर्घायुर्बहुपुत्रश्च सुखी शंकरभक्तिमान्॥ अंते च लभते काशीं ततो
निर्वाणमाप्नुयात्॥४७॥ अश्वत्थंपि त्रुमं देव सहकारमथोलतां॥ योरोपयति यत्नेन तस्याप्येतत्फलं भवेत्॥
॥४८॥ संत्यनेकानि तीर्थानि पृथिव्यां यानि सत्तम॥ तथापि जंतुना काशी सेव्या सर्वप्रयत्नतः॥४९॥ न्यायागतं धनं
काश्यां स्वल्पमप्यग्रजेर्पितं॥ भवेदनंतफलदं नित्यं तत्क्षेत्रवासिनि॥५०॥ एवं प्रभावा विप्रर्षे विद्यते काशिकापुरी
॥एहि पश्याव हे गत्वा तामुमाकांतपालितां॥५१॥ भृगुरुवाच॥ वसिष्ठस्तेन मुनिना वामदेवेन नोदितः॥ भ
क्तिजं स्वाश्रमे कृत्वा काशीमभिमुखो ययौ॥५२॥ पथि तौ गच्छतो येतौ वीतरागौ गतक्लमौ॥ वसिष्ठवामदेवौ तु ज
ग्मतुः शांकरीं पुरीं॥५३॥ व्रजंतौ तौ महारण्ये दृष्टवंतौ निशाचरान्॥ करालान्सायुधान्दृप्तान्यालिवंशसमु
द्भवान्॥५४॥ तेषां मध्ये हुंडुकाख्यं मालिनः पौत्रसंभवं॥ ददृशाते महात्मानौ क्रूरं सुरविमर्दनं॥५५॥ ते न दृष्टौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतौमार्गकौ भवंताविति स्फुटं॥ अन्योन्यंनामकथयांबभूवतुरुपपुतौ॥ ५६॥ हुंडुकस्त्वंवसिष्ठाख्यंविज्ञायो
वाचतंप्रति॥ हुंडुकउवाच॥ अहोमिष्टंमयाप्राप्तंत्विरस्यरजनीचराः॥ वध्यतामेषदुष्टात्मावसिष्ठःसहमि
त्रकः॥ ५७॥ एतस्योत्रेणसहसामत्पितासहबांधवः॥ पराशरेणनिहतःसत्रेराक्षसघातके॥ ५८॥ भृगुरुवाच॥ इ
तिश्रुत्वावचस्तस्यसर्वेतदनुयायिनः॥ वसिष्ठवामदेवौतुबंधुंसमुपचक्रमुः॥ ५९॥ तावन्योन्यंनिरीक्ष्यंतौश
क्तावपिनिवारणे॥ गतरोषतयानैवकिमर्थंकुरुतांतदा॥ ६०॥ निर्विकारौनिर्विशंकौदृढबंधौविरेजतुः॥ इंद्र
जिन्मुक्तनागास्त्रबद्धाविवरघूद्वहौ॥ ६१॥ हुंडुकःखड्गमादायहंतुमेवाकरोन्मतिं॥ अथाब्रवीद्वामदेवोव
सिष्ठंप्रतिसादरं॥ ६२॥ वामदेवउवाच॥ वसिष्ठपश्यप्रतिबंधमावयोर्वाराणसींसंगतयेहिगच्छतोः॥ श्रेयोहि
निर्विघ्नमवाप्यतेपरंभवंतिदेवाअपिविघ्नकारकाः॥ ६३॥ प्राणानयंनेष्यतिहुंडुकाख्योनतत्परंदुःखमिवाव
भासते॥ विलोचनाभ्यांयदुमेशपूःपुरीनवीक्षितातत्किलदूयतेमनः॥ ६४॥ मनोरथोयंममतेपिचस्थितःका
श्यांगमिष्यावइतिद्विजोत्तम॥ सुधांशुमौलेश्चरणौनिरंतरंद्रक्ष्यावहेसोपिनसिद्धिमीयिवान्॥ ६५॥ भृगुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच॥ ब्रह्मर्षिरेवमुक्त्वा स नाम देवो मुनीश्वरः॥ दध्यौ शंकरमेवांतर्वसिष्ठस्य धराश्रितौ॥६६॥ स तु पापसमा
चारो हुंडुको राक्षसेश्वरः॥ खड्गमुद्यम्य युगपत्तौ जग्राह जटांतरे॥ यदैवं तेन तौ मौर्व्यां गृहीतौ मुनिसत्तमौ॥
॥६७॥ तदैव प्रादुरासीत्तु त्रिपुरांतकरो हरः॥ क्रोधोद्धूतकटाक्षेण कालानलविलासिना॥६८॥ भस्मावशेषान
करोद्राक्षसान्स हुहुंडुकान्॥ पाशांश्छित्वा तयोः शंभुस्तत्रैवांतरधीयत॥६९॥ अथ तावुत्थितौ पार्श्वे भस्मराशि
मपश्यतां॥ नान्यं किंचन तौ वीक्ष्य शंभुमेवान्वपद्यतां॥ एवं विस्मयमापन्नौ तौ मुनी मुनिसत्तमौ॥७०॥ ययतुः
काशिकामेव विदीर्णप्रतिबंधनौ॥ चिरकाले ततः काशीं दृष्ट्वा तेति विस्मितौ॥७१॥ लसद्बकुलचंपकप्रचयचा
रुशाखाशिफानितांतमधुलुंपटध्वनिविशेषसंनादितां॥ रसालसुरसोत्कटस्फुटफलप्रतानाहतेस्वनस्त
रभृतारवैर्मुखरितां तराभावुकैः॥७२॥ सचकितमृगीयूथैर्दिक्षु प्रकीर्णविलोचनैर्मुखपुटगृहीतार्धप्रोद्यद्य
वांकुरबंधुरैः॥ विमुखविसरपृथाधीशप्रभावविनाशिभिर्विहितजनतामोदादेवैः सदैव निषेवितां॥७३॥ बि
ल्वभूरिहकोमलच्छदशंभुपूजनतत्परैः कुशकाशपुष्पसमृद्धिराजितफुल्लपाणिसरोरुहैः॥ वेदवेदितकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कांडविधाननिश्चलमानसैर्मुनिभिर्द्विजैरपरैश्चसेवितां भवभेदिनीं॥७४॥पङ्कोत्स ्लकुलोल्लासिसमीरण
हृतश्रमां॥कदलीकांडसंदोहचलद्दलविराजितां॥७५॥भागीरथीसमुत्तर्पत्तरंगालिंगितामिव॥वाराण
सीं तौप्रपश्यंतौविश्वस्यनयनोत्सवां॥७६॥ अवापतुर्मुदं विप्रौदंडवच्चप्रणेमतुः॥नत्वाथतां पुरींप्रीतावंतर्गे
हस्यपूर्वतः॥७७॥त्रिंशद्वर्षसहस्राणि तेपातेपरमंतपः॥तयोस्तत्तपसा तुष्टः कपर्दीतावथाब्रवीत्॥७८
॥विश्वनाथउवाच॥ वरंवृणीतांसुधियौयुवयोर्यौमनोगतः॥तंप्रयच्छामिसंतुष्टोयद्यपिस्यात्सुदुर्लभः॥
॥७९॥तावूचतुः॥वरंचेद्दित्ससिविभोतदात्वद्भवनेस्थितिं॥ अचलांचमतिंदेहिनान्यस्मिन्नौवरेर्थिता॥८०॥
विश्वनाथउवाच॥ भवंतावत्रमत्स्थितौतिष्ठेतांमुनिसत्तमौ॥काशीवासिजनाघौघनाशकौदर्शनेनच॥८१
॥भवतोर्दर्शनंकुर्याद्यःस विघ्नविनाशकृत्॥स्वधर्मनिरतस्तिष्ठेत्स ततंमत्परायणः॥ भृगुरुवाच॥ इतिद
त्वातयोःशंभुर्वरंब्रह्मैकचिंतयोः॥ अभूदंतर्हितस्तत्रकाश्यांमुक्त्येकसाधने॥८३॥ इत्येतद्वःसमाख्या
तंकाशीमाहात्म्यमुत्तमं॥वामदेवेनयत्प्रोक्तंवसिष्ठंप्रतिसादरं॥८४॥यएतच्छृणुयान्नित्यंपठेद्वापिप्रयततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥८५॥ संवादंमुक्तिमार्गस्थंवामदेववसिष्ठयोः॥ लभतेसविनाविघ्नंकाशीवासंनिरंतरं॥८६॥मुनयऊचुः॥

भगवन्यन्निगदितंशंभुनाविश्वयोनिना॥स्वधर्मनिरतस्तिष्ठेदितितद्दृष्टतत्वतः॥८७॥धर्मात्मालभतेमंक्षुमो
क्षंपापःपिशाचतां॥त्वयाप्येतन्निगदितंतत्रनःसंशयोमहान्॥पापात्माकिंपिशाचत्वंप्राप्नुयात्सयमंपरं॥
अथवान्यत्रनरकेपतेत्पूर्वंततस्कृतां॥एतद्विस्तरतोब्रूहितत्वविन्त्वंमतोहिनः॥८९॥भृगुरुवाच॥क्षणंकु
रुतभद्रंवोवदामीहयदाश्रुतं॥काश्यांकृतस्यपापस्यफलंपश्यत्सुदारुणं॥९०॥वाराणस्यांमृतःपापोना
पैतियमयातनां॥नियंताभैरवस्तस्यकालकालःकपालभृत्॥अहोबतभृशंतीव्राभीमाभैरवयातना॥का
श्यांकृतेनपापेनयद्दुःखंसमवाप्यते॥९२॥ अंतकोपिनतद्दुःखंतादृशंचार्पितुंक्षमः॥अत्राप्युदाहरंतीम
मितिहासंपुरातनं॥यच्छ्रुत्वैवनकस्यापिकाश्यांपापेद्यमोभवेत्॥ आसील्कमेरुकोनामशूद्रःकाशीपुरे
पुरा॥९४॥धर्मात्माद्विजभक्तश्चदयावाननसूयकः॥प्रियातिथिश्चसततंधनवान्धर्मवत्सलः॥९५॥तस्य
भार्याश्चपुत्राश्चसर्वेधर्मैकवत्सलाः॥यथोक्ततिथिवारेणतत्तीर्थनिषेवणं॥९६॥ तत्रलिंगार्चनंभक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रे तत्र क्रमेलकः ॥ इत्थं निवसतस्तस्य वर्षाणि सुबहून्यपि ॥ ९७ ॥ व्यतीयुर्धर्मनिष्ठस्य न चासीत्कलु
षा मतिः ॥ कालक्रमेण तत्रैको विप्रो वेदविचक्षणः ॥ ९८ ॥ भागुरिः समुपागच्छन्निवासाय विभोः पुरे ॥ स तु
क्रमेलकगृहं जगामातिबुभुक्षितः ॥ ९९ ॥ तस्य द्वारि समासीनो याचते स्म विनीतवत् ॥ क्रमेलकस्ततं दृ
ष्ट्वा पूर्वपापनियंत्रितः ॥ १०० ॥ भर्त्सयामास मंदात्मा भागुरिं ब्राह्मणोत्तमं ॥ स तु निर्भर्त्स्यमानोपि पुनः पुनर
याचत ॥ १ ॥ क्रमेलकस्तु कोपास्मै ताडयामास पाणिना ॥ भागुरिः क्षुधयाविष्टस्ताडितेनिर्ययौ ततः ॥ २ ॥ तु
लाधारं ददर्शाग्रे प्रार्थयामास तं तदा ॥ तेनातिसत्कृतः कामं बभूव मुदितो द्विजः ॥ ३ ॥ अथ कालेन महता व्या
धिग्रस्तो बभूव सः ॥ तत्याजासून् शिवक्षेत्रे मणिकर्णिजलाश्रितः ॥ ४ ॥ तदैव विकटा भीमा भैरवस्य गणा
स्त्रयः ॥ पाशैर्बबंधुस्तं मूढं निन्युर्भैरवसन्निधौ ॥ ५ ॥ तं दृष्ट्वा भैरवः क्रोधादुवाच ज्वलन्निव ॥ भैरव उवाच ॥
अयं पापसमाचारः कुकर्मकरणोद्धतः ॥ ६ ॥ यथाक्रमं यातनास्य दूताः शीघ्रं नियुज्यतां ॥ भृगुरुवाच ॥ भै
रवाज्ञां समाकर्ण्य यातनास्वन्ययुंजत ॥ क्रमेलकस्तु भूपाशु ध्यातो वर्षसहस्रकं ॥ तावत्कालं रुद्रदेशीते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुभुजेदुःखमुत्कटं ॥ ८ ॥ ततोनिर्जलनिर्भक्षःकृमिदेहधरोभवत् ॥ तत्रैवसारमेयोभूद्गलन्मांसःसुदुःखि
तः ॥ त्रिंशत्त्रिंशत्समाःपश्चात्तावत्कालंगतोभवत् ॥ ततःसंकीर्णयोनीतिशरीराणिव्यधारयत् ॥ १० ॥ अ
थशूद्रशरीरंसदधेतत्रक्रमेलुकः ॥ ततोभैरवदूतैस्तैःसनीतोभैरवाग्रतः ॥ ११ ॥ कालभैरवंदृष्ट्वैवरुद्रपैशा
चमाप्तवान् ॥ त्रिंशद्वर्षसहस्राणिक्षुत्तृषाभ्यांविशोषितः ॥ १२ ॥ ततोसुंक्षीणकलुषंशंकरस्तारकंवचः ॥ श्रा
वयामासविधिवत्संप्राप्याधिकृतिंपरां ॥ १३ ॥ तेनमुक्तिंपरानंदस्त्वांप्रापसुदुर्लभां ॥ इत्युक्तंसकलंविप्रायथा
काशीकृतांहसां ॥ १४ ॥ दुस्तरायातनाघोराकिमन्यच्छ्रोतुमर्हथ ॥ मुनयऊचुः ॥ विचित्रमिदमाख्यातंभृगो
सर्वर्षिसत्तम ॥ परंयदुक्तंदेहांश्चनानादधेक्रमेलकः ॥ १५ ॥ तन्मोहयतिचेतांसिअस्माकंसंशयंदधत् ॥ पुरा
श्रुतमिह्यास्माभिर्वाराणस्यांमृतोजनः ॥ १६ ॥ महापापोपिनाप्नोतिपुनर्जन्मविडंबनं ॥ अन्यथैवाधुनाप्रोक्तंक्र
मेलककथांतरं ॥ १७ ॥ इमंनःसंशयंछिंधिसर्वतात्पर्यविद्भवान् ॥ १८ ॥ भृगुरुवाच ॥ भवद्भिःसंशयोनात्रवि
धेयोमुनिसत्तमाः ॥ रहस्यमिवक्ष्यामिसंशयच्छेदसाधनं ॥ १९ ॥ यद्यसापंकाशिकायामवाप्तंस्थूलोत्कटं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानतोऽज्ञानतो वा॥ तत्तद्भोगप्रापणायैव देहा अयोनिजा भैरवेच्छाविधानाः॥२०॥ उच्चावचा यातनैकप्रधाना
विद्यंते तानेति काशीकृता द्युः॥ यथा याम्ये हि नरके यातनादुःखभागिनः॥ अयोनिजा तादेहास्यकस्तहृदन्त्रा
वधार्यतां॥२१॥ तस्मात्काश्यां पातकं नैव कुर्यात्स्थूलोल्कृष्टयातनाभोगदायि॥ कुर्वन्भुंक्ते रुद्रपैशाच्यमुग्रं
सुदारुणं चापि दुःखप्रयुक्तं॥२२॥ ऋषय ऊचुः॥ भगवन्सत्वरं मुक्तिः काश्यामेव निवासिनां॥ दुर्लभैवावभा
से न पापं केवा न कुर्वते॥ भृगुरुवाच॥२३॥ सत्यमुक्तं धर्मरताः पापं प्रायो नु जायते॥ तथापि किंचित्पापं हि काश्या
मेव कृतं द्विजाः॥२४॥ गंगादितीर्थस्नानेश्वलिंगानां च समर्चनैः॥ विनाशमाप्नोति पुनर्यदज्ञानादुपार्जितं॥
॥२५॥ स्वल्पं ज्ञानादपि कृतं विश्वेशस्य समर्चनात्॥ नश्यत्येव न संदेहो भूयस्तदनुपार्जनात्॥२६॥ उप
पातकसंपत्तिर्महापातकसंगमः॥ कालभैरवनिर्दिष्टां यातनां प्राप्नुयात्परां॥२७॥ स्थूलं यो दुरितं काश्यां कृ
त्वान्यत्र मृतो भवेत्॥ सकल्पकोटिभिस्तस्य पापस्यांतं न गच्छति॥ २८॥ सूक्ष्मपापविनाशाय नित्ययात्रा
विधिर्भवेत्॥ गंगायामाप्लुतिः प्रातर्मध्याह्ने मणिकर्णिकां॥२९॥ निषेवेत सदा पश्चाल्लिंगं वैश्वेश्वरं व्रजेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवानींढुंढिराजंचदंडपाणिंचभैरवं॥३०॥पूजयेन्नित्यशःकाश्यांसूक्ष्मपापाभिभूतये॥भृगुरुवाच॥एवं
यात्रापरस्तत्रयस्तिष्ठेद्द्विजसत्तमाः॥३१॥स्वधर्मनिरतस्तस्यसत्वरंमुक्तिरीरिता॥१३२॥ ॥इतिपद्मपु
राणेपातालखंडेकाशीमाहात्म्येद्वितीयोध्यायः॥ २॥ ॥मुनयऊचुः॥ अहोतिरम्यंपुरवैरिणःपुरंसुरा
पगानीरकणोघशीतलं॥धराधराधीशसुतावधीरितस्वधर्मनिष्ठोर्जितकिल्बिषोच्चयं॥१॥वाराणस्यास्तु
महिमाकर्णामृतरसःपरः॥श्रूयमाणःपुनरपिशुश्रूषांनःसमर्द्धति॥२॥भूयोवदविशेषेणकाशीमाहात्म्य
मुत्तमं॥भृगुरुवाच॥आकर्णयंतुमुनयोमाहात्म्यंकाशिकाश्रयं॥३॥श्रद्दधानाःस्थिरधियोविचिकित्सावि
वर्जिताः॥अत्राप्युदाहरंतीममितिहासंपुरातनं॥४॥आसीन्महीपतिःपूर्वंसुपर्वारथभूपः॥क्षात्रधर्म
रतोनित्यंवलीपुरपुरंजयः॥५॥द्वादशाक्षौहिणीनाथःसोमवंशयशस्करः॥सकदाचिद्वनंयातोमृगयाकृ
ष्ट मानसः॥६॥स्वल्पैरनुवरैःसार्धमारुत्यजविनंहयं॥शरासनोत्सृष्टशरैःशितैःशोणितभोजनैः॥
॥७॥हरिणान्हरिणीसत्त्वानवधीच्चसहस्रशः॥वराहान्महिषान्विध्यंश्चचारगहनेवने॥८॥सोश्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जविनानीतो वनादन्यद्वनं महत्॥ चाराः परावृत्य गता अपश्यंतो नराधिपं॥९॥ सुपर्वा तु वनेन्यस्मिन्
ददर्श सर उत्तमं॥ प्रत्यग्रपंकजमुखं सितकैरवाढ्यं हंसीनिनादमधुरं विधुरं मलेन॥ मत्तभ्रमद्भ्रमरराज्य
लकं मनोज्ञं कामोत्सुकं निजकलत्रमिव प्रसन्नं॥१०॥ तत्तीरकेलिनिरतां चटुलायताक्षीं क्षामोदरीं रति
मिवापरदेहमाप्तां॥ युक्तां सखीभिरभितो मितमध्यदेशां तारुण्यघूर्णितकटाक्षशरान् क्षिपंतीं॥११॥ हा
रावलीललितनव्यपयोधराढ्यां पीयूषभानुवदनां स्त्रियमैक्षतेति॥ दृष्ट्वा सुपर्वा मुदितः पप्रच्छ विनयेन सः
स्त्रियो हि दर्शनादेव मोहयंति द्रुतं नरं॥१२॥ सुपर्वोवाच॥ कात्वं भवसि कल्याणि शरदिंदुनिभानने॥ सुरी
वा किन्नरी नागी अधिष्ठात्री वनस्य वा॥१३॥ तद्ब्रूहि चंचलापांगि श्रोतुमर्हा वयं यदि॥ स्त्र्युवाच॥ अहं वि
शालराजस्य दुहिता रिपुभेदिनः॥१४॥ अनूढास्मि महाबाहो त्वमाशु द्रुह माचिरं॥ सुपर्वोवाच॥ अवै
मि त्वां वरारोहे नोढां केनापि सुंदरी॥१५॥ तथापि तव पित्रैव दत्तां गृह्णामि नान्यथा॥ न चात्मनः प्रभुः कन्या
दाने पितरि जीवति॥१६॥ तथा विशालराजो मे त्वां प्रयच्छतु धर्मतः॥ स्त्र्युवाच॥ विशालराजो धर्मेण न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुभ्यं मां प्रदास्यति ॥१७॥ प्रतिज्ञां स्वकृतां रक्षन्स्वत्र धर्मव्यवस्थितः ॥ सुपर्वोवाच ॥ का प्रतिज्ञा विशाल
स्य किमर्थं केन वा कृता ॥१८॥ वद सर्वं यथातथ्यं ततो हं त्वत्कृते यते ॥ स्त्र्युवाच ॥ अस्ति वाराणसी नाम नग
री गिरिजापतेः ॥१९॥ अपवर्गफलप्राप्तिसाधनं देव दुर्लभा ॥ तत्र कुंडधरः श्रीमान् प्रभूतबलवाहनः ॥२०॥
राजा वसति धर्मात्मा तेनाहं प्रार्थिता पुरा ॥ विशालं प्रति नैवायं स कामं स मवाप्तवान् ॥२१॥ मुहुर्मुहुः प्रार्थयते
स राजानमस्मि तामामदद्दाच्च तस्मै न ततो विशालं प्रति काशिराजः पुरोहितं दुर्वचनानि वक्तुं ॥२२॥ प्रस्था
पयामास पुरोहितो पि विशालमाश्रावयद् उग्रवर्णं ॥ पुरोहित उवाच ॥ शृणु राजन्प्रवक्ष्यामि यत्त्वां कुंडधरो
ब्रवीत् ॥२३॥ प्रार्थिता हि मया कन्या त्वदीया चंद्रिकाभिधा ॥ त्वया न दत्ता क्षुद्रेण तेनाहं त्वां सबांधवं ॥२४॥
निहत्य तरसा नेष्ये चंद्रिकां तव दारिकां ॥२५॥ इति श्रुत्वा मम पिता पुरोहितमथाब्रवीत् ॥ वदेथा विप्र तं पापं
दुष्टं कुंडधरं प्रति ॥२६॥ न दास्ये चंद्रिकां तुभ्यं न चेदन्यं वरं लभे ॥ अनूढैव सुता सैवं स्थास्यते बहुलाः समाः
॥२७॥ यदि दास्यामि कस्मैचित्तदा त्वां सगणं रणे ॥ हत्वा काश्यामुपागत्य दास्याम्येतन्न मे मृषा ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याज्ञाप्यविशालस्तंप्रेषयामाससत्वरं॥अनेनहेतुनावैरंतयोरस्तिनिरंतरं॥२९॥तुल्यत्वाद्बलयोराज्ञोर्नैक
स्यापिपराजयः॥यदायदेवसंग्रामोजायतेस्कमहांस्तयोः॥३०॥तदातदातुल्यभावोदृश्यतेनाधिकोधमः
॥अतउक्तंमयाराजन्पितामेनप्रदास्यति॥३१॥अनुगृह्णीष्वनारीणामाधिज्ञोसिविशेषितः॥भृगुरुवाच
॥एवमुक्तःस्कपर्वातुतयाचंद्रिकयावने॥३२॥नजग्राहवचस्तस्यास्तामुवाचससांत्वयन्॥आगच्छतन्वि
गच्छामोविशालंपितरंतव॥३३॥तंदृष्ट्वायद्भवेद्युक्तंतत्करिष्यामियत्नतः॥इत्युक्त्वातुतयासार्धंविशालं
समुपेयिवान्॥३४॥विशालोपिचतंज्ञात्वासुपर्वाणंनराधिपं॥पूजयामासविधिवत्सप्रच्छागमनेर्थितां
॥३५॥विशालउवाच॥सुपर्वन्राजशार्दूलसनाथोभवताकृतः॥इहागमनहेतुत्वंब्रूहियेनासिसंगतः॥
॥३६॥स्कपर्वोवाच॥चंद्रिकातवपुत्रीयंवनेविचरतामया॥दृष्टातांयाचितुंप्राप्तोदेहिमेविधिवत्सुतां॥३७
॥विशालउवाच॥भवत्समःक्षितौनास्तिवरःकोपिनराधिप॥तुभ्यमेवप्रदेयेयंवाराणस्यांसुतामया
॥३८॥हत्वा कुंडधरंपापंसहामात्यंसबांधवं॥दास्यामिकाश्यांकन्यांचप्रतिज्ञेयंममातुला॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतैवसहायेनहत्वा कुंडधरंशठं॥ भवतेचंद्रिकांदद्यामितिमेनिश्चितामतिः॥४०॥ रूपवोवाच॥ चंद्रि
कांमेप्रयच्छाशुविशालजगतीपते॥ अहंपुनःकुंडधरंसूदयिष्यामितत्क्षणात्॥४१॥ विशालउवाच॥ कं
न्यादानंकरिष्यामिकाश्यामेवनचान्यथा॥ अद्यैवागच्छतत्रत्वंचंद्रिकोद्वहनंकुरु॥४२॥ रूपवोवाच॥
वाराणस्यांकिमाधिक्यंपश्यसित्वंजनाधिप॥ येनतत्रसुतादानंयत्नात्कर्तुंसमुद्यतः॥४३॥ विशाल
उवाच॥ सुपर्वन्काशिसामर्थ्यंवक्तुंवेदानहिक्षमाः॥ धर्मस्त्वनुष्ठितःपुंसामनंतफलदोभवेत्॥४४॥ काशी
वासीक्षुत्कशःपुल्कसोवाश्रेष्ठोराजन्मुक्तिकन्यावृतोयत्॥ अन्यत्रस्थःसार्वभौमःस्वधर्मीनस्याच्छ्रेष्ठोग
र्भभावैकयोग्यः॥४५॥ अविमुक्तंनमुंचंतिमुनयःशास्त्रचिंतकाः॥ संसारसागरोत्तुंगतरंगासंगभीतयः
॥४६॥ अविमुक्तेतुयत्तिष्ठेदाकलेवरपातनात्॥ तंविश्वेशोत्रजीवंतंमृतंचपरिरक्षति॥४७॥ काशीवासंक
कर्तुकामोयदिस्याद्दूरस्थोपिब्राह्मणंधर्मनिष्ठं॥ तदानानावस्त्रभोज्यादिदत्वाश्रद्धायुक्तःसर्वदावासयी
त॥४८॥ वाराणस्यांवासयन्ब्राह्मणाग्र्यंदेवोच्छिंद्याद्दुष्टसंसारबंधं॥ तस्मादत्रस्थापनीयाःप्रयत्नाद्विशाराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तूरगेनापिमुक्तये ॥४८॥ सुपर्वन्मणिकर्णिक्यांस्नात्वा विश्वेश्वररक्तयैः ॥ सकृद्दृष्टेन वैतेषां गर्भवासस्य संभ
वः ॥५०॥ गंगोद्ग्वाहिनीं पुण्यां तीर्थकोटिशतैर्वृतां ॥ निषेवेतमहीपालसततं पापहारिणीं ॥५१॥ अव्याकृतज
लादेवीकाश्यां वसतिजान्हवी ॥ संपादयति क्षेत्रस्य शोभां जातिप्रसूनजां ॥५२॥ सर्वदेवाः सगंधर्वास्तत्र विश्वे
श्वरं प्रभुं ॥ उपासने तु विधिवत्सर्वकर्मसमृद्धये ॥५३॥ काश्यां श्वेतकिना पूर्वं भूपालेंद्रेण शंकरः ॥ सहस्रं व
त्सरान् शान्त्या तोषितः क्रतुलब्धये ॥५४॥ ततः कैलासमवसद्भगवान् श्वेतकिन्नृपं ॥ तत्रापि सततपस्ते
पे संवत्सरशतं परं ॥५५॥ महादेवस्ततः प्रीतो दुर्वाससमयादिशात् ॥ श्वेतकेर्यज्ञसिध्यर्थं सतयज्ञमका
रयत् ॥५६॥ एवं रूपा सुपर्वन्सा काशी वाराणशी पुरी ॥ सिद्धिक्षेत्रं तपःक्षेत्रं मुक्तिक्षेत्रं परं स्मृतं ॥५७॥ अ
तोहं चंद्रिकां तन्न तुभ्यं दास्यामि नान्यथा ॥ एवं ज्ञात्वा महाबाहो काश्यान् कुंडधरं नृपं ॥५८॥ जहि प्रसह्य
सबलमस्ति चेच्चंद्रिकार्थिता ॥ भृगुरुवाच ॥ ॥ इति श्रुत्वा वचस्तस्य विशालस्य द्विजोत्तमाः ॥५९॥ सुपर्वा
तदभीष्टं यत्प्रतिजज्ञे तदादरात् ॥ अथ दूतान्स्वदेशं स सुपर्वा प्रेषयद्बहून् ॥६०॥ सेनानयनहेतोर्हि सेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पतिकृतत्वरान्॥सुपर्वणःसैन्यपालंप्रियाश्वंरणदुर्मदं॥६१॥तेगत्वासर्वमूचुस्तत्कपर्ववचनंपरं॥तच्छ्रु
त्वास्वामिनोवाक्यंप्रियाश्वःसत्वरंभटान्॥६२॥निनायतंसुपर्वाणंद्वादशाक्षौहिणीस्तदा॥स्वसैन्यंसर्व
मादायविशालेनानुमोदितः॥६३॥जगामकाशींतरसाहंतुं कुंडधरंनृपं॥विशालोपिस्वसैन्येनमहता
परिवारितः॥६४॥आदायचंद्रिकांकन्यांययौदातुंसुपर्वणे॥ततःकुंडधरःश्रीमान्न्यूनसैन्योपिरोषितः
॥६५॥सन्नह्यतस्थौतत्रैवसमराकांक्षयाबली॥सुपर्वाथस्वसैन्येनरुरोधनगरंविभोः॥६६॥भृशंकुंडध
रंहंतुंकृतचित्तःप्रतापवान्॥एवंसैन्यसमावापेजातदेवाःसवासवाः॥६७॥रणंनिरीक्षितुंप्राप्ताअप्स
रोभिश्चसर्वशः॥स्ववेश्यास्तत्रसंप्राप्ताद्दृष्ट्वादेवेश्वरोब्रवीत्॥६८॥पुरोहितंगुरुंतत्रकाशीमहिविवत्स
या॥इंद्रउवाच॥ब्रह्मन्विमानानुगतावृहस्पतेसमागताअप्सरसोविशिष्टाः॥रणोज्झितास्तन्सुभटा
न्विनेतुंकिंभावितन्मेवदसुद्धबुद्धे॥६९॥गुरुरुवाच॥आसामपांगोगतरंगितानिअनंगसंदीपनसाध
नानि॥मुनीशसंमोहनकारणानिरतिप्रियाण्यप्यलसेरितानि॥७०॥अस्मिन्महादेवपुरेमृतेषुयोद्धे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षु शस्त्रोज्झितपातकेषु ॥ सुधाभविष्यंति सुधांशुमौलिप्रदिष्टतत्त्वानुभवेषु शाक ॥७१॥ एतास्वलब्धमरण
णिपद्माः पद्मेक्षणाः कांचनचारुवर्णाः ॥ लसद्विमानानि निजानि नीत्वा यास्यंति शून्यानि विशिष्टयोधैः ॥
॥७२॥ शानकृतो शंभुपुरे मृतानां निर्वाणलक्ष्मीपरिसेवितानां ॥ शास्तिः कथं स्याच्च पलाशकरोभिः क्षपितुं
भोगान्कुलमानसाभिः ॥७३॥ क्षेत्रे पवित्रे मृतिमागतानां ब्रह्मादिकीटांतशरीरभाजां ॥ कर्णेजपत्वस्सरतार
कारव्यं ततः परं ध्वस्तभवाभवंति ॥७४॥ अन्यत्रापि प्रमीतानां श्वाहं त्र्यक्षासमेधिनां ॥ अत्र दीयेत तेन स्यान्ते
षां कैलाससंभवः ॥७५॥ भगवन्भगवानीशो भवान्यासहितो निशं ॥ अधितिष्ठति जंतूनां मुक्त्यै क्षेत्रमिदं परं ॥
॥७६॥ अत्र संग्राममध्ये ये प्राणांस्त्यक्ष्यंति शस्त्रिणः ॥ एतासां ते विषयगा न भविष्यंति वासव ॥७७॥ बहु
नात्र किमुक्तेन दुर्ज्ञेया भवतोपि ते ॥ सच्चिदानंदनिर्माय ब्रह्मभावं समागताः ॥७८॥ भृगुरुवाच ॥ इत्थं
मो वाच मधुरं गुरुः शांतमुखं प्रति ॥ तत इंद्रोप्सरोयूथं त्रयाश्रममथान्यत ॥७९॥ अथ कुंडधरस्यासीत् तासे
न्येन सुपर्वणा ॥ सुतुल्यं माणहरं घोरं मांससशोणितकर्दमं ॥८०॥ रथा रथैः समाजग्मुः पदाताश्च पदातिभिः ॥ हयै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्हपागजैर्नागाः समंयुद्धमवर्त्तत ॥८१॥ सैन्यंकुंडधरस्याशुक्षपइत्वा बलाहली ॥ जघानतंकुंडधरंसामा
त्यंससुतंक्षणात् ॥८२॥ अथतस्यपदेस्थाप्यविशालंजगतीपतिं ॥ चंद्रिकाशुपयेमेसपूजितस्तेनभूभु
जा ॥८३॥ भृगुरुवाच ॥ इत्येतद्वो मयाख्यातंकाशीमाहात्म्यमुत्तमं ॥ यत्श्रुत्वापापसंघातंहंतिपुण्य
परोनरः ॥८४॥ अन्यच्चश्रूयतांविप्रावाराणस्याशुणाश्रयं ॥ याज्ञवल्क्येनयत्प्रोक्तंजनकायमहात्मने
॥८६॥ विदेहोजनकोनाममोक्षोपायंयथातथा ॥ याज्ञवल्क्यमुखाच्छ्रुत्वाविचिकित्साविवर्जितः ॥८६
बभूवपरिपूर्णात्मातत्वानुभवमाप्यच ॥ पूर्णोपिजन्मसंसारंदुःपारंवीक्ष्यदुःखितः ॥८७॥ याज्ञवल्क्य
मुवाचेदंमोक्षवर्त्मोपदेशकं ॥ जनकउवाच ॥ भगवन्सर्वज्ञंतूनांयेनमोक्षोविभाव्यते ॥८८॥ तद्ब्रूहिस
र्वंतत्वज्ञयद्यस्तितवगोचरे ॥ यदुक्तंब्रह्मनिष्ठेनभवोच्छेदस्यकारणं ॥८९॥ दुर्लभंतद्धिसर्वेषांमुनीना
मपिकिंपुनः ॥ अज्ञानांभोगलुब्धानांपराङ्मातृस्यचेतसां ॥९०॥ याज्ञवल्क्यउवाच ॥ भद्रंवदसिराजें राम
द्र दुर्लभंसाधनंहितत् ॥ मुनीनामपिसर्वेषांकिंपुनर्लिप्तचेतसां ॥९१॥ एतत्साधनसंपत्तिंविनानास्तिभवक्ष १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यः॥ किंतु तत्साधनं शीघ्रं प्राप्यते कुत्रचिन्नृप ॥९२॥ अस्ति वाराणसी नाम नगरी सुगरीयसी॥ तस्यां साध
नसंपत्तिर्मोक्षश्च मरणाद्भवेत्॥९३॥ वाराणसीस्थतीर्थानामवगाहनतः परं॥ अंतःकरणसंशुद्धिं प्राप्नु
याद्धि जितेंद्रियः॥९४॥ वैदेह तस्मिन् क्षेत्रे हि नित्यं सन्निहितो हरः॥ जंतूनाम पवर्गाय गिरिजा प्राणवल्लभः
॥९५॥ तस्य लिंगं तत्र भाति दिव्यं विश्वेश्वराभिधं॥ तस्य दर्शनमात्रेण तत्त्वज्ञानविघातकं॥९६॥ पापं स यम
वाप्नोति नास्ति कोप्यत्र संशयः॥ रागद्वेषविनिर्मुक्ताः कामक्रोधविवर्जिताः॥९७॥ विश्वेश्वराभिधं लिंगं पश्यं
ति ज्ञानचक्षुषा॥ तडित्कोटिसमप्रख्यं कोटिचंद्रार्कसन्निभं॥९८॥ इंद्रियातीतममलं त्रैलोक्यव्यापकं परं
॥ मोक्षाय यत्प्रयत्प्राप्तो[?] निरवद्यं निरंजनं॥ यस्य भासा रविर्भाति चंद्रः पावकएव च॥९९॥ नक्षत्राणि गृ
हाश्चैव न तद्भासयते रविः॥ न पीयूषकरो नाग्निर्न तडिद्ग्रहतारकं॥ काश्यां विश्वेश्वराख्यं तल्लिंगं दृष्ट्वा वि
मुच्यते॥ ब्रह्मात्मकानि लिंगानि तत्र संति सहस्रशः॥१॥ तानि दृष्ट्वार्चयित्वा च मनः सिद्धिं समश्नुते॥ वा
पी तत्रास्ति वैदेह चिन्मयी देवदक्षिणे॥ तदपांसेवनादेव भासते ब्रह्म केवलं॥ ऋषयो मुनयः सर्वे तत्रैवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृधिरेमनः॥३॥मोक्षंतुसुलभंमत्वामरवकर्मपराङ्मुखाः॥ततोब्रह्मपरिज्ञायकर्मोच्छित्तिंविचार्यचाँ॥द
शाभूवमेधानाजन्हेतत्रैवशिवतुष्टये॥प्रीतोभवन्महादेवोवाजिमेधैःक्रमसंस्कृतैः॥५॥उवाचपद्मसं
भूतंकोवरोवांछितस्तव॥६॥ब्रह्मोवाच॥भगवन्देवताःसर्वायज्ञभागविवर्जिताः॥६॥क्षीणासत्त्वन्न
पृथिवीमभिवर्षतिपूर्ववत्॥वर्षाभावात्प्रजाःसर्वाःपीड्यंतेहिबुभुक्षया॥ ७ ॥इत्थंत्रिलोकीप्रलयो
कांडेत्रसमुपस्थितः॥तंविनाशंपरिहरश्रीकंठपरमेश्वर॥८॥ननश्येयुरिमेलोकास्तथानीतिर्विधायतां
॥नाराणस्यांतवक्षेत्रेवेदाध्ययनशालिनः॥मोक्षमेवकिलेच्छंतिविधिकर्मपराङ्मुखाः॥याज्ञवल्क्यगवा
च॥जनकेवंपद्मभुवाशंकरोयाचितस्तदा॥लोकानामुपकारार्थंचिरंचिंतापरोभवत्॥चिंतयित्वाब्रवीदे
वःप्रजापतिमिदंवचः॥शिवउवाच॥११॥मत्क्षेत्रमेववेदेतत्सेवंतेमुक्तिकांक्षया॥विध्यनिष्ठानरहिता
ज्ञानमार्गेसमाश्रिताः॥१२॥किमत्रममसामर्थ्यमन्यथाकरणेविधेः॥नतावत्कालपर्यंतंकाश्यांरोगादि
संभवः॥१३॥नरागद्वेषलोभाश्चकार्परापभयानिच॥नपैशून्यंनकलहोलोलुपत्वंनवैक्षुधा॥१४॥नवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारा भवंत्यत्र न शोको विषयात्मकः॥ मम विस्मरणे नैव न हरेर्न वृषस्य च॥१५॥ सर्वे मम प्रियकराधने
दैहैः प्रियैः सदा॥ कथमेतान्क विश्वस्तान् मोहयामि विधे विधौ॥१६॥ तथापि किंचित्कर्तव्यं हिताय स्व
निवासिनां॥ आवयोर्वदतोः पूर्वमृत्युः स्त्रीवेषरूपधृक्॥ प्रादुरासीत्तव क्रोधात्त्वया मृत्यो रितीरितं॥ ते
नत्रस्ता रुरोदोच्चैरावयोः पुरतः स्थिता॥ तस्या अश्रूणि भवता पाणिभ्यां विधृतानिव॥ तान्येव कल्पिता
नि स्युर्लोकाप्रुःक्षपणाय वै॥१९॥ कानिचिद्व्याधिरूपेण रागद्वेषादिभागशः॥ अत्र तान्येव जंतूनां विघ्न
रूपेण पद्मज॥२०॥ तिष्ठंतु सततं न्यूनं च्यावयंतु स्वधर्मतः॥ अमुं विघ्नगणं राजन्परिभूय धृतव्रताः
॥२१॥ येऽस्यास्यंति मम क्षेत्रे द्रुतं ते मुक्तिमाप्नुयुः॥ याज्ञवल्क्य उवाच॥ एवं यदा महेशेन प्रजासंरक्षिणा
र्थिना॥२२॥ स्वयंभुवा चोदितेन नियमः परिकल्पितः॥ तदेव राजन्सर्वेषां मुनीनाम पि बुद्धिषु॥ रागद्वेष
भयोद्वेगप्रमादालस्यकामिताः॥ प्रादुरासन्नमात्सर्यात्तत्वज्ञानविरोधिनः॥२४॥ ततः केचिद्द्ययो द्विज्ञा
वृथाभीतास्त्व केचन॥ तत्यजुः काशिकां विप्राः केचिद्द्रोहमथाचरन्॥२५॥ अन्योन्यमात्सर्ययुताः केऽपि मो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ त्सुकबुद्धयः॥ बभूवुर्मुनयः केचित्केचित्कामपराभवन्॥२६॥ इत्थंव्याकुलिताः सर्वेसंहत्योचुः परस्परं॥ त्यजे
१९ मकाशिकांसर्वेविघ्नाः संभवंतिहि॥२७॥ यद्यपीहसुलभ्यंतन्निर्वाणंमुनिसत्तमाः॥ तथापिरागद्वेषा
दिर्बाधतेमानसानिनः॥२८॥ रागादिषुप्रजातेषुपापमेवसमेधते॥ अस्मिन्क्षेत्रेकृतंपापंस्वल्पंवापिम
हद्भवेत्॥२९॥ तस्मात्स्वस्वकर्माणिकरिष्यामोयथाविधि॥ अंतःकरणशुध्यर्थंततस्तत्त्वंस्फुरिष्यति॥
॥३०॥ विचार्यैवंगताः सर्वेमुनयः शंसितव्रताः॥ वाराणसींविहायैवमुनयः शंसितव्रताः॥३१॥ त-
स्माज्जनकभूपालकाश्यांनिर्वाणसंसदि॥ सुलभापिमुहुःप्रापाविघ्नव्याकुलितात्मभिः॥३२॥ मुक्तिः
संसारगहनंबंधनात्पृथिवीपते॥ अन्यदत्रप्रवक्ष्यामिअविमुक्तेप्रतिप्रभो॥३३॥ आदित्याद्यन्मया
ज्ञातंश्रूयतामवधानतः॥ आम्नायाध्ययनायाहंविवस्वंतंविभाकरं॥३४॥ उपतिष्ठामिसततंत्रै-
लोक्याभासकंरविं॥ तंकदाचिदुपागच्छच्छशांकधवलद्युतिः॥३५॥ नारदोब्रह्मणःपुत्रोविपंचीमनु राम
नादयन्॥ यथावत्तंसमभ्यर्च्यचंडभानुरपृच्छत॥३६॥ कुतआगच्छसिमुनेकिंवाहंकरवाणिते॥ इ- १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपृष्टः सदेवर्षिरब्रवीद्दिवसेश्वरं ॥३७॥ नारदउवाच॥ अतएवाहमायातः प्रष्टुंत्वांविश्वभावन॥ निश्चि
त्यवदतत्वेनसर्वांतरस्थिभास्कर॥३८॥ गोमेधेसंगताविप्रामरुत्तस्यमहीपतेः॥ गोमेधेसंगताविप्राःक
थांचक्रुर्मनोरमां॥३९॥ कथाप्रसंगान्निर्वाणसाधनानांकथाभवत्॥ तत्रस्तवैर्वेशिवसेत्रंकाशीतियन्नि
गद्यते॥४०॥ तदेवमशशंसुर्हिभूयोभूयोविमुक्तये॥ तदामेसंशयोभानोबभूवमनसिस्थितः॥४१॥ किंका
श्यवपुरीमुक्तौविष्णुभक्तिरपिप्रभुः॥ पुष्करादीनितीर्थानिकिन्ननिर्वाणहेतवः॥४२॥ क्षेत्राणिकिं कुरु
क्षेत्रप्रभृतीनिनमुक्तये॥ इतिमेसंशयोभानोछिंधिमेनुग्रहोयदि॥४३॥ सूर्यउवाच॥ संशयोनत्वयाका
र्योदेवर्षेक्वापिकर्हिचित्॥ लोकद्वयपरिभ्रष्टः संशयात्माविनश्यति॥४४॥ तीर्थांतराणिक्षेत्राणिविष्णुभ
क्तिश्चनारद॥ अंतःकरणसंशुद्धिंजनयंतिनसंशयः॥४५॥ वाराणस्यपिदेवर्षेनाहृश्येवपरंनुसा॥ प्रका
शयतिब्रह्मैक्यंतारकस्योपदेशतः॥४६॥ अन्यत्रास्वकृतोधर्मःसाधनानिकृतानिच॥ अत्रकाश्येवसा
हाय्यकर्त्रीकाशप्रकाशिनी॥४७॥ धर्मेन्यूनाधिकंकिंचित्सापूरयतितत्सतां॥ सुहृदांपापभीरूणामनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यस्करवविद्विषां॥४८॥ अनेनैव विशेषेण तां प्रशंसंति नास्तिकाः॥ साक्षाद्वाराणसीमुक्त्यै विष्णुभक्तिस्त
थाविधा॥४९॥ तथापि विष्णुभक्तिस्तु द्वित्रैरेव विभाव्यते॥ मनुष्यैर्धनदारेषु स्नेहातिशयवर्जितैः॥५०॥
धनं येषां प्रियकरं कथं ते षां हरिप्रियः॥ हर्यर्थं नव्ययी कुर्यादिति भक्तिः सुदुर्लभा॥५१॥ काशी तु तिर्यग्भू
तानामपि साधारणी मता॥ परंतु रागाकुलमानसानां नृणां परद्रोहविधानभाजां॥५२॥ वाराणसीनिवृत्तये
न साक्षाद्यक्षतेस्वीकृतकिल्बिषत्वं॥ काश्यां कृतेन पापेन यातनामतिभीषणां॥५३॥ प्राप्य पश्चाद्विमुच्यं
ते क्षीणकल्मषशालिनः॥ विधेर्हरविरप्येवमुक्तवान्मारदं प्रति॥५४॥ अतः साधारणत्वेन जंतूनामपि मुक्त
ये॥ जिज्ञासितं यदुद्भवता तन्मया परिकीर्तितः॥५५॥ भृगुरुवाच॥ एवं प्रभावा सा देवी विनायासेन मुक्तिदा॥
प्रोक्ता मया मुनिश्रेष्ठा भूयः किं कथयामि वः॥५६॥ इति पद्मपुराणे पातालखंडे काशीमाहात्म्ये तृतीयोध्या
यः॥३॥ ऋषय ऊचुः॥ भगवन्सर्वतत्वज्ञ त्वन्मुखेंदुसुधारसं॥ पायं पायमपि ब्रह्मन्न तृप्यामो निरंतरं॥१॥
भूयः कथय काश्यास्तु महिमानं महामते॥ सूत उवाच॥ इति पृष्ठः पुनर्विप्रैः स भृगुर्भृगुनंदनः॥२॥ कथया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासभूयोपिचित्रांवाराणसीकथां॥ भृगुरुवाच॥ आकर्णयंतु मुनयः शिवराजधानीमाहात्म्यमुज्झितभ
वप्रियमुच्यमानं॥ यस्यावधारणवशेन परेशपुर्यां भक्तिः समुल्लसति संसृतिनाशहेतुः॥३॥ आसीत्पुरा
भूमिभुजांवरिष्टः शिष्टप्रियः सुवदनाभिधउग्रतेजाः॥ काश्यां निरंतरितशंकरशंकरार्चो व्यग्रोपलब्धिरति
थिप्रियपालनज्ञः॥४॥ सर्वस्वदक्षिणमुपाहरदध्वरंतंयं वैदिकं विधिषु विश्वजितंवदंति॥ तंद्रष्टुमेवमुनि
काननवैरवंद्यु ब्रह्मात्मजः समगमन्मुनयः कुमारः॥५॥ आलोक्य पूजनममुष्य चकार राजा हेतुं तथागमन
साधनमन्वपृच्छत्॥६॥ राजोवाच॥ ब्रह्मैकतानभवदागमनेनमेसौ यज्ञः समुज्वलनिजांगयुतो द्यजातः॥
प्राप्स्याम्यनेन विधिना विहितेन नित्यं दुःप्रापमन्यपुरुषैः सुरराज्यसाम्यं॥७॥ त्वंकिन्निमित्तमिह सर्वज
नांतरात्मन्प्राप्तोसि पूर्णसकलेप्सितभावजातः॥ नातः परं तव मनोरथभावमीया द्ब्रह्मात्मभावपरिभाव
नपूर्णबुद्धेः॥८॥ भृगुरुवाच॥ एवंपृष्टः स भगवान्कुमारो विधिसंभवः॥ प्रत्यूचे तं सुवदनं स्निग्धगंभीर
यागिरा॥९॥ सनत्कुमार उवाच॥ आगतोहं महाभाग भवदध्वरमीक्षितुं॥ विधीयमानं विधिवत्तं प्राप्तुंश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रतुल्यतां॥१०॥अहो बत महामोहमाहात्म्यं दुस्तरं नृभिः॥यत्वं सुवदन ज्ञोपि काशिस्थः स्वर्गगामि स्मृति
॥११॥राजन् किं शक्रसाम्येन विनश्वरतरेण च॥अमुं विश्वनरं काश्यां शंकराय समर्पय॥१२॥अन्यथा
ते वृथा सर्वं क्षपिष्यति विशांपते॥वाराणस्यां कृतं कर्म नीलकंठाय चार्पितं॥१३॥मनःशुद्धिं विधायाशु त
त्वज्ञानाय कल्पते॥सुवदन उवाच॥मम पुण्यपरीपाकसमाकृष्ट इव क्षणं॥भवान्समागतो ब्रह्मन् यो
गींद्र ब्रूहि मे हितं॥१४॥सनत्कुमार उवाच॥सुवदन प्रियमेव भवत्कृते परिवदामि महेशपुरे परे॥विहित
कर्म विधाय समर्पयस्मितिधरेश्वर जापतये निशं॥१५॥नहि तथा विदितो भवता पुरा हरपुरो महिमा कः
लुषापहः॥शृणु वदामि हितायन वाखिलं स्वयमथो न करिष्यसि कामितां॥१६॥मुनिर्मौनाभिधः पूर्वं बभू
व यमुनातटे॥कौषीतकीकुलोत्तंसः करुणो ब्रह्मवित्तमः॥१७॥तस्यांतेवासिना वास्तां शुद्धौ मांडव्यमुद्ग
लौ॥स्वाध्यायाध्ययने सक्तौ गुरुशुश्रूषणे रतौ॥१८॥तयोर्मांडव्यसंज्ञस्तु मौनेन मुनिनेरितः॥बलियज्ञं
प्रति ययौ हौत्रं कर्त्तुं महामतिः॥१९॥स गत्वा तत्र ददृशे मुनीन्विप्रान् ऋषीनपि॥समागतान्यज्ञकृते वेदवेदांगपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रगान्॥२०॥बलिस्तं विधिवत्पूज्यन्यपूज्यस्यौत्रकर्मणि॥मांडव्यः कर्मतत्सर्वंचकारविधिवद्दृषी॥२१॥क
श्चिद्यस वैष्णुविप्रेषु ब्रह्मविस्तुच॥उपविष्टेषुदैत्येंद्रे मांडव्यं प्रत्यभाषत॥२२॥ बलिरुवाच॥मांडव्य
ते गुरुः कस्मान्मौनोनात्रसमागतः॥ समाहूतोपिसततं यद्जानासितद्वद॥२३॥ मांडव्यउवाच॥ ना
न्यत्कारणमस्त्यत्र बलेमद्गुर्वनागमे॥ किंतुनिर्वाणदांकाशींप्रस्थितः सहसुद्गलः॥२४॥ मांचप्रस्थाप
यद्य ज्ञेभवतः प्रीयतेप्रभो॥२५॥ बलिरुवाच॥काशींगतोमुनिर्मौनः किमुद्दिश्यप्रयोजनं॥तस्यब्रह्मवि
दः प्रायोनैवास्तेकामिताफलं॥२६॥मांडव्यउवाच॥ दैत्येंद्रशंकरक्षेत्रेगंतुंकस्यनधीर्भवेत्॥ अपवर्गै
कफलदेकलेवरपरिक्षयात्॥२७॥यत्कर्मतत्रकुर्वीतशुभंवायदिवाशुभं॥ अक्षय्यंतत्रभवतिनात्र
कार्याविचारणा॥२८॥मौनस्कमुनिशार्दूलदांति शांतिसमन्वितः॥तत्रस्यास्यतिचादेहपतनान्नि
रुपद्रवः॥२९॥ अहंतत्रगमिष्यामिसमाप्तेभवतोध्वरे॥गुरोश्चरण शुश्रूषानिरतः सततंपुनः॥ ३०॥
॥बलिरुवाच॥यदिमांडव्यभवतागंतव्याशांकरीपुरी॥पूर्णेक्रतौममप्रभुनेसमायास्यामितेसह॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥सनत्कुमारउवाच॥ एवमुक्त्वा बलिर्विप्रं तूर्णंसुवदनाध्वरं॥ समापयामास तदाऋत्विजः समतोषयत्
॥३२॥ क्रतौसमाप्ते स बलिर्मांडव्यसहितो ययौ॥ बलेनाल्पेन दैत्येंद्रः काशीं मोनं च वीक्षितुं॥३३॥ महता
समयेनाथो काशीं लोचनशोभनां॥ अपश्यत्स पिता घोघां स मांडव्यो बलिस्तदा॥३४॥ विद्रुमपल्लवस्फु
ललितशाखैर्मरकतमणिमयचलद्दलरम्यैः॥ मुक्ताफलगणवज्रकमुकुलैः सुरभूरुहनिकरैरतिरम्यां
॥३५॥ मदजलगंधसमाहृतचित्तैर्गणयति कर्णविधूननचटुलैः॥ स्फूर्जतिकर्णमधुरगलकुहरैर्मधुकर
निकरैर्मुखरितदिशां॥३६॥ कोकिलकलरवनर्तरलितपत्रैः परिणतरुचिरफलोत्करनम्रैः॥ शुकमुखखगगण
सेवितशाखैश्चूतवनैरमणीयतरां च॥३७॥ शरदुडुपतिनिभवृषभपिनद्धैर्मणिगणघटनसमेधितपरमैः
॥ वृषगमनानुगुणक्वणितार्घैर्लघुघंटानिकरैश्च मनोज्ञां॥३८॥ चिंतामणिस्तंभविनिर्मितेन पराध्यैर
त्नैः खचितां चिरेण॥ विराजितां कल्पलताकुलेन धराधराधीशसुतागृहेण॥३९॥ भीषणभैरवरवहृ
तपापांदुरितसमाकुलमनुजदुरापां॥ गिरिजासहितसुधाकरसुंदरशेखरशंकरनियमितवासां॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षरनरकिन्नरमुनिजनसेवितदंडकरक्षतविघ्नां॥ काशीमेवंविधांदृष्ट्वाबलिर्मांडव्यएवच॥नमस्कृत्वा
विविशतुःपुरींवाराणसींपरां॥४१॥ कृत्वास्नानानितीर्थेषु पूज्यलिंगानिनित्यशः॥ ४२॥ मौनस्यमुख्य
स्यकुटीमुभौजग्मतुराहृतौ॥ मौनोबलिंतुविधिवद्दातिथ्येनसमर्चयत्॥४३॥ मांडव्यश्चबलिश्चैववववदातेमु
दायुतौ॥ मौनस्तकुशलंपृष्ट्वायज्ञसिद्धिंचमंजुवाक्॥४४॥सधर्मान्कथयच्छ्रोतान्बलिंदेवेश्वरंप्रति॥उ
चितसमयंज्ञात्वामौनंबलिरथाब्रवीत्॥४५॥ बलिरुवाच॥भगवन्सर्वतत्वज्ञब्रह्मविद्याविशारद॥किं
फलाकांक्षयाकाशीसेव्यतेभवतामुने॥४६॥ तदेतत्सकलंब्रूहिश्रोतुयोग्यावयंयदि॥४७॥मौनउवाच॥
देवेश्वरमयाकाशीसेव्यतेमुक्तिकाम्यया॥कोहिकाशींमुमंदात्मास्वर्गार्थविनिषेविते ॥४८॥ अत्रवि
श्वेश्वरःसाक्षात्तारकंमुक्तिसाधनं॥यस्यकस्यापिवर्णांतधर्मापेक्षोनुशंसति॥४९॥सुदुर्लभमिदंक्षे
त्रंपूर्वपापाकुलात्मनां॥अधिष्ठितंभगवताशंकरेणनिरंतरं॥५०॥स्वधर्मनिष्ठस्यजनस्यसंभवेत्कथंचि
दन्यत्रमृतस्यदेवता॥काश्यांमृतस्याधमयोनिजन्मनोपुनर्भवोनास्तिबलेकदाचित्॥५१॥अत्रेंदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का·मा· चूडनगरेस्थातव्यमविशंकया।। नहिशंकाकुलःक्वापिप्राप्नोतिपदमुत्तमं।।५२।।निर्वाणहेतोरन्यत्रवि
२३ धानेपिमहामते।।मृत्क्षः संशयितातेनजन्मनाशोकरूपिणा।।५३।।तादृशस्यात्रदेहस्येशशरीरत्यागमा
त्रतः।।अपवर्गोभवत्येवनतदन्यस्यविलंबतः।।५४।।ज्ञानवेंद्रशरीरेस्मिन्गतमाप्नोतिदुराशया।।मज्जयंति
निजात्मानंसंसारेशोकसागरे।।५५।।जानतोपिविशेषेणमूढाःपंडितमानिनः।।नस्वार्थेषुसमीहंतेनर्थे·
स्वार्थंनजानते।।५६।।अतोवलेहिताप्यैवस्वात्मानोयततांनृणां।।सेव्यानिनानातीर्थानिमुक्तिक्षेत्राणि
यानिच।।५७।।अतोमयेयंनगरीशंकरस्यपरात्मनः।।सेव्यतेश्रद्दधानेनमुक्तिमात्रपरीप्सया।।५८।।सनत्कु
मारउवाच।।इत्थंसकवद्नोक्तेनमौनेनमुनिनाबलिः।।चकारकाशीवासायमतिं मतिमतांवरः।।५९।।मौ
नस्क्तंतथाज्ञात्वावभाषेदानवेश्वरं।।मौनउवाच।।यत्वमिच्छसिविश्वेशक्षेत्रेस्थातुंनिरंतरं।।तत्समाकर्ण्य
मद्वाक्येकुरुस्थितिमरिंदम।।६०।।रागद्वेषविलिप्तानांकामक्रोधाकुलात्मनां।।पापेष्वभिरतानांचमदमात्स राम
र्यशालिनां।।६१।।प्रायःपापसमारंभाद्दृश्यतेन्यत्रभूरिशः।।तथाविधानांक्षेत्रेस्मिन्निवासःकलुषावहः।। २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥६२॥ अत्रत्यपापभोगस्थ दारुणो दानवेश्वर ॥ एतत्कृतायसंघातात् घोरांभुक्त्वातुयातनां॥६३॥पैशाच्यं
समवाप्नोति वर्षाणामयुतत्रयं॥ वाराणस्यांनिवसतिरपवर्गफलप्रदा॥६४॥ द्विजाणांचपवित्राणांकल्पते
सत्वरंबले॥६५॥ सनत्कुमारउवाच॥ वासंस्रुवद्नात्यंतंदुष्करंशांकरेपुरे॥ मत्वालिंगंप्रतिष्ठाप्यस्वदेशंपु
नराव्रजेत्॥६६॥ अतस्त्वयामहाराजक्रतुनानेनशोभिना॥ इंद्रसाम्यंनकाम्यंहिवाराणस्यांकृतेनच॥
॥६७॥ समर्पयमहाबाहोमहादेवायवेधसे॥ ततोमनःशुद्धिमाप्यगंतासिपरमंपदं॥६८॥ भृगुरुवाच॥
इत्थंसनत्कुमारेणद्विजाःसुवदनोनृपः॥ अनुशिष्टस्तथाचक्रेतत्रमोक्षंचलब्धवान्॥६९॥ अत्रैवोदाह
रंतीममितिहासंपुरातनं॥ वाराणसीगुणाख्यानंकिल्बिषापहरंपरं॥७०॥ दिवोदासोभवत्पूर्वंसर्वभूपा
लभूषणः॥ सत्यवान्धर्मतत्वज्ञःप्रजाधर्मेणपालयन्॥७१॥ तस्यैवंधर्मनिष्ठस्यव्यतीयुर्बहुलाःसमाः
॥ नबभूवस्रुतोविप्राःकाश्यांवंशविवर्द्धनः॥७२॥ महिषीतस्यताराख्यासुतलाभायदेवताः॥ धारया
मासविधिवद्ब्राह्मणानप्यतर्पयत्॥७३॥ उपंशंभुपुरेशंभोर्गणःशीघ्रफलप्रदः॥ निकुंभइतिविख्यातःकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारः समवीर्यवान्॥७४॥तदा स्कृतविहीनायेते निकुंभस्य सेवया॥ अवापुरीप्सितानुऽत्रानचिरेण तपोध
नाः॥७५॥ताराजगाद कथितं दिवोदासं जनेश्वरं॥विज्ञाय तन्निकुंभस्य सामर्थ्यं पुत्रलाभ त्ता॥७६॥ता
रोवाच॥राजंस्तव प्रीतिकरः स्कृतोनास्तिजनाधिप॥ अतस्तदर्थं कर्त्तव्यं किंचिद्येनसुतोभवेत्॥७७॥
विनापुत्रेण भूपाल परलोको न शोभनः॥ उछिन्नसंततेराजन् पितरोधः पतंति च॥७८॥भवानेव विजा
नाति धर्मतत्वं विशेषतः॥७९॥दिवोदासउवाच॥किंविधेयं मयास्कृन्क्रनिरपत्येन संप्रति॥पुरानानाविधो
पायास्तदर्थं समनुष्ठिताः॥८०॥दैवमेव परं मन्ये पौरुषं तु निरर्थकं॥ कृतोपायोपियदहं नत्वि पुत्रं नलब्धवा
न्॥८१॥तारोवाच॥राजन्सत्यं ब्रवीषि त्वं पौरुषं तु निरर्थकं॥तथापि फलं कुर्वंति देवा अपि निरंतरं॥ ८२॥
दैवं पुरुषकारेण प्रसादयितुमर्हसि॥आस्ते निकुंभनामात्र देवोगव्यूतिदूरतः॥८३॥ धर्मसेव्योपधानेन
नानागणसमावृतः॥सतु संतानहीनेभ्यः संतानं संप्रयच्छति॥८४॥तत्पूजार्थं महाराज नत्वयाद्य मानुवा
सरं॥गंतुमिच्छामि विधिवत्पुरोहितपुरःसरा॥८५॥राजोवाच॥कांते यदि निकुंभाख्यः संतानफलसाधकः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गम्यतामन्वहंतत्रराज्ययोग्यसुतेच्छया॥८६॥भृगुरुवाच॥इत्थंतेनसमादिष्टातारातारेश्वराननां॥सु
रोहितंपुरस्कृत्यनिकुंभंप्रत्यपूजयत्॥८७॥एकंसंवत्सरंयावद्दानर्चस्कृतकाम्यया॥नसिद्धलक्षणंकिं
चिद्पश्यद्राजसुंदरी॥८८॥अथराजाब्रवीत्कालेतारांनिरजलोचनां॥संतानकामःसंभाष्यप्रसन्ने
नांतरात्मना॥८९॥दिवोदासउवाच॥तारेकमलपत्राक्षीपूजायैप्रतिवासरं॥निकुंभस्यव्रजसितत्सि
द्धःकिंतेमनोरथः॥९०॥तारोवाच॥संवत्सरस्तुसंपूर्णोनिकुंभाभ्यर्चयागतः॥तथापिराजन्संसिद्धेर्न
चिन्हमपिलक्षये॥९१॥अन्येषांतुनिकुंभोसौषड्भिर्मासैर्मनोरथं॥पूरयत्येवनियमात्त्किंदैवंततःपरं
॥९२॥भृगुरुवाच॥इतितारावचःश्रुत्वादिवोदासोमहीपतिः॥जानन्नपिजगत्तत्वंचुकोपभृशदुःखितः
॥९३॥उवाचचानुगान्कोपाद्विवृत्तारुणलोचनः॥निकुंभस्यालयंगत्वातूर्णंयंशकलशोद्धृतं॥९४॥अ
वलिप्तस्यपापस्यभदास्तन्माविलंब्यतां॥इत्याज्ञप्तास्तदातेनराज्ञाराजानुयायिनः॥९५॥निकुंभभ
वनंतूर्णंबभंजुर्मूलतःक्षणं॥निकुंभोथभृशंक्रुद्धःस्वप्नेप्रोवाचतंनृपं॥९६॥राजायस्मद्दुर्बुद्धेभाग्यहीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमद्यालयं ॥ भंत्काशीतो सितस्मा त्वं कां दिशी को द्रुतं भव ॥ ९७ ॥ इदं च भगवत्क्षेत्रं विद्रूषयसि दुर्म
ते ॥ ॥ तस्मादेवं जनैः शून्यं निःकिल्बिषमसंवृतं ॥ ९८ ॥ भवतु क्षितिधर्मज्ञ सहस्रपरिवत्सरान् ॥
अस्मिन्विश्वेश्वरक्षेत्रे कोपाकुलितचेतसां ॥ ९९ ॥ त्वद्विधानां न योग्योस्ति वासस्त्यज ततः पुरीं ॥ इत्यु
क्त्वा स निकुंभस्तु स्वस्थाने तस्थिवान्पुनः ॥ १०० ॥ राजा जागरितो दुःखी बभूव स्वमदर्शनात् ॥ अथ प्राप्त
स्तालजंघा हैहेयाश्वसहस्रशः ॥ १ ॥ आगत्य रुरुधुः काशीं दिवोदासं जिघांसवः ॥ ततो युद्धं समभवद्दि
वोदासस्य तैः सह ॥ २ ॥ शोणितोदकगंभीरं मांसशोणितकर्दमं ॥ अथ क्षीणबलस्तत्र दिवोदासो द्विजोत्त
माः ॥ ३ ॥ पूर्वां दिशं जगामाशु विहायसमरांगणं ॥ हैहेयास्तालजंघाश्च नगरीं निर्गृह्य क्षणात् ॥ ४ ॥ च
क्रुः काशीजनाः सर्वे गता भीता दिशो दश ॥ विद्राव्य तेपि देशं स्वं ययुः सिंहविनादिनः ॥ ५ ॥ गतेषु तेषु रा
जेंद्र दिवोदासोतिदुःखितः ॥ जगामावेदितुं दुःखं भरद्वाजाश्रमं प्रति ॥ ६ ॥ भरद्वाजस्तु तं दृष्ट्वा शोकव्या
कुलितेंद्रियं ॥ अपृच्छत्कुशलं राज्ये कोशे सैन्ये प्रजासु च ॥ ७ ॥ स तु तं दंडवन्नत्वा अश्रुक्लिन्नमुखांबुजः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथयामास तत्सर्वं निकुंभघर्षणादिकं ॥८॥ तदाकर्ण्य भरद्वाजः किंचिद्दीनमना इव॥ दिवोदासं जगादैवं
वचोभिः परिसांत्वयन्॥९॥ भरद्वाज उवाच॥ राजन्दुःखं मा कृथास्त्वं हि विद्वान्राज्यभ्रंशाद्युत्थितं तत्सहस्व
॥भवाद्दृशाश्चेन्नसहंते तु शोकं तदा प्रजानां जायते नाश एव॥१०॥ सुखाभावे दुःखरूपे भवेऽस्मिन्विवर्तमा
नस्य सुखं न वर्तते॥ अतो दुःखं सुखबुध्यानुभाव्यं देवं श्रेष्ठं जानता भूमिपाल॥११॥ स्वीयापराधाद्व्यसनं
यदाप्तं न तत्र दुःखं कर्तुमर्हस्यवश्यं॥ गणं शंभोस्त्वं परिभूय राजन्निकुंभं तं सुखमिच्छेः कथं नु॥१२॥ स्वभा
वतः शंकरराजधान्यां शंभोर्गणा एव निषेवणीयः॥ अपूजितास्ते वितरंति विघ्नांस्त्वं च स्वदर्पाद्भवनं तदीयं॥
॥१३॥ निपात्य शश्वन्निरुपद्रवत्त्वं शिवक्षेत्रे कामयसे नरेंद्र॥ ब्रह्मादीनामपि यज्ञः स्वभाजां दुःप्रापेयं काशि
का राजसिंह॥१४॥ तस्यां प्रतीमः कोपि जंतुः स्वधर्मात्तत्काले हि प्राप्नुयाद्ब्रह्मभावं॥ ब्रह्मैवैतन्निर्गुणं निर्वि
कारं निरंतरं क्षेत्ररूपेण नित्यं॥१५॥ तिष्ठत्येवं त्र्यंबकोप्यत्र नित्यं तद्रूपत्वात्सन्निहित एव वास्ते॥ विभूतिं
स्वां दर्शयिष्यन्नगरीयं क्षेत्राकारं प्रापतीर्थाकृतिं च॥१६॥ तत्त्वं क्षेत्रं मूत्रविट्पूरितेन सैन्ये नरुद्धां घ्रिपरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञसुखेन॥ निषेवितुं वांछसि भूमिपाल कथं भवेत्तु सम्मृद्धं तवेति॥१७॥ भृगुरुवाच॥ इति तेन द्विजेंद्रेण भरद्वा
जेन बोधितः॥ जहौ दुःखं दिवोदासः श्रुत्वा काशीमहिं नृपः॥१८॥ अथ काश्यनुभावज्ञस्त्यक्तहासकृतनिश्चयः
॥अब्रवीत्तं भरद्वाजं विनयेन प्रसादयन्॥१९॥ दिवोदास उवाच॥ भगवन्ननुभावोयं वाराणस्यामयाश्रु
तः॥ तेन मे तत्र उषितुं मनः प्रोत्सहते मुने॥२०॥ तत्त्वं वद विशेषण स्थिरस्थितिकरं विधिं॥ भरद्वाज उवाच
॥राजन्निर्कुंभवचनं नान्यथा संभविष्यति॥२१॥ समाः सहस्त्रादूर्ध्वं तु स्थातव्यं विधिवत्त्वया॥ रागद्वेषविही
नेन शिवपूजारतेन च॥२२॥ यथोक्तदेवयात्रादिविधाननिरतेन च॥ दिवोदास उवाच॥ कथं शिवार्चनं
कार्यं कथं तुष्यति शंकरः॥२३॥ कथयस्व मुनिश्रेष्ठ तद्विधातुमर्हयते॥ भरद्वाज उवाच॥ अभिषिंचेच्छिवं
हृत्स्थं संयमेनैव वारिणा॥२४॥ दद्याच्चंदनचूर्णेन अर्चयेत्स ततं सुधीः॥ सत्प्रसूनैः संपूज्य काशीवासेन धूप
येत्॥२५॥ ज्ञाननिराजनं दत्वा आत्मानं विनिवेदयेत्॥ इत्थं संपूजितः शंभुः प्रसीदति न संशयः॥२६॥ चिदा
नंदमयं स्थानं ददाति च निरंतरं॥ राजोवाच॥ करिष्येहं मुनिश्रेष्ठ शंकरस्य प्रपूजनं॥२७॥ सुभध्याने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नभवतःस्वस्यैवहितकाम्यया॥परंतुतालजंघैश्चहैहयैश्चविशेषतः॥२८॥कृतेनैवापकारेणदह्यतीव
मनोमम॥तथात्रकुरुविप्रेंद्रयथामेरिपवोखिलाः॥२९॥मत्पुत्रेणैवहन्यंतेकुमारेणबलीयसा॥भरद्वा
जउवाच॥अवश्यंभवतःकार्यंकरिष्यामिनृपोत्तमं॥३०॥संभारःक्रियतामत्रपुत्रेष्टिकरणायह॥भृ
गुरुवाच॥एवमुक्तेसतिनृपःपुत्रेष्टिपरिसाधकं॥३१॥संभारंकल्पयामासयथोक्तंतेनधीमता॥भरद्वा
जोपिपुत्रेष्टिंविदधेविधिवत्सुनः॥३२॥ततोभवत्तस्यपुत्रःप्रतर्दनइतिश्रुतः॥हैहयास्तालजंघाश्चते
नसर्वेपराजिताः॥३३॥इत्येतद्धोमयाख्यातंकाशीमाहात्म्यमुत्तमं॥किंभूयःश्रोतुकामाश्चवक्ष्यामित
त्संशयं॥१३४॥ ॥इतिश्रीपद्मपुराणेपातालखंडेकाशीमाहात्म्येचतुर्थोध्यायः॥४॥ ॥छ॥ ॥
मुनयऊचुः॥भगवन्सर्वमेवोक्तंकाशीमाहात्म्यमुत्तमं॥त्वयातत्रपरेणेहतेनतृप्ताःस्मसांप्रतं॥१॥
अतःपरंकथयनःप्रश्नांतरमनुत्तरं॥पश्चाद्वयंतत्रयत्वासाधयामःस्वकंहितं॥२॥भृगुरुवाच॥यत्पृ
ष्टोहंमुनिश्रेष्ठाःकथंसेव्येतिसापुरी॥वक्ष्यामितदहंतत्वंश्रूयतामवधानतः॥३॥विहायकाममर्थंचदंभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मात्सर्यमेवच॥धर्ममोक्षौपुरस्कृत्यनिषेवेतविभोःपुरीं॥४॥प्रतिग्रहपरावृत्तःशांतिदांतिसमन्वितः॥
शंकरध्याननिरतोनिषेवेतविभोःपुरीम्॥५॥अकुर्वन्कलुषंकर्मसमलोष्टाश्मकांचनः॥पंचाक्षरपरोनि
त्यंनिषेवेतविभोःपुरीम्॥६॥गृहीचेद्धर्मनिरतोबहिरर्जितवित्तभुक्॥व्यवहारोपयोग्यत्रगृहीत्वाविम
लंवसु॥७॥प्रियातिथिस्तीर्थपरोनिषेवेतविभोःपुरीम्॥स्वाध्यायाध्ययनेयुक्तोगुरुशुश्रूषणेरतः॥
॥८॥ब्रह्मचारीधर्मरतोनिषेवेतविभोःपुरीं॥कैःसेव्येतियत्प्रोक्तंतदहंप्रब्रवीमिवः॥९॥स्वस्वजात्यनु
सारेणयोधर्मोयस्यकल्पितः॥तत्तत्धर्मरतैरेवसेव्यावाराणसीपुरी॥१०॥अन्यैःसंसेव्यमानासा
कीकटान्नातिरिच्यते॥अतोधर्मपरैरेवरागद्वेषविवर्जितैः॥११॥निर्वाणमेवकांक्षद्भिःशंकरोपास्ति
तत्परैः॥श्रयणीयामुनिश्रेष्ठास्तेषांसाक्षाद्धिमुक्तिदा॥१२॥द्वैपायनोपिदेवेनशंकरेणद्विजोत्तमाः॥द्वे
षाकुलतयाकाश्याबहिरेवपुराकृतः॥१३॥मुनयऊचुः॥द्वैपायनेनकोद्वेषःकृतःकुत्रचतत्त्ववित्॥व
दैतत्सकलंब्रह्मन्नतत्रनःसंशयःपरः॥१४॥भृगुरुवाच॥आस्तेसत्यवतीसूनुर्वासुदेवकलामयः॥

CC-0. In Public Domain. Digitization by eGangotri

सतुशिष्यवृतः काशींजगामसुनिसत्तमः ॥१५॥ सगत्वातत्रसंवर्तमपश्यत्तपसांनिधिं ॥ ध्यायंतंगिरिजा
नाथंशंकरंकरुणाकरं ॥१६॥ तस्याश्रमसमीपेसस्थितवान् शिष्यसंवृतः ॥ अध्यापयामासचतान्शि
ष्यान्वेदार्थतत्वदित् ॥१७॥ तंचकोलाहलंमत्वासंवर्त्तोध्यानमत्यजत् ॥ त्यक्तध्यानततोऽपश्यद्व्यासं
व्याख्यानतत्परं ॥१८॥ जानन्नपिचसंवर्त्तः पृष्टवान्कोभवानिति ॥ कुतः समागतः काश्यांकियान्का
लस्तवाभवत् ॥१९॥ एवंजिज्ञासितस्तस्यव्यासोनोत्तरमब्रवीत् ॥ अथजैमिनिरत्यर्थंरुवाचप्रहस
न्निव ॥२०॥ जैमिनिरुवाच ॥ अहोचित्रमिदंब्रह्मन्यत्वंसत्यवतीसुतं ॥ वेदव्यासंनजानीषेवर्तमानो
जगत्त्रये ॥२१॥ अयंनारायणः साक्षाद्विद्यानिधिरनर्घ्यवाक् ॥ द्वैपायनःशिष्ययुतोनैमिषारण्यतोमुने ॥२२
॥ अधुनैवागतः काश्यांप्रसंगान्नतुगौरवात् ॥ यत्रचायंमुनिस्तिष्ठेत्तत्रतीर्थानिसर्वशः ॥२३॥ धर्मव्य
वस्थानानिनःस्वाध्यायप्रविभागकृत् ॥ भृगुरुवाच ॥ इतिजैमिनिनाप्रोक्तंसमाकर्ण्यमुनीश्वराः ॥२४॥
संवर्त्तः प्रहसन्श्लक्ष्णंबभाषेजैमिनिंमुनिं ॥ जैमिनेत्वंनवाच्योसिक्रूरंकाशीगतेनमे ॥२५॥ ब्रवीतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवान्व्यासोवचोधर्मसमन्वितं॥जानाम्यहंमहाभागंकृष्णद्वैपायनंमुनिं॥२६॥तथापिनास्ययुक्तं
हिधर्मबाधनचेष्टितं॥अथव्यासोब्रवीत्स्मित्वासंवर्तंप्रतिसादरं॥२७॥श्रावयिष्यन्विशेषेणशिष्या
न्काशीकथांपरां॥व्यासउवाच॥किंमयानुष्ठितंब्रह्मन्धर्मबाधनचेष्टितं॥२८॥तत्त्वंकथयसंवर्त्तधर्मे
मुह्यतिपद्मभूः॥संवर्तउवाच॥द्वैपायनमुनिश्रेष्ठकाशीयंशांकरीपुरी॥२९॥तीर्थानामुत्तमातद्वत्क्षेत्रा
णामपिचोत्तमा॥अस्याःसंदर्शनंव्याससर्वपातकघातकं॥३०॥अस्यांनिवासोनिर्वाणंसाधयत्यंजसा
मुने॥अनेकजन्मसाहस्रैर्यत्तपःफलमर्ज्यते॥३१॥ततोप्यधिकमेवात्रत्रिरात्रोपोषणाद्भवेत्॥अत्र
क्षेत्रांतरेव्यासम्रियमाणस्यकर्मिणः॥३२॥तारकंकथयत्येवब्रह्मात्मैक्यप्रकाशितं॥कोटिजन्मसुसं
त्तेननिर्वाणप्रापकैःपरैः॥३३॥अनुष्ठितैरपिमुनेनिर्वाणंलभ्यतेनवा॥अत्रक्षेत्रेत्यजन्प्राणान्प्राप्नो
त्येवपरांगतिं॥३४॥एवंभूतंपरंक्षेत्रंप्राप्यशिष्यगणैःसह॥चक्रपुष्करिणीतोयेजान्हवीजलसंयुते॥३५
॥स्नात्वानाभ्यर्चितःशंभुर्देवदेवःसनातनः॥द्वैपायनेदंभवतोधर्मबाधनचेष्टितं॥३६॥तस्माद्गच्छय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावत्वंकुरुतीर्थविधिंपरं॥ ज्ञानीषेधर्मतत्वज्ञततोनाहंवदामितत्॥३७॥ भृगुरुवाच॥ संवर्तैनैवमु
क्तस्तु व्यासः शिष्यगणावृतः॥ तीर्थावगाहंविधिवच्चकारविधितत्ववित्॥३८॥ विश्वेश्वरंसमभ्यर्च्य
गौरीविघ्नविनायकं॥ निर्वाणमंडपेतस्थौ चिह्नापीमभिवादयन्॥३९॥ रुद्रसूक्तानिसर्वाणिजजापश्रु
तिपारगः॥ एवंस्थितस्यव्यासस्यसत्वजिज्ञासयाप्रभुः॥४०॥ बीभत्संकुत्सितंवेषंसमास्थायमहेश्व
रः॥ अगच्छन्मुनिदृष्टेषुउपवेष्टुंचवीतभीः॥४१॥ अभिसत्यवतीसूनुंनिविष्टोपियपोमुहुः॥ अथपारा
शरोव्यासोद्वेषक्रोधसमाकुलः॥४२॥ शप्तुमेवमनश्चक्रेततःसोंतरधीयत॥ प्रादुरासीद्धुराधर्षःशंकरोलोक
शंकरः॥४३॥ अकलंकशरत्पूर्णशशांकायुतसप्रभः॥ सोमसूर्याग्निनयनोदशबाहुशशांकभृत्॥
॥४४॥ गौरीपरीरब्धतनुर्नानायुधसमुज्वलः॥ तंदृष्ट्वातेमुनिगणाद्वैपायनपुरोगमाः॥४५॥ प्रणम्यवि
धिवद्देवमस्तुवन्विविधैस्तवैः॥ अथोवाचमहादेवोव्यासंकुप्यन्निवप्रभुः॥४६॥ द्वैपायनबहिर्याहि
नात्रस्थेयंमनागपि॥ रागद्वेषान्नचित्तानांनिवासायनमेपुरी॥४७॥ अवैमित्वांमहाबुद्धेमदेकशरणंमुने॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अंभोब्रवीमि मक्षेत्रान्नातिदूरेव्यवस्थितः॥४८॥ मामाराधयनिःकामः सततंमत्परायणः॥ततोरागा

दिनिर्मुक्तोमत्पुरेस्थास्यसिध्रुवं॥४९॥एवमुक्तोभगवताव्यासोंतेवासिभिःसह॥पालयन्शंकरस्या
ज्ञांबहिरेवावतिष्ठते॥५०॥ इत्येतद्वोमयाख्यातंयत्पृष्टोहंमुनीश्वराः॥तस्माद्रागादिहीनैःसासेव्या
मुख्याधिकारिभिः॥५१॥परिमाणंचवक्ष्यामितन्निबोधतसत्तमाः॥मध्यमेश्वरमारभ्ययावद्देहलिवि
घ्नपे॥५२॥सूत्रंस्थाप्यचतुर्दिक्षुभ्रामयेन्मंडलाकृतिः॥तत्रयाजायतेरेखातन्मध्येक्षेत्रमुत्तमं॥५३॥
काशीतिचविदुर्वेदास्तत्रमुक्तिःप्रतिष्ठिता॥काश्यंतःपरमंक्षेत्रंविशेषफलसाधनं॥५४॥वाराणसीति
यत्ख्यातंतन्मानंनिगदामिवः॥दक्षिणोत्तरयोर्नद्योवरणासिश्चपूर्वतः॥५५॥जान्हवीपश्चिमेचा
पिपाशपाणिर्विनायकः॥अस्याअंतःस्थितंदिव्यंविशेषफलसाधनं॥५६॥अविमुक्तमितिख्यातं
तन्मानंचब्रवीमिवः॥विश्वेश्वराच्चतुर्दिक्षुधनुःशतमुगोन्मितं॥५७॥अविमुक्ताभिधंक्षेत्रंमुक्ति
स्तत्रनसंशयः॥गोकर्णेशःपश्चिमेपूर्वतश्चगंगामध्यश्चोत्तरेभारभूत॥५८॥ब्रह्मेशानोदक्षिणेसंप्रदि

CC-0. In Public Domain. Digitization by eGangotri

एतत्तु प्रोक्तं भवनं विश्वभर्त्तुः ॥ मुनय ऊचुः ॥ भगवन्भवता प्रोक्तं क्षेत्रं शंभोश्चतुर्विधं ॥ ५९ ॥ किं किं फलं
लभेद्ब्रह्मन्तत्र तत्र मृतो जनः ॥ भृगुरुवाच ॥ चतुर्विधेपि क्षेत्रेस्मिन्नमी तो गर्भयातनां ॥ ६० ॥ नैवाप्नोति
मुनिश्रेष्ठा विशेषो यं परः स्मृतः ॥ काश्यां मृतस्तु सालोक्यं साक्षात्प्राप्नोति सत्तमाः ॥ ६१ ॥ ततः सरूपतां या
ति ततः सान्निध्यमश्नुते ॥ ६२ ॥ ततो ब्रह्मैकतां याति न परावर्त्तते पुनः ॥ वाराणस्यां मृतो जंतुः साक्षात्सारू
प्यमश्नुते ॥ ६३ ॥ ततः सान्निध्यमायाति ततो ब्रह्मैकतामियात् ॥ अविमुक्ते विपन्नस्तु साक्षात्सान्निध्य
माप्नुयात् ॥ ६४ ॥ ततश्चिदानंदमये ब्रह्मण्येव विलीयते ॥ स लोकतां स्वरूपत्वं सान्निध्यं चापि सत्तमाः
॥ ६५ ॥ कल्पं कल्पमवाप्नोति ततो ब्रह्मात्मको भवेत् ॥ मुनय ऊचुः ॥ सर्ववेदार्थतत्त्वज्ञ त्वदुक्तं भावितं हि
नः ॥ ६६ ॥ अतः परमिदं ब्रूहि ज्ञानाविर्भावनिश्चयं ॥ भृगुरुवाच ॥ चतुर्धा भाविते क्षेत्रे सर्वत्र भगवां छि
वः ॥ ६७ ॥ व्याचष्टे तारकं वाक्यं ब्रह्मैक्यप्रतिबोधिकं ॥ तथापि तत्र सामर्थ्यात्तत्र तत्र मृतस्य ह ॥ ६८ ॥
भोगपूर्वापवर्गाप्तिर्जीवन्मुक्तदशी वसा ॥ अंतर्गेह विपन्नस्तु साक्षात्कैवल्यमाप्नुयात् ॥ ६९ ॥ उपायं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चात्र वत्स्यामि येनोपायेन लभ्यते॥ जन्मांतरसहस्रैस्तु विहितैर्धर्मकर्मभिः॥ ७०॥ महादेवार्पितैः
साहि प्राप्या वैश्वेश्वरी पुरी॥ शंभोरनुग्रहाद्देव शंकराराधने स्थि तान्॥ ७१॥ तत्सेवैव प्राप्यते विप्रान
स्यैः साधनकोटिभिः॥ रहस्यमिह वक्ष्यामि तच्छृणुध्वं द्विजोत्तमाः॥ ७२॥ नैतत्क्षेत्रसमं किंचित्त्रिषु लो
केषु विद्यते॥ अधिकं वा मुनिश्रेष्ठाः सत्यमेव ब्रवीमि वः॥ ७३॥ तिष्ठेदत्र स्वधर्मेण देहपातपरीक्षया॥
पातकं नैव कुर्वीत कथंचिदपि लेपकृत्॥ ७४॥ प्रमादकृतलोपाय प्रतिभूतं विभोर्गृहं॥ कुर्यात्तदसी
र्णं नित्यं तत्कल्मषजिहीर्षया॥ ७५॥ अयनद्वितये कुर्याद्वाराणस्याः प्रदक्षिणं॥ प्रतिसंवत्सरं चापि का
शीमध्यमितश्चरेत्॥ ७६॥ त्रिचतुर्दशलिंगानां भूते पूजापरो भवेत्॥ चतुर्दशानामपि च शिवभूते च
को भवेत्॥ ७७॥ रुद्रसूक्तं जपेन्नित्यं रुद्रमंत्रं च शीलयेत्॥ प्राणमंत्रं रुद्ररूपं भावयेद्धि जितेंद्रियः॥
॥ ७८॥ विरक्तः कामनाहीनो द्वेषदंभादिवर्जितः॥ निवसेत्सततं काश्यामेवं ब्रह्मैव पश्यति॥ ७९॥
॥ किमत्र चित्रं विप्रेन्द्राः काश्यां मुक्तिसमागमे॥ भागीरथीविमिश्रायां तीर्थसामर्थ्यसंसदि॥ ८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केवलाजान्हवीविप्राज्ञानाज्ञानाथवापुनः॥ अपवर्गेविनरतिस्वतोयत्यक्तदेहिनः॥८१॥ यस्यकस्यापिवाजं
तोर्भागीरथ्यांगतायुषः॥ नदुर्लभोब्रह्मभावस्तत्संगक्ष्पितांहसः॥ ८२॥चिदानंदमयंब्रह्मगंगाभावमुपा
गतम्॥ ब्रवीमिसत्यमेवैतत्मात्रवःसंशयोभवेत्॥८३॥ इयंसोमोद्भवापुण्यासरितोन्याश्चयाभुवि॥ताः
सर्वाजान्हवीतीरस्याप्नुताएववाविकाः॥८४॥रत्नाकरोपिमुनिनाशोषितःकुंभयोनिना॥भागीरथीजलै
रेवपूर्णकल्लोलमाल्यभृत्॥८५॥एवंप्रभावानिर्वाणतोयराशिमहानदी॥भागीरथीविलसतिक्षेत्रेशंभो
र्विमुक्तिदे॥८६॥एकैकमपिविप्रेंद्रासाक्षाद्ब्रह्माप्तिसाधनं॥ नचित्रमत्रहितयंयन्निर्वाणायकल्पते॥८७
॥कीकटेपिम्रमीतस्यपापकर्मरतस्यच॥यद्यस्थिखंडंगंगायांनिपतेद्दैवयोगतः॥८८॥तदासक्षीण
पापःसन्दिव्यभोगसमन्वितः॥षष्टिवर्षसहस्राणिस्वर्गलोकेमहियते॥८९॥ईदृशीस्वर्णदीयत्रसर्वेती
र्थसमन्विता॥तांकाशींकोनसेवेतभीमसंसारमुक्तये॥९०॥ इत्येतद्धोमयाख्यातंकाशीमाहात्म्यमुत्तमं॥
यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते॥९१॥सूतउवाच॥शौनकैवंभगवताभृगुणाभृगुसूनुना॥शंभोःसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रस्य महिमा प्रोक्तः सर्वहितेच्छया ॥९२॥ एतस्य श्रवणादेव पापसंघातपंजरं ॥ सद्यो विलयमायाति तूलम
व्याविबाहितं ॥९३॥ श्रोतव्यमनसूयद्भिः पठनीयं प्रयत्नतः ॥ एनसां विप्रणाशाय प्रीतये पार्वतीपतेः ॥९४॥
एतदेव परं तत्त्वमेतदेव परं तपः ॥ ॥ इति मत्वा प्रयत्नेन जपेदि—दमनन्यधीः ॥९५॥ एतज्जपेन संतु
ष्टो महादेवः सनातनः ॥ दद्यादभीप्सितानर्थान्नात्र कार्या विचारणा ॥९६॥ अष्टोत्तरशतं मार्द्दलिंगानि परिपू
ज्य च ॥ माहात्म्यं शृणुयात्काश्याः प्रत्यहं नियमान्वितः ॥९७॥ तस्य संवत्सरेणास्यात्सुत्रः शीलगुणान्वितः
॥ दीर्घायुरतिलक्ष्मीवान् शिवाराधनतत्परः ॥९८॥ ॥ इति श्रीपद्मपुराणे पातालखंडे काशीमाहात्म्ये
भृगुमुनींद्रसंवादे पंचमोध्यायः समाप्तः ॥५॥ वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ॥ काशीसंस्कृतमुद्रायां
मंकितोयं शिलाक्षरैः ॥१॥ श्रीकाशीजीमे ज्ञानवापीके पूर्वफाटकपर श्रीविश्वनाथजीके पास महाराज शिवला
लदुबेजी इनके मकानमे काशीसंस्कृतमुद्रायंत्रमे छपी जिनकोलेना होयउन्होने इसछापेखानेके कार्यसंपाद
क श्रीसुत् बाबू वाराणसीप्रसाद याकचौरीगली मे भाईप्रतापसिंहजीके दुकानमे मिलेगी ॥ सं॰१९३१ मार्गकृष्ण ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रीकाशीमाहात्म्यंसमाप्तिमगमत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४२७७ लेखकः— महीदासः (ब्राह्मणः)

॥ अथचरणव्यूहव्याख्याप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीगणेशायनमः॥अथातश्चरणव्यूहं व्याख्यास्यामस्तत्र यदुक्तं चातुर्वेद्यं चत्वारोवेदाविज्ञाताभव
न्ति तत्रऋग्वेदोयजुर्वेदः सामवेदोथर्ववेदश्चेति तत्रऋग्वेदस्याष्टभेदाभवन्ति चर्चाश्रावकश्चर्चकः श्रवणी
यपारः क्रमपारः क्रमपदः क्रमजटः क्रमदंडश्चेति चतुष्पारायणमेतेषां शाखाः पञ्चभवंत्याश्वलायनी शांखा
यनी शाकलाबाष्कलामांडूकाश्चेति तेषामध्ययनमध्यायाश्चतुःषष्टिर्मण्डलानि दशैव तु॥वर्गाणांपरि
संख्यानंद्वेसहस्रेषडुत्तरे॥२००६ सहस्रमेकंसूक्तानांनिर्विशंकंविकल्पितम्॥दशसप्तसुपठ्यन्ते संख्या
तंवैपदक्रमम्॥एकशतसहस्रंवाद्वित्रिपंचाशत्सहस्रार्द्धमेतानि चतुर्दशवासिष्ठानामितरेषांपञ्चाशी
तिः क्रमकालेतुवेष्टव्यं चतुस्त्रिंशत्सहस्राणितुद्विखंडानांसहस्राणां द्वात्रिंशत्षोडशोत्तरा॥चत्वारिं
शत्सहस्राणि द्वात्रिंशत्त्वाक्षरसहस्राणिऋचांदशसहस्राणि ऋचांपञ्चशतानिच॥१०५८०॥ऋचा
मशीतिपादश्चैतत्पारायणमुच्यते॥एकर्चेएकवर्गश्चएकश्चनवकस्तथा॥द्वौवर्गौतुहृचांज्ञेयौ ऋक्त्रय
स्यशतंस्मृतम्॥१००० चतुर्ऋचांपंचसप्तसप्तधिकञ्चशतंतथा॥१७५ पंचर्चे ५ चद्विशद्युक्तंसहस्रंरुद्रसंयु
तम्॥१२११० पंचचत्वार्यधिकंतुषड्चांचशतत्रयम्॥३४५॥सप्तर्चस्यशतंज्ञेयंविंशतिश्चाधिकास्मृता
१२०॥अष्टऋचांतुपंचाशत्त्व्चाधिकंतथैवच ५५ दशाधिकद्विसहस्रपञ्चशाखासुनिश्चिता॥वर्गाःसं
ज्ञानसूक्तस्यचत्वारश्चात्रमीलिताः॥एवंपारायणेप्रोक्ताऋचांसंख्यास्त्रन्यूनतः १७० मित्येकास्स्रंग्रस्तनाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिंदुकलात्मकम् ॥ त्रिदेवत्वं त्रिमात्रञ्च स्फुरद्विष्णुं सनातनम् ॥ तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ॥ वंदे नारायणं देवं निरवद्यं निरंजनम् ॥ कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ॥ येन चरणव्यूहेषु शाखावेदमितं कृतम् ॥ तच्छिष्यं शौनकं गुरुं वेदज्ञं लोकविश्रुतम् ॥ नत्वा तु शाकलाचार्यं तथैवं चाश्वलायनम् ॥ एवं परंपराप्राप्तं बालकृष्णं महागुरुम् ॥ यस्य प्रसादाद्व्याख्यामि चरणव्यूहसंज्ञकम् ॥ अथातश्चरणव्यूहं व्याख्यास्यामः ॥ अथशब्दो मंगलप्रस्तावे च ॥ अथशब्दः पूर्वमेव मंगलार्थ इत्यर्थः ॥ अतः हेत्वर्थः ॥ चरणव्यूहः ॥ वेदराशेश्चतुर्विभागात् चरण उच्यते ॥ तस्य व्यूहः समुदायः ॥ चतुर्वेदानां समुदायस्तं व्याख्यास्याम इत्यर्थः ॥ कथमेकवेदः ॥ तदुक्तमारण्यके ॥ सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राणऋच इत्येवं विद्यादिति ॥ तस्य चतुर्विभागाः कृताः ॥ तथा चोक्तं भागवते दशमस्कंधे षष्ठाध्याये ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैः प्रभुः ॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविचक्षणः ॥ पुत्रानध्यापयामास ब्रह्मर्षीन् ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ते परंपरया वाप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ क्षीणायुः क्षीणसत्त्वश्च दुर्मेधावीक्ष्य कालतः ॥ वेदान् ब्रह्मर्षयो व्यस्तान् हृदिस्थाच्युतनोदिताः ॥ अस्मिन्नप्यन्तरे ब्रह्मन् स्वर्गत्वाल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ऋगथर्वयजुःसाम्नो राशीरुद्धृत्य वर्गशः ॥ चतस्रः संहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च॰ व्यू॰ २ ताश्चक्रे सूत्रे मणिगणा इव॥ मन्त्रं मणिगणाद्वेति पाठान्तरम्॥ तासां स चतुरः शिष्यानुपहूय महामतिः॥ एकै
कसंहितां ब्रह्मन्नेकैकस्मै ददौ विभुः॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह॥ वैशंपायनसंज्ञाय निगदाख्य
यजुर्गणम्॥ साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्॥ अथर्वांगिरसो नाम स्वशिष्याय सुमंतवे इति॥ पैलः स्व
संहितामूचे इन्द्रप्रमितये मुनिः॥ बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकाम्॥ चतुर्धा व्यस्य त्राध्याय याज्ञ
वल्क्याय भार्गवे॥ पाराशरायाग्निमित्राय इन्द्रप्रमितिरात्मवान्॥ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं॥ त
च्छिष्यो देवमित्रश्च सौभर्यादिभ्य ऊचिवान्॥ इन्द्रप्रमितिसुतो मांडूकेयः॥ मांडूकेयसुतः शाकल्यः॥ शाकल्यशि
ष्यो देवमित्रः॥ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहिताम्॥ वात्स्यमुद्गलशालीयगोखल्यः शिशिरेष्वधात्॥ जा
तूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम्॥ बलाकपैंग्यवैतालविरजेभ्यो ददौ मुनिः॥ बाष्कलिः प्रतिशाखाभ्यो वा
लखिल्याख्यसंहिताम्॥ चक्रे बालायनिर्भज्यकाशीरश्चैव तां दधुः॥ बह्वृचः संहिता ह्येता एते ब्रह्मर्षिभिर्धृताः
॥ श्रुत्वैवं छन्दसां व्यासं सर्वपापैः प्रमुच्यत इति॥ अस्यार्थः॥ व्यासात्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा
इन्द्रप्रमितये ददौ॥ इन्द्रप्रमितिः चतुर्धा जटान्तं व्यासं कृत्वा बाष्कलादि आग्निमित्रान्त षट्शिष्येभ्यः स्वसुतमांडू
केयाय ददौ॥ शाकल्यः संहितापदक्रमजटादंडरूपं च पंचधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोखल्यशिशि राम २
रेभ्यः ददौ॥ इतिपदेषु संहितात्व इति करणवेष्टनं उदात्तस्वरितस्वराणां सिद्धिः॥ एतच्छन्दसां व्यासविस्तारं श्रुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपापैः प्रमुच्यत इत्यर्थः॥ तथा च विष्णुपुराणे॥ ब्रह्मणा चोदितो व्यासो वेदान्व्यस्तुं प्रचक्रमे॥ अथ शिष्यान्स
जग्राह चतुरो वेदपारगान्॥ ऋग्वेदश्रावकं पैलं संजग्राह महामतिः॥ वैशंपायननामानं यजुर्वेदस्य चाग्रहीत
॥ जैमिनिं सामवेदस्य तथैवाथर्ववेदवित्॥ सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः॥ तथा च गृह्यसूत्र
म्॥ सुमन्तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या इति॥ जानन्तिबाहविइत्यारभ्य मां
डूकेया इत्यंतं मांडूकगणसमुदायः॥ गर्गीवाचक्नवीत्यारभ्य शांखायनमित्यन्तेन शांखायनगणः॥ एतेषां कौ
षीतकि ब्राह्मणं आरण्यकं च॥ ऐतरेय इत्यारभ्य आश्वलायनांता आश्वलायनगणः॥ एतेषां ऐतरेयब्राह्मणं
आरण्यकं आश्वलायनसूत्रमित्यर्थः॥ ॥ तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवंति॥ अस्मिन्नर्थे यदु
क्तं चातुर्वेद्येनेन चत्वारो वेदा विज्ञाता भवन्ति॥ ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति॥ इति स्पष्टार्थः॥ वेदा
हि यज्ञार्थमभिप्रवृत्ताः॥ तथा च विष्णुपुराणम्॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः॥ ततो दशगुणः
कृत्स्नो यज्ञोयं सर्वकामधुक्॥ अत्रान्तरे मुतो व्यास अष्टाविंशतिमन्तरे॥ वेदमेकं चतुष्पादं चतुर्धा व्यभज
त्प्रभुरिति॥ अस्यार्थः॥ आद्यो वेदः वेदविभागात्पूर्वकालीनो वेदश्चतुष्पादः ऋगादिचतुष्टयसमूहरूपः॥
शतसाहस्रसंमितः॥ दश दश शतच्छंदं दशशतानि तत्साहस्रं तत्सर्वमित्यादिश्रुतेः॥ अनन्तसंख्याकः॥ अन
न्ता वै वेदा इति श्रुतेः॥ ततो वेदात्प्रवृत्तः कृत्स्नो यं दशगुणः॥ दशविधः॥ स एष यज्ञः पंचविधोग्निहोत्रं दर्शपूर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मासौचातुर्मास्यानिपशुःसोमइतिश्रुतेः॥तथाचपंचवाएतेमहायज्ञाइत्युपक्रम्य॥ब्रह्मयज्ञोदेवयज्ञः
पितृयज्ञोभूतयज्ञोमनुष्ययज्ञइतिश्रुतेश्च॥वैतानिकागार्ह्याश्चदशयज्ञाः॥अत्रान्तरेवैवस्वतमन्वन्तरेअ
ष्टाविंशतिमेद्वापरइतिशेषः॥मत्सुतोव्यासःकृष्णद्वैपायनश्चतुर्धाव्यभजत्॥ऋग्वेदादिरूपेणचतुर्धाविभक्त
वान्॥पाकयज्ञास्त्रिविधाःअत्रगृह्यम्॥हुताअग्नौहूयमानाअनग्नौप्रहुताब्राह्मणभोजनेब्रह्मणिहुता
इति॥अत्रवृत्तिकृत्॥हुताअग्नौहुताः अग्नौहूयमानाःहविष्यस्यजुहुयादित्येवमादयोहुताः॥अनग्नौक्रि
यमाणाःअथबलिहरणमित्येवमादयःप्रहुताः॥ब्राह्मणभोजनंयत्रास्तिब्राह्मणान्भोजयित्वेतिब्रह्मणिहु
ताःइति॥नित्याभ्यासोब्रह्मयज्ञःपारायणंच॥अत्रगृह्यसूत्रम्॥ब्रह्मयज्ञखण्डः॥यदृचोधीतेपयआहुतिभि
रेवतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यद्ब्राह्म
णानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोधीते पयसः कुल्या अस्यपितॄन्स्व
धाउपक्षरन्तीति॥तत्रऋग्वेदस्याष्टभेदाभवन्ति॥स्थानानिभवन्तीतिपाठान्तरम्॥शाकल्यवाष्कलो ऐतरे
यब्राह्मणावारण्यकौ॥ शांखायनमांडूकौकौषीतकीयब्राह्मणारण्यकावित्यष्टभेदाः॥अन्योवेदाविकृतिशा
खाश्चभेदस्तुत्रिविधस्तथा॥पृथक्नानाभिधानेनव्यासेनकथितंपुराइति॥अत्राष्टभेदेनाष्टौस्थानेनवा
विकृतिर्ग्राह्या॥विकृतिस्तुअन्तेवक्ष्यामः॥तस्माद्ब्रह्मयज्ञार्थंपारायणार्थंच ऋग्वेदस्याध्ययनंकर्तव्यम्॥

CC-0. In Public Domain. Digitization by eGangotri

ततश्चतुष्पदेनवक्ष्यतिचर्चाश्रावकश्चर्चकःश्रवणीयपारइति॥चर्चाध्ययनम्॥तत्रऔणसूत्रे॥चिन्तिपू
जिकथिकुंभिचर्चश्च॥एभ्योअङ्स्त्रियाभावादौ॥चितिस्मृत्याम्॥पूजिपूजायाम्॥कथवाक्यप्रबन्धे॥
कुम्बिआच्छादने॥चर्चाध्ययने॥चुरादयइति॥अष्टाध्यायसूत्रे॥ताल्वोष्ठपुटव्यापारेणशब्दस्यश्रव
णंक्रियतेसाचर्चा॥तदध्ययनस्यश्रावकोगुरुः॥तस्यचर्चकःशिष्यः॥श्रवणीयपारःश्रवणीयोवेदःत
स्यपारःसमाप्तिः॥इतिचतुष्पदेनअध्ययनंसूचितम्॥अग्रेचतुष्पदेनचत्वारिपारायणानिसूचयति॥त
त्पारायणंद्विविधम्॥प्रकृतिविकृतिरूपम्॥काप्रकृतिःकाविकृतिः॥प्रकृतिःसंहिता॥साद्विविधा॥रू
ढायोगरूढायथा॥अग्निमीळेपुरोहितमिति॥योगायथा॥अग्निमीळे॥ईळेपुरोहितमितिप्रातिशा
ख्येद्वितीयपटलेभाष्यकारेणव्याख्यातम्॥अथचतुष्पारायणंयथा॥क्रमपारःक्रमपदःक्रमजटःक्र
मदंडश्चेतिचतुष्पारायणम्॥क्रमशब्दउभयसंहितावाच्यः॥सकथम्॥अनुलोमविलोमाभ्यांत्रिवार
हिपेठक्रमम्॥विलोमपदवत्संधिरनुलोमेयथाक्रमम्॥यथाक्रमंयथासंहिताइत्यर्थः॥अन्यच्च॥वर्णक्र
मःअक्षरसमाम्नायएवेत्यारण्यके॥कथमभिष्टुयादित्यक्षरशाः॥चतुरक्षरशाः॥पक्षाः॥अर्धर्चशाः॥ऋ
क्शाः॥इतिब्राह्मणम्॥भूयांसितुसमाम्नानाह्यजनमात्रन्तुतत्स्याभिधानस्यभवतीतिनैरुक्ताः॥क्रमः
संहितावाचिकथम्॥पदप्रकृतिःसंहिताइतिनैरुक्तवचनात्॥साक्रमरूपाइत्यर्थः॥क्रमपदःक्रमःसंहि

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तानस्याः पदानि ॥ इतिद्वे प्रकृतिपारायणे द्वे विकृतिरूपे ॥ विकृतिरष्टविधा भवति ॥ तच्च ॥ जटा माला शिखा लेखा ध्वजो दंडो रथो घनः ॥ अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिरिति ॥ आसां मध्ये जटादंडयोः प्राधान्यम् ॥ तत्कथम् ॥ जटानुसारिणी शिखा ॥ दंडानुसारिणी माला ॥ लेखा ध्वजो रथश्च ॥ घनस्तु उभयानुसारित्वात् ॥ अस्याः नियमवाक्यानि व्यालीकृत जटापटले उदाहरणानि च ॥ तत्र जटावाक्यम् ॥ क्रमे यथोक्तं पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ॥ अभ्यस्य पूर्वञ्च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥ अस्यार्थः ॥ क्रमे यथोक्ते सति क्रमोद्वाभ्यामित्याद्युक्ते क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विरभ्यसेत् ॥ द्विवारं पठेत् ॥ अभ्यासप्रकारः ॥ उत्तरमेव पूर्वम् ॥ क्रमवत् पदद्वयं गृहीत्वा पूर्वं नाम प्रथमं उत्तरपदमभ्यसेत् ॥ ततः उत्तरपूर्वपदयोः संधानद्वारा पूर्वं २ द्विरभ्यस्योत्तरपदे अवसानं एवं प्रकारेण अध्ययनं जटाऽभिधीयते कथ्यते ॥ हीति निश्चयार्थम् ॥ उदाहरणे नेदृश्यते ॥ अग्निमीले ईले ग्निमग्निमीले ॥ ईले पुरोहितं पुरोहितं पुरोहितमीलई ले पुरोहितमित्यादिज्ञेयम् ॥ अथ दण्डलक्षणम् ॥ क्रमव्युत्क्रमविपर्यस्य पुनश्च क्रममुत्तरम् ॥ अर्धर्चादेवमुक्तो क्तः क्रमदंडोभिधीयते ॥ उदाहरणम् ॥ अग्निमीले । ईले ग्निं ॥ अग्निमीले ईले पुरोहितम् ॥ पुरोहितमीले ग्निमित्यादिज्ञेयम् ॥ अथ मालालक्षणम् ॥ त्रयाक्रमविपर्यासावर्धर्चे स्यादितोततः ॥ अन्ते चादिनये देवं क्रममाले निगीयते ॥ मालामालेव पुष्पाणां पदानां ग्रन्थिरीहिता ॥ आवर्तते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ॥ अथ शिखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणम्॥पदोत्तरंजटामेवशिखामार्याःप्रचक्षते॥अथलेखालक्षणम्॥ ॥क्रमाद्द्वित्रिचतुःपंचपदक्रम
मुदाहरेत्॥पृथक्पृथक्विपर्यस्यलेखामाहुःपुनःक्रमात्॥ ॥अथध्वजलक्षणम्॥ब्रूयादादेःक्रमंसम्य
ग् नादुत्तारयेद्यदि॥वर्गोवाऋचिवायत्रपठनंसध्वजःस्मृतः ६ अथरथलक्षणम्॥पादशोर्धर्चशोवापिस
होत्तयादंडवद्रथः ७ अथघनलक्षणम्॥जटामुक्त्वाविपर्यस्यघनमाहुर्मनीषिणः ८ अन्यच्च॥जटाशिखा
घनःप्रोक्ताक्रमपूर्वामनीषिभिः ९ इतिविकृतिलक्षणान्युक्तानिअध्ययने॥संहितापारायणम्॥पदपारा
यणम्॥जटापारायणम्॥क्रमदंडपारायणंच॥चतुष्पारायणमित्यर्थः॥एतेषांशाखाःपंचभवंति॥एतेषांवे
दपाराणांपञ्चशाखाभवंतीत्यर्थः॥ ॥ताःकाः॥आश्व लायनीशांखायनीशाकलाबाष्कलामांडूकाश्चे
ति॥इतिप्रसिद्धाः॥तेषामध्ययनम्॥तेषांआश्वलायनीयादिशाखानांसमानाध्ययनंसूचयति॥अध्याया
श्चतुःषष्टिः॥अग्निमीले॥अयंदेवायेत्यादि ६४ चतुःषष्टिरध्यायाइत्यर्थः॥मंडलानिदशैवतु॥अग्निमीलेकु
षुंभकइत्यादिउपाकर्मणिप्रसिद्धानीत्यर्थः॥वर्गाणांपरिसंख्यानंद्वेसहस्रेषडुत्तरे॥वर्गादिआऋचानांसं
ख्यावालखिल्यैर्विनाज्ञेया॥षडुत्तरसहस्रद्वयवर्गाइत्यर्थः॥सहस्रमेकंसूक्तानांनिर्विशंकंविकल्पितम्॥
दशसप्तसुपठ्यंते॥सप्तदशाधिकसहस्रंसूक्तानीत्यर्थः॥संख्यातंवैपदक्रमंएकशतसहस्रंवाद्विपंचाश
त्सहस्रार्धमेतानिचतुर्दशवासिष्ठानामितरेषांपंचाशीतिः॥एकलक्षद्विपञ्चाशत्सहस्रपंचशतचतुर्द

CC-0. In Public Domain. Digitization by eGangotri

शवासिष्ठानाम् १५ २५१४॥ वासिष्ठगोत्रीयाणां इन्द्रोतिभिरेकसप्तत्रिपदात्मिको वर्गो नास्ति॥ इतरगोत्री
याणां पंचाशीत्यधिकपदानीत्यर्थः ८५ अथ वालखिल्यसहितापदसंख्या उच्यते॥ लक्षैकं तु त्रिपंचाश
त्सहस्रं शतसप्तकम्॥ पदानि च द्विनवतिः प्रमाणं शाकलस्य च १ एकलक्षत्रिपंचाशत्सहस्रसप्तशतद्वि
नवतिश्चाधिकानि पदानीत्यर्थः १५३७९२ पदानि वालखिल्यस्य अर्कसंख्या शतानि च॥ अधिकानि तु
सप्तैव १२०७ वर्गा अष्टादश स्मृताः॥ सप्ताधिकद्वादशशतानि पदानीत्यर्थः १२०७ इत्याश्वलायनानाम्॥
शांखायनानां तु वालखिल्यसहितपदसंख्या उच्यते॥ शाकल्यदृष्टे पदलक्षमेकं सार्द्धं तु वेदे त्रिसहस्रयु
क्तम्॥ शतानि सप्तैव तथाऽधिकानि चत्वारिंत्रिंशच्च पदानि च चो॥ शाकल्यो माण्डूकगणस्थः॥ संहितापदा
नि॥ एकलक्षत्रिपंचासत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि पदानीत्यर्थः १५३७४३ पदानि वालखिल्य
स्य रुद्रसंख्या शतानि च॥ षट्पंचाशत्त्वधिकानि वर्गाः सप्तदश तथा॥ एकादशशतषट्पंचाशदधिकवाल
खिल्यपदानीत्यर्थः ११५६ अष्टपंचाशत्पदात्मिकऋक्त्रयस्य॥ यमृत्विजा वर्गो नास्ति॥ न तु हविष्मांती
यसूक्ते द्वे समीची वर्गे त्रिऋचानन्तरं एक एवाग्निः ऋक्॥ यमृत्विजो ऋक्॥ खिलरूपेण पठंति॥ ज्योतिष्
मन्तमृचाभावः॥ ऋक्त्रयस्य तेषामं ते पदाभावत्वात्॥ अन्ते वर्गसमाप्तौ यावन्मात्रमृचं पठंति॥ एवं द्वे स
मीचीषडृचो वर्गः॥ आश्वलायनानां चतुर्ऋचात्मको वर्गः॥ इत्याश्वलायन शांखायन शाखयोरध्ययन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योर्भेद इत्यर्थः॥ यस्य मंत्रस्य पदाभावः तस्य खैलिकत्वं सिद्धम्॥ तर्हि त्र्यम्बकं यजामहे मंत्रस्य पदाभा
वात् तस्य खैलिकत्वं सिद्धम्॥ नहि इमा नागात्॥ उपलेखायाम्॥ त्र्यम्बकं प्रथमं भद्रन्नः प्रजापते क्रन्तं चेति
पदक्रमसि मम मयाभिगीभूमिति उभया अर्धर्चान्ते पदगीतम्॥ तस्मात्पदकाले क्रमकाले च पठन्ति॥ क्र
मोद्धे पदशब्द निवचनात्॥ अत्र द्वितीयपदं नास्ति॥ अर्धर्चान्त समापनात्॥ क्रमाभावः॥ तस्मात्पदकाले क्र
मकाले पठनं स एवं पदक्रम इत्यर्थः॥ क्रमकाले तु वेष्ट्यं चतुस्त्रिंशत्सहस्राणि षत्वे णत्वे च दीर्घत्वे आ
कारे सानुनासिके॥ त्रिचतुः पञ्चक्रमे अर्धर्चान्ते च वेष्टयेत्॥ क्रमेण उदाहरणानि ज्ञातव्यानि॥ ॥ सुषुमा
यातम्॥ मोषुणः॥ वाजेषु सासहिर्भव॥ आंउपानसः॥ न्याविध्यदिलीविशस्य॥ अगादारैगुरुक्षा॥ निरुस्व
सारमस्कृतोषसम्॥ अग्निमीले॰ ऋत्विजमित्यृत्विजमिति॥ चतुस्त्रिंशत्सहस्राणि क्रमकाले तु वेष्टनानी
त्यर्थः॥ द्विखंडानां सहस्राणां द्वात्रिंशत्षोडशोत्तरा॥ षोडशोत्तरद्वात्रिंशत्सहस्राणि द्विखंडानीत्यर्थः॥ चत्वा
रिंशतं सहस्राणि द्वात्रिंशतं चाक्षरसहस्राणि॥ चतुर्लक्ष द्वात्रिंशत्सहस्राक्षराणीत्यर्थः॥ द्वात्रिंशतं चाक्षरस
हस्राणीत्यर्थ समाप्तेः पुनर्वचनमुक्तम्॥ अथ पारायणे ऋक्परिमाणमुच्यते॥ ऋचां दशसहस्राणि ऋचां प
ञ्चशतानि च॥ ऋचामशीतिपादश्च पारायणं प्रकीर्तितम्॥ एतत्पारायणं वालखिल्यैर्विना संख्यानम्॥ वाल
खिल्यानि पारायणे न सन्ति॥ तदुक्तं॥ ऋग्वेदान्तर्गत वालखिल्यमेकादशसूक्तम् ११ सूक्तसहस्र १०००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऋ.अ. सप्तदशाधिक १७ मित्यत्रऋचांदशसहस्राणीत्येतत्संख्याव्यतिरिक्तानिवालखिल्यानीतिप्रसिद्धिः ॥ तत्रप
७८ ञ्चानुष्ठाने ब्राह्मणेसूत्रेचश्रूयते ॥ वालखिल्याः शंसतिप्राणावैवालखिल्याइति ॥ अभिप्रवःसुराधसमितिष
ड्वालखिल्यानांसूक्तानामितिब्राह्मणेआरण्यके ॥ अथवालखिल्याविहरेतदुक्तंषोलशिनेतिसूत्रकारःश्रौ
तस्मात्तत्सर्वकर्मानुष्ठानेवालखिल्यप्रसिद्धिः ॥ वेदपारायणवर्जमित्यर्थः ॥ शौनकाचार्यवचनात् ॥ यथा
प्रैषाध्यायकुन्तापाध्यायनिविदाध्यायसुपर्णाध्यायश्चेतितद्वद्वालखिल्याध्यायइत्यर्थः ॥ वालखिल्यसं
हितासर्वानुक्रमणीयमंत्ररूपीऋक्संख्याउच्यते ॥ द्विपंचाशदधिकपंचशतदशसहस्राणीति १०५५२
वालखिल्यव्यतिरिक्तऋक्संख्यातु ॥ द्विसप्तत्यधिकचतुःशतदशसहस्राणीति १०४७२ एतत्संख्यानित्य
द्विपदानैमित्तिकद्विपदासहितंउक्ता ॥ हवनाध्यापनाभ्यांसमानासानित्यद्विपदा ॥ आसांसंख्याउपलेख्या
म ॥ तत्र ॥ साधुरसिब्रह्मासिषक्तुनउरोदेवाविदेषांस्ययावाजंमहिराधआवासुम्नेतेनेदेवायरायस्कामः
प्रतिनस्तोमंस्वाप्रधासःपितुर्नपुत्रःसनोवाजेषुगावोनसूर्यंपवस्वसोममन्दयन्नितितिस्रःपरिस्रुवानोत्र
भिर्येमानःप्रत्यचमर्कमनयंसुचीभिरितिद्विपदैकपदाद्वाविंशतिस्तासांसप्तदशद्विपदाएकपदाःपंचेति
॥ हवनाध्ययनेविपरीतासानैमित्तिकद्विपदा ॥ ताः आहवर्गरूपेण ॥ पश्चाननंतानुदशारपिनेदशवनेषुदश राम
श्रोणंदशाणुक्रःशुशुक्वांदशवनेमपूर्वीदशाग्नेत्वन्नश्चत्वार्येभवषट्प्रभुऋतुदशराजाराष्ट्रानादशकई ७८

CC-0. In Public Domain. Digitization by eGangotri

त्र्यक्षरः शवसश्चेरे कोदशपरिमधन्वइ शत्रूनन्ते सोनारो द्वादशे मानुकं चत्वारो याहि वनसा चत्वारी नि नैमि
नि कद्विपदा चत्वारिंशो नरशन्तमिति॥ हवने एकैका॥ अध्ययने द्वे द्वे॥ आसां अन्या एका॥ उर्वेरिता सा नित्य
द्विपदा॥ उक्तं च परिभाषायाम्॥ विंशिका द्विपदा विराजस्तदर्धमेकपदा द्विर्द्विपदास्तृचः समामनन्ति अयुक्स्व
त्या द्विदेवेति॥ द्विर्द्विपदास्तृचः समामनन्ति॥ यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति तास्तृचः अध्ययने चतुष्प
दाः कृत्वेत्यर्थः॥ अयुक् च नित्या द्विपदैव॥ सूक्तस्याचो ऽयुजो या न भवन्ति तास्त्वन्या नित्या द्विपदैव॥ एवं अध्य
यने द्वावर्धर्चावेकऋग्गेव प्राधान्यम्॥ त्रीण्यर्धर्चा याः कथम्॥ तत्रापि द्वावर्धर्चावेकाऋक् चान्योऽर्धर्च एका कर्तव्या॥ अ
ध्ययनसंप्रदायबलात्॥ अनादेशे अष्टाक्षराः पादाश्चतुष्पदाश्चर्च इति परिभाषायाम्॥ अध्ययने त्रीण्यर्ध
र्चैकऋग्गेव संप्रदायो नास्ति॥ आसां परिमाणमाह॥ अग्निं होतारं पञ्च स हि शर्धो न पवलं यजायत पंच॥ विश्वो
विहायास्तिस्रो यन्त्वं रथं पंच मतद्वा चेयपवले न्द्र याह्युपनः पंचेमानेन चत्वारि स नोनव्येभिर्वाजेमिं द्राय हि द्यौ
सप्त॥ त्वयावयं पवल वर्महे एका मस्तु ज्येष्ठं पवलू नी देवानावजेम॥ सुषुमा यातं त्रीणि प्रप्र पूष्णस्तत्पक मुक्तुश्रीव
ट् चत्वारि शचीभिर्नो वर्जेरषंनिट् पच यदेवा सोवजेन्नत्वं न यमका सरवे स्तवाय मेका ऽयारू चात्रीण्येता स्तो
णि त्रीण्यर्धर्चा ऋचा हवनीयाश्चतुर्नवतिसंख्या इति त्रीण्यर्धर्चैकऋक् हवने॥ अध्ययने अर्धर्चद्वयेन ऋग् एका
॥ अर्धर्चेनैकैव ऋक् द्वयेकर्तव्य इत्यर्थः॥ एकर्चस्य ऋग्द्वयं विराट् छन्दो विना कथं भवतीत्याशंक्य तत्राच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च·सू· ७ ते॥ विराट्छंदः सर्वच्छंदसि व्याप्तं वर्तेते॥ उक्तं चारण्यके॥ चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छंदःपुरुषो वे
दपुरुषो महापुरुष इति॥ तस्योष्णिग्लोमानि त्वचं गायत्री त्रिष्टुप् मांसमनुष्टुप् स्नावान्यस्थि जगती पंक्तिर्मज्जा
प्राणो बृहतीति॥ यान्येतानि विराट्चतुर्थान्येवमुहैवं विदुष एतदहः सर्वैश्छंदोभिः प्रतिपन्नं भवतीति॥ आप्तो भव
तीत्यर्थः॥ गायत्री पंक्तीस्त्र्यनिषजति गायत्रो वै पुरुषः पांक्ताः पशव इति ब्राह्मणम्॥ अत्रोदाहरणम्॥ पवस्व सोम मं
न्दयन्निति तिस्रो नित्यं द्विपदा गायत्र्य इति सर्वानुक्रमणी॥ द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्॥ विराड्यामन योर्द्वो विंश्ययोर्द्वि
पद्योरयं पुरुषः॥ अत्रोदाहरणम्॥ आ वां सुम्नैर्वरिमन्॥ मत्स्यं चमर्कम नयन्॥ परिस्रुवानो गिरि०॥ जगती पाद इति॥
एवं सर्वव्याप्तो भवतीत्यर्थः॥ छंदांसि जज्ञिर इति श्रुतिः॥ तथा च शतपथब्राह्मणे॥ तदाहुः किंछंदाः का देवता०॥
प्रतिष्ठ इति द्विपदाः छंदो विष्णुर्देवता प्रतिष्ठेति॥ यथा विष्णुः सर्वव्याप्तः तथा विराट्छन्द इत्यर्थः॥ विराट्छंदस्तु चतु
ष्पदा॥ त्रीण्यर्धर्चो याः पंच पादा ऋकः कर्तव्येति॥ अत्र किं प्रमाणं तच्चोच्यते॥ एकपाद्द्वयो द्विपदो विचक्रमे द्विपात्त्रि
पादमभ्येति पश्चात्॥ चतुष्पाद् इति द्विपदामभिस्वरे संपश्यन् पंक्तीरुपतिष्ठमानः॥ एकपदा द्विपदा नित्या द्विपात्त्रिपादस
भ्येति॥ एकीभूता भवंतीत्यर्थः॥ अस्योदाहरणम्॥ अग्निं होतारं मन्ये० दस्वम्॥ यः ऊर्ध्वया० कृपा॥ अत्र अर्धर्चा॥ धृतस्य राम
विभ्राष्टिमनु वष्टि० इति द्विपदा॥ चतुष्पदा तु॥ पश्चानन्तायं०॥ एकार्धर्चो त्रिपदा एकार्धर्चो द्विपदा एका ऋक् ७
पंचपदा अध्ययने॥ द्वि द्विपदास्तृचः समाम्नं नीत्यत्र समपादग्रहणात् असमानपादा विरुद्धा न हि पंक्तिश्छंदः प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चपदाभवतितस्यद्वितीयभेदो विराट् तस्मात्पञ्चपादत्वंप्राप्तम्॥ समपादोवा असमपादोविराट्छंदइत्यर्थः
॥अत्रश्रुतिः॥ समोचिद्धस्तौनसमंविविष्टः संमातराचित्रसमंदुहाते इत्यनयाऋचापरिहारः॥ दक्षिणवा
महस्तौसमौकर्तृत्वात्समामावित्यर्थः॥ अथाध्ययनेऋक्संख्योच्यते॥ षण्णवत्यधिकचतुःशतदश
सहस्राणीति १०४९६ ताःसहितनैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति १०५६६ सं
ज्ञानमुशनावदत्सूक्तस्यपञ्चदशर्चैकीकृत्यएवंपारायणेऋक्संख्या १०५८० ऋचांदशसहस्राणीतिवच
नस्यसंख्यापूर्णाभवतीत्यर्थः॥ एकादवेरितासाभद्रनोअपिवातयमनः इतिपादाधिकामनुक्रमणिकाकृता
वप्युक्तेः॥ भद्रंपुच्छमित्यारण्यके॥ अथसंज्ञानसूक्तम्॥ ॥संज्ञानमुशनावदत्संज्ञानंवरुणोवदत्॥ संज्ञा
नमिन्द्रश्चाग्निश्चसंज्ञानंसविताब्रवदत्॥ संज्ञानंनरवेभ्यः संज्ञानमरणेभ्यः॥ संज्ञानमश्विनायुवमिहास्मा
सुनियच्छताम्॥ यत्कक्षीवांसंवननंपुत्रोअंगिरसाभवेत्॥ तेननोद्यविश्वेदेवाः संप्रियांसमजीजनन्॥ संवो
मनांसिजानतांसमाकूतिर्मनामसि॥ असौयोविमनाजनस्तंसमावर्त्तयामसि॥ तच्छंयोरावृणीमहे० १ नैहि
त्ससेनादरणंपरिवर्त्मेत्रयद्भविः॥ तेनाअमित्राणांबाहून्हविषाशोषयामसि॥ परिवर्त्मान्येषामिन्द्रः पूषाचस
सृतः॥ तेषांवोअग्निदग्धानामग्निमूढानामिन्द्रोहन्तुवरंवरम्॥ एषुनस्त्वष्टाजिनंहरिणस्यधियंयथा॥ प
रांअमित्रांएषत्वर्वाञ्चीगोरूपेजत्र २ माध्वराणांपतेवसोहानवरेण्यकृतो॥ तुभ्यंगायत्रमुच्यते॥ गोकामोअन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कामः प्रजा कामउत कश्यपः॥ भूतं भविष्यत्प्रस्तौति महद्ब्रह्मैकमक्षरं बहुब्रह्मैकमक्षरम्॥ यदक्षरं भूतकृ
तो विश्वेदेवा उपासते॥ महर्षिमस्य गोप्तारं जमदग्निमकुर्वत॥ जमदग्निराप्यायते छन्दोभिश्चतुरुत्तरैः॥ राज्ञः
सोमस्य भक्षेण ब्रह्मणा वीर्यावता॥ शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः ३ अजो यत्तेजो ददृशे शुक्रं ज्यो
तिः परो गुहा॥ तदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरम्॥ ध्रुवं ब्रह्म चराचरम्॥ त्र्यायुषं जमदग्नेः कश्यपस्य
त्र्यायुषम् अगस्त्यस्य त्र्यायुषम्॥ यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम्॥ तच्छंयोरावृणीमहे० ५ इति सञ्ज्ञान
सूक्तं पंचदशर्चात्मकम्॥ अस्य ग्रहणे प्रमाणमाश्वलायनसूत्रम्॥ तच्च॥ समानी व इत्येका तच्छंयोरावृणीमह
इत्येकेति॥ तथा च शाखायनस्य कौषीतकिसूत्रम्। तच्च। अथोपाकर्मौषधीनां प्रादुर्भावे हस्तेन श्रवणेन वा
अक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रस्तं चैवेदेन जुहुयादिति हैक आहुः सूक्तानुवाकाद्याभिरिति
वा ऽध्यायार्षे याद्याभिरिति मांडूकेयोऽथ ह स्माकौषीतकिरग्निमीले पुरोहितमित्येकाकुषुंभकस्तदब्रवीद
वदं त्वं शकुने भद्रमावद गृणाना जमदग्निना धामन्ते विश्वं भुवनमधिश्रितं गन्ता नो यज्ञं यज्ञियाः सुशमि
यो नस्वा ऽरणः प्रतिचक्ष्व विचक्ष्वाग्ने याहि मरुत्सखा यत्ते राजं छृतं हविरिति हृचास्तच्छंयोरावृणीमह इत्ये
काहुतशेषाद्दधिषः प्राश्नंतीति॥ पंचशाखानां पारायणेन तच्छंयोरावृणीमह इत्यन्तस्समाम्नि रैकवेदत्वात्॥
उक्तञ्च॥ सांख्याश्वलायनो चैव मांडूकावाष्कलस्तथा॥ बह्वृचा ऋषयः सर्वे पंचैते ह्येकवादिनइति॥ सा

ख्यानामशांखायनइति॥ अथपारायणेवर्गसंख्याउच्यते॥ एकर्चेएकवर्गश्चएकर्चेनवकस्तथा॥ एकर्चे
एकवर्गः जातवेदसइत्यर्थः नवर्चेएकवर्गः॥ आपोहिष्ठेति॥ द्वौवर्गौतुदृचौज्ञेयौ॥ द्वौवर्गौदृचावित्यर्थः॥ अ
ग्नेत्वन्नोऽअन्तमः॥ आयाहिवनसासहेति॥ ऋक्त्रयस्यशतंस्मृतम्॥ तृचोवर्गः शतमित्यर्थः॥ उदुत्यंचम
संनवमित्यादि॥ चतुर्ऋचपंचसप्तत्यधिकंचशतंतथा॥ चतुर्ऋचवर्गः पंचसप्तत्यधिकशतइत्यर्थः १७५
यदंगदाशुषेत्वमित्यादि॥ पंचर्चोतुद्विशतकंसहस्रैकादशंस्मृतम्॥ पंचर्चेवर्गः एकादशाधिकद्वादशशता
नीत्यर्थः १२११ अग्निमीळइत्यादि॥ पंचचत्वार्यधिकंतुषड्चानुशतत्रयम्॥ षड्चवर्गः पंचचत्वारिंशत्य
धिकशतत्रयइत्यर्थः ३४५ अश्विनायज्वरीरिषइत्यादि॥ सप्तर्चाशतंज्ञेयंविंशतिश्चाधिकास्मृता॥ सप्त
र्चेवर्गाः विंशत्यधिकशतइत्यर्थः १२० यच्चिद्धिसत्यसोमपाइत्यादि॥ अष्टर्चातुपंचाशत्यंचाधिकंतथैवच॥
अष्टर्चेवर्गाः पंचाधिकपंचशतइत्यर्थः ५५ इन्द्रंविश्वाअवीवृधन्नित्यादि॥ दशाधिकद्विसहस्रम्॥ एवंद
शाधिकसहस्रद्वयवर्गाइत्यर्थः २०१० पञ्चशाखासुनिश्चिताः॥ पंचशाखानांपारायणेनिश्चयेनइत्यर्थः॥ वर्गाः
संज्ञानसूक्तस्यचत्वारश्चात्रमीलिताः॥ संज्ञानसूक्तस्यचत्वारोवर्गाश्चात्रमिलित्वादशाधिकसहस्रद्वयमि
त्यर्थः॥ एवंपारायणेप्रोक्ताऋचांसंख्येनन्यूनतः॥ एवंपूर्वोक्तप्रकारेणवर्गस्यऋक्संख्येनन्यूनसंख्येनदशर्चस्यप
चऋक्त्रीण्यर्धर्चस्यऋक्कर्तव्येत्यर्थः॥ एवंचतुर्विधपारायणंविज्ञेयम्॥ समानीवइतिशाकलानांतच्छंरिति

च·व्यू·
९

बाष्कलानामित्यत्रबाष्कलशाखाध्ययनमनुक्रमणिकातोनुक्रमम्॥ गोनमादौशिजःकुत्सःपारुच्छेपारुषेः
परः॥ कुत्सादीर्घतमेत्येवंबाष्कलाध्ययनेक्रमः॥ अस्यार्थः॥ गोनमादौशिजःकुत्सः॥ उपप्रयन्तो॥ नासत्याभ्या
म्॥ अग्निंहोतारम्॥ इमंस्तोमम्॥ वेदिषदे॥ एषबाष्कलक्रमइत्यर्थः॥ अत्रैवमुक्तेउत्तममंडलेनवकेअनु
क्रमविपर्यासः॥ तच्च॥ स्वादारभक्षिसूक्तांतेअभिप्रवःसुराधसमस्तुतमितिसूक्तद्वयंपठित्वा॥ अग्नआया
ह्यग्निभिरितिपठेत्॥ ततःआप्रइत्याध्यायेगोर्धयेत्यनुवाकोदशसूक्तात्मकोशाकलस्य॥ पंचदशसूक्तात्म
कोबाष्कलस्य॥ तत्रोच्यते॥ गोर्धयतिसूक्तानन्तरं यथामनोसांवरणौ॥ यथामनौविवस्वति॥ उपमन्त्वा॥
एततइन्द्र॥ भूरीदिन्द्रस्य॥ इत्यन्तानिपंचसूक्तानिपठित्वा आत्वागिरोरथीरिवेतिपठेयुः॥ अन्तेसंसमिद्यु
क्तानन्तरंपंचदशर्क्चात्मकंसंज्ञानमुशनावदत्तच्छंयोरावृणीमहइत्यनंतेवेदसमाप्तिरितिबाष्कलशाखा
ध्ययनंएवमध्ययनाभावात्शाखाभावइत्यर्थः॥ सूक्तसहस्रसप्तदशाधिकात् अष्टौसूक्तानिबाष्कलस्या
धिकानीत्यर्थः॥ प्रतिते॥ युवंदेवा॥ यमृत्विजः॥ इमानिवामितिचत्वारिवालखिल्यसूक्तानांलोपइत्यर्थः॥ राम
॥ यस्तान्नृग्विद्वेदचेवाप्यधीतेसनाकपृष्ठंभजतेहशश्वत्॥ अस्यार्थः॥ यःतान्ऋग्रथवित्वेदततःहवनपा ९
रायणेचअधीतेसःवेदिताध्येताचनाकपृष्ठंशश्वत् सदाभजते॥ हप्रसिद्धौ॥ इतोमुंलोकमेत्युतनस्मान्नप्र
च्यवतेहीत्यर्थः॥ ॥अथपारायणफलंतदुक्तमारण्यके॥ यद्विसन्धिविवर्तयतितंनिर्भुजस्वरूपमस्यप

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयव्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रू
यात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणेति॥ अस्यार्थः॥ द्वयोः पदयोरक्षरयोर्वापि संधिस्तस्य अ
विच्छेदाध्ययनं तन्निर्भुजं संहितापारायणमुच्यते॥ शुद्धे पदे अक्षरे वा सन्धिमकुर्वतोच्चारणं तत्प्रतृण्ण
पदपारायणम्॥ संहितापदाभ्यामुभाभ्यां व्याप्तमुभयमन्तरेण क्रमपारायणमित्यर्थः॥ तथा च सति त्रिभिः कृ
त्वा स्वरास्वरं विजानाति मात्रामात्रां विभजन्ते सा संहितेति॥ एवमेतां संहितां यो वेद संधीयते प्रजया पशुभिर्य
शसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति॥ तस्मात्क्रमादृते द्वे पदे संहिते द्वे पद स्वरश्च न सिध्यति॥
द्वे पदे सिद्धेः उत्तरारम्भः कर्तुं न शक्यते॥ अतश्च पादार्धर्चैकऋक्सूक्तमित्यर्थं भगवता पाञ्चालेन स्थापितानां
पारायणानां क्रमेणां क्रमपारायणमुत्तमं भवतीति चात्र श्लोकः॥ प्रगाथेन पुरा दानं दृष्ट्वा कुद्रो महामुनिः॥ अथ
वर्तं क्रमं ब्रूयाद्देवताया श्च याश्च तु॥ अतो ऋग्यजुषां बृंहणं पदैः स्वरैश्चाध्ययनं तथा त्रिभिः अस्यार्थः॥ अतो
पि अस्मादपि हेतोः क्रमः अर्थवान् भवति॥ क्रमेण कृत्वा ऋग्वेदपारायणे ऋचां बृंहणं साधारणं भवति॥ इ
दमित्थमेव पाठ इति॥ स्वरमात्रादिरूपेण निश्चयो भवति॥ तथा यजुर्वेदपारायणे यजुषां बृंहणं नाम साधार
णं स्वरमात्रादिरूपेण इदमित्थमेव पाठ इति निश्चयो भवतीत्यतिदेशाद् इत्यलं प्रपंचेन॥ अथ पारायणविधिः
॥ अत्रादौ कलशस्थापनाद्युक्तं महार्णवे॥ तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते॥ कलशं सुदृढं तत्र सुनिर्णिक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च.व्यू. सुभूषितम्॥पुष्पपल्लवमालाभिश्चंदनैः कुंकुमादिभिः॥मृत्तिकायवसंमिश्रं वेदिमध्ये न्यसेत्ततः॥पंचाशद्भिः
९० कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः॥स्नापितः स्थापितः कुंभे चतुर्बाहुश्चतुर्मुखः॥वस्त्रजान्वाकृतिर्वेदस्र
नराग्रैः कुशैः कृतम्॥ब्रह्मोपधाने दत्वा ततस्ततः स्वस्त्ययनं पठेत्॥प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते
॥यज्ञोपवीतं नैवेद्यं वस्त्रं चंदनकुंकुमैः॥स्रक्धूपदीपताम्बूलैरेतैश्चापि पितामहम्॥ब्रह्मजज्ञानमितिवा
गायत्र्यावाप्रपूजयेत्॥उपाध्यायं च संपूज्य यथापाठं पठेत्ततः॥ततो होमादि वक्ष्यमाणविधिना कृत्वा पठे
दित्यर्थः॥तत्रैव बौधायनः॥ ॥स्थण्डिलं कल्पयित्वाग्निमुपसमाधाय तत्परिस्तीर्याज्येनैताभ्यो देवताभ्यो जु
होत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै प्रज्ञायै मेधायै धारणायै
श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऋषये अग्नये काण्डऋषये विश्वेभ्यो देवेभ्यः काण्डऋषिभ्यः सां
हितीभ्यो देवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीदेवताभ्य उपनिषद्भ्यो हव्यवाहाय
विश्वेभ्यो वरुणेभ्यो ह्यनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च हुत्वा पुनः परिषिंचति स
मापे चैता यजुषा तर्पयति एवमृग्वेदस्य काण्डऋष्यादिवर्जमास्विष्टकृत्तत्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो
गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गोतमाय वसिष्ठाय प्रगाथेभ्यः पावमा राम
नीभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति ततो वेदादिमारभ्य सन्ततमधीयीतेत्याह भगवान्बौ ९०

CC-0. In Public Domain. Digitization by eGangotri

धायनः॥पुनर्महार्णवः॥ ॥अथातःपारायणविधिंव्याख्यास्यामआसमाप्तेर्नोऽश्नीयाद्यथाशक्तिंवा पःपयःफलान्योदनंवाहविष्यमात्रमल्पंभुक्त्वानदाशेषमधीयीतयामात्म्याच्यामुदीच्यांवादिश्युपनिष्क्र म्याग्निमुपसमाधायपरिस्तीर्येध्मंप्रज्वाल्याज्येनेताभ्योदेवताभ्यो सामभ्यः जुहोत्यग्नयेसोमायेन्द्रायप्र जापतयेबृहस्पतयेविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योऋग्भ्यायजुर्भ्यः श्रद्धायैमेधायैप्रज्ञायैधारणायैस दसस्पतयेऽनुमतयेश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतयेकांडऋषयेसोमायकांडऋषयेग्नयेकांडऋष। येविश्वेभ्योदेवेभ्यःकाण्डऋषिभ्यःसांहितीभ्योदेवताभ्यउपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्यउपनिषद्भ्योवारु णीभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्योवरुणेभ्योनुमत्यैस्विष्टकृतेचपृथक्स्वाहाकारेणहु त्वाव्याहृतिभिश्चपुनःपरिषिंचतिसमाप्तेचैवयजुषातर्पयतीति॥अन्तेएताग्निसोमाद्याः यजुषापदेनसह तर्पयेत॥यद्वाभूर्देवांस्तर्पयामीत्यादियजुषातर्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः॥महार्णवः॥एवंऋग्वेदा दिनांकांडऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थानेशान्तिभ्यइत्यादिमहानाम्नीभ्यइत्यन्तंप्राग्वत॥नन्तो वेदादिमारभ्यसन्ततमधीयीतेनेनस्यांतरानध्यायानास्यांतराजननमरणेअशुचिःअशौचंनेत्यर्थः॥ नान्तराव्याहरेन्नविरामेद्यावन्तमधीयीत॥यावत्पर्यन्तंपठेत्तावत्पर्यन्तंनविरमेन्नान्यच्चवदेदित्यर्थः॥य दन्तराविरमेत्त्रीन्प्राणानायम्यप्रणवंवाप्रविधाययावत्कालमधीयीतसर्वेविशोनिशान्तरंसंग्रामात्सय

च॰व्यू॰ म्यारण्यसलिलंलोप्यपरिदध्यात्॥ निशान्तरंसंध्या॥ निशादीन्लोप्यविरम्यासमापयेदित्यर्थः॥आदा
११ वन्तेचब्राह्मणभोजनंदक्षिणांचदद्यादितिमहार्णवोक्तम्॥ ॥अथकमलाकरः॥यएतेनविधिनावेदमधी
यीतसततंपूतोवेदोभवतिमनःशुद्धिश्चभवति॥वेदरूपोभवतीत्यर्थः॥द्वाभ्यांपारायणाभ्यांऋग्भिश्चाऽभो
जनदुह्याधीतेऽनृतेभ्यःप्रमुच्यतेत्रिभिर्बहुभ्यःपतनीयपातकेभ्यःशूद्रायांरेतःसिक्त्वागंगाप्लवनिमज्ज
श्चभवतिचतुर्भ्यःशूद्रान्नभोजनात्स्त्रीसेवनाच्च॥पंचभिरयाज्ययाजनाद्ग्राह्यग्रहणात्षड्भिर्ब्राह्मण
स्यलोहितकरणात्पशुहननात्कवर्णस्तेयात्पतितसंयोगाच्चसप्तभिःप्राजापत्यस्यहीनचरणाद्यज्ञोपव
म्यनाच्चाष्टभिश्चान्द्रायणगुरुतल्पगमनाद्रजस्वलागमनाच्च॥नवभिःसुरापानात्॥दशभिःपुनर्जन्मे
हजन्मकृतैःसर्वैःपापैःप्रमुच्यतेस्वर्गलोकंगच्छतीति॥पितॄन्स्वर्गलोकंगमयति॥अग्निष्टोमादिक्रतुभि
रिष्टंभवति॥वेदाध्यायीसदैवस्यात्पापात्सत्यवाक्शुचिः॥यंयंकामयतेकामंतंतंवेदेनसाधयेत्॥असा
ध्यंनास्तियत्किंचिद्ब्राह्मणेहिफलंमहत्॥ऋग्विधाने॥आदावेवतुसावित्र्याकर्मकुर्वीतशान्तये॥पुष्टय
पशुलाभायधनलाभायभूतये॥एषाहिसंहितादेवैसर्वब्रह्ममयीनिवृत्॥अग्र्येणतपसादृष्टाविश्वामि राम
त्रेणधीमता॥होमांश्चजपयज्ञांश्चनित्यंकुर्वीतवैनया॥सर्वकामप्रसिध्यर्थंपरंब्रह्मेदमुच्यते॥एषावैप्र ११
तिलोमोक्तापक्षःशत्रुविनाशनी॥अक्षरप्रतिलोमेयमभिचारेषुशस्यते॥सर्वसंहितयामन्त्र्यचहोमआज्ये

CC-0. In Public Domain. Digitization by eGangotri

नतिलेनवा॥ आज्यंद्रव्यमनादेशेजुहोतिषु विधीयतइति ब्राह्मोक्तेः॥ सर्वपापहरो होमस्तिलैः सर्वत्र श
स्यतइति विष्णुधर्मोत्तरात्॥ शातातपः॥ कृच्छ्रादेव्ययुतं चैव वेदपारायणं तथा॥ तिलहोमसहस्रं च सम
मेतच्चतुष्टयम्॥ इदं केवलम्॥ अन्यच्चान्द्रमसमम्॥ इति कमलाकरभट्टकृतोक्तवेदपारायणविधिः समा
प्तः॥ इति चरणव्यूहप्रथमखंडव्याख्या समाप्ता॥ व्याख्या चरणव्यूहस्य आद्यखंडस्य तेन वै॥ यथाम
ति विरचिता ह्यस्ति देवप्रसादतः १ यजुर्वेदस्य षडशीतिर्भेदा भवन्ति तत्र चरकानाम द्वादश भेदा भवन्ति चर
का आह्वरकाः कठाः प्राच्यकठाः कपिलकठाश्चारायणीया वारायणीया वार्तान्तवेयाः श्वेताः श्वेततरा औप
मन्यवः पातांडिनीया मैत्रायणीयाश्चेति॥ तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति मानवा द्वंदुभाश्चैकेया
वाराहा हारिद्रवेयाः श्यामाः श्यामायणीयाश्चेति तेषामध्ययनमष्टौ शतं यजुः सहस्राण्यधीत्य शाखापा
रो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति षडंगान्यधी
त्य षडंगविद्भवति शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति अंगानि तत्र प्राच्यामुदीच्यां नैऋत्यां नै
ऋत्यास्तत्र वाजसनेया नाम सप्तदश भेदा भवन्ति जाबाला बहुधेयाः काण्वा माध्यंदिनाः शापीयास्था
पायनीयाः कापालाः पौंड्रवत्साः आवटिकाः परमावटिकाः पाराशर्या वैधेया वैनेया औधेया गालवा
वैजवाः कात्यायनीयाश्चेति प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि भवन्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च. भू.
१२

यज्ज्योतिषं सांगलक्षणं प्रतिज्ञानुवाक्यः परिसंख्या चरणव्यूहः श्राद्धकल्पः प्रवराध्यायश्च शुल्बसूत्र
संख्यानुगमयज्ञपार्श्वानि होत्रकं पशवोक्थानि कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति द्विसहस्रेश
तेन्यूनेमन्त्रे वाजसनेयके॥ इत्युक्तं परिसंख्यानमेनत्सकलंसशुक्रियम्॥ ग्रंथाश्च परिसंख्याता ब्राह्मणं
च चतुर्गुणम्॥ तत्र तैत्तिरीयकानामद्विभेदा भवन्ति औख्याकाण्डिकेयाश्चेति तत्र काण्डिकेयानामपंचभे
दा भवन्त्यापस्तंबी बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तत्र कठानानूपगायजुर्विशेषश्च
तुश्चत्वारिंशत्युपग्रंथानि मंत्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते॥ यजुर्वेदस्तविज्ञेयान्येशाखान्तरास्मृ
तास्तेषामध्ययनं प्रवचनीयाश्चेति॥ २ यजुर्वेदस्य षडशीतिभेदा भवन्ति॥ अत्र शाखाभेदा ग्राह्याः॥ षट्अ
शीतिर्भेदा इत्यर्थः॥ तत्र चरकानामद्वादशभेदा भवन्ति॥ इति स्पष्टार्थः॥ ते के भेदाः॥ चरकाः॥ आह्वरकाः
॥ कठाः॥ प्राच्यकठाः॥ कपिलकठाः॥ आरायणीयाः॥ वारायणीयाः॥ वार्तान्तवेयाः॥ श्वेताः॥ श्वेततराः
॥ औपमन्यवः॥ मैत्रायणीयाश्चेति॥ इति मैत्रायणीयशाखागणा इत्यर्थः॥ मैत्रायणीयस्तु वाजसनीयवे राम १२
दाध्यायी॥ मानवकर्मसूत्रम्॥ तेषामध्ययनमष्टोत्तरशतं यजुः सहस्राण्यधीत्य शाखापारो भवति॥ ते
षामध्ययनं द्विचत्वारिंशदध्यायाः॥ अष्टशताधिकसहस्रमन्त्रा इत्यर्थः॥ तान्येव द्विगुणान्यभ्यपदपारो
भवति॥ द्विवारपठनात्पदपारायणफलं भवतीत्यर्थः॥ तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति॥ त्रिवार

CC-0. In Public Domain. Digitization by eGangotri

पठनात्क्रमपारायणफलं भवतीत्यर्थः॥ पदक्रमाध्ययनं भवतीत्यर्थः॥ तत्र प्राच्यां उदीच्यां नैरृत्यां
नैरृत्यास्तत्र वाजसनेयानां पञ्चदश भेदा भवन्ति॥ प्राच्योदीच्यनैरृत्यतिस्रो दिशायां वाजसनीय
वेदोत्पत्तिः॥ अग्रे वक्ष्यामः॥ इतरदेशेषु वेदशाखयो विभाग उच्यते॥ तच्च महार्णवे॥ पृथिव्यामध्यरे
खा च नर्मदा परिकीर्तिता॥ दक्षिणोत्तरयोर्भागे शाखाभेदाश्च उच्यते॥ नर्मदा दक्षिणे भागे आपस्तम्बा
श्वलायनी॥ राणायनी पिप्पला च यज्ञकन्याविभागिनः॥ माध्यंदिनी शांखायनी कौथुमी शौनकी तथा
॥ नर्मदोत्तरभागे च यज्ञकन्याविभागिनः॥ तुंगाकृष्णा तथा गोदा सह्याद्रिशिखरावधि॥ आआंध्रदेश
पर्यन्तं बह्वृचश्चाश्वलायनी॥ उत्तरे गुर्जरे देशे वेदो बह्वृच कीर्तितः॥ कौषीतकी ब्राह्मणं च शाखा शां
खायनी स्थिता॥ आन्ध्रादि दक्षिणाग्नेयी गोदासागर आवधि॥ यजुर्वेदस्तु तैत्तिर्यो आपस्तम्बी प्रतिष्ठि
ता॥ सह्याद्रिपर्वतारंभादिशां नैरृत्यसागरात्॥ हिरण्यकेशी शाखा च परशुराम स्य संनिधौ॥ मयूरप
र्वताच्चैव यावद्गुर्जरदेशतः॥ व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता॥ अंगवंगकलिंगश्च कानीनो गु
र्जरस्तथा॥ वाजसनीयशाखा च माध्यंदिनी प्रतिष्ठिता॥ ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता॥ वाज
सनीयवेदस्य प्रथमा काण्वसञ्ज्ञकेति॥ व्यासशिष्यो वैशंपायननिरदारव्यो यजुर्वेदं पठित्वा शिष्यान्च
कार॥ तच्च भागवते॥ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन्॥ यच्चेरुर्ब्रह्महत्यापासपणं स्वगुरोर्व्रतम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च॰व्यू॰ याज्ञवल्क्यस्ततच्छिष्यो अहाहो भगवान्कियत्॥ चरितेनाल्पसारेण चरिष्येहं सुदुस्तरम्॥ इत्युक्तो
१२ गुरुरप्याह कुपितो मुच्यतां त्वया॥ विप्रावमन्ता शिष्येण अधीतं त्यजस्वेति॥ देवरातसुतः सोपि विदि
त्वा यजुषां गणम्॥ ततो गतोथ मुनयो ददृशुस्तान्यजुर्गणान्॥ यजूंषि तैत्तिरा भूत्वा तल्लोलुपतया ददुः॥ तै
त्तिरीया इति यजुःशाखा आसंस्तु पेशलाः॥ याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यधिगवेषयन्॥ गुरोरविद्य
मानानि तत्पस्थेपर्कमीश्वरम्॥ याज्ञवल्क्य उवाच॥ ॐ नमो भगवतेत्यादि॥ जीर्णभुक्तेउच्छिष्टं वान्तं यात
याम शब्द इति निघण्टुः॥ एवमेवार्थः यातयामयजुः॥ काममुपसर मित्यंतं तुष्टाव॥ एवमुक्तः स भगवा
न्वाजीरूपधरो हरिः॥ यजूंष्ययातयामानि मुनयेदात्प्रसादतः॥ यजुर्भिरकरोच्छाखा दश पंच तथा वि
भुः॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः॥ इत्यादि पर्यालोचनया यजुर्वेदस्यागाननन्तरं देवरा
तसुतेन अब्राह्मणत्वभिया सविता सूर्यो वाजीरूपेण वाजभ्यः केसरेभ्यः वाजेनवेगेन वा सन्यस्तास्त्य
क्ताः॥ शाखा वाजसनेयी संज्ञा शाखारण्डत्वपरिहारार्थं चातुर्वेद्यत्वसंख्यासंरक्षणार्थं च वाजीरूपेण सू
र्येण यातयामानि यजूंषि मुनये दत्तानि तैर्यजुर्भिरुपरितैः समुनिस्ता वाजसन्यः पंचदश शाखा अकरो राम
त्॥ तस्माच्च मुनेः काण्वमाध्यंदिनादयः अध्ययनं चक्रुः॥ ते पंचदश भवंति॥ अथ प्रसंगात् यजुर्वेदस्य शा १२
खाप्रणयनविचारः किंचिदुच्यते॥ तत्र यजुर्वेद एव प्रथमः॥ तथा च विष्णुपुराणे॥ एकएव यजुर्वेदस्तं चतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्द्दोव्यकल्पयदिति॥ यजुर्वेदः यज्ञोपयोगित्वरूपयोगात् सर्वोपिवेदो यजुर्वेद इत्युच्यते॥ यजुर्वेदस्य शा
खाभेदंसविस्तरमाह॥ यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः॥ वैशंपायननामासौ व्यासशिष्यश्चका
रवै॥ शिष्येभ्यः प्रददौताश्चजगृहुस्तेप्यनुक्रमात्॥ याज्ञवल्क्यस्तुतस्याभूद्ब्रह्मरातसुतोद्विजः॥ शिष्यः
परमधर्मज्ञोगुरुवृत्तिरतः सदा॥ ऋषिर्यश्चमहामेरौसमाजेनागमिष्यति॥ तस्यवैसप्तरात्रान्तुब्रह्महत्या
भविष्यति॥ पूर्वमेवंमुनिगणैः समयोयंकृतोद्विज॥ वैशंपायनएकस्तुतंव्यतिक्रान्तवांस्तथा॥ स्वस्रियं
बालकंसोथपदाघृष्टमघातयत्॥ शिष्यानाहचभोशिष्याब्रह्महत्यापरावृते॥ चरध्वंमत्कृतेसर्वेनवि
चार्यमिदंतथा॥ अथाहयाज्ञवल्क्यस्तंकिमेतैर्बहुभिर्द्विजैः॥ क्लेशितैरल्पतेजोभिश्चरिष्येहमिदंव्रतम्
॥ ततः क्रुद्धोगुरुः प्राहयाज्ञवल्क्यंमहामुनिम्॥ मुच्यतांयत्त्वयाधीतंमत्तोविप्रावमानकः॥ निस्तेजसा
वदस्येतान् यस्त्वंब्राह्मणपुंगवान्॥ तेनशिष्येणनार्थोस्तिममाज्ञाभंगकारिणा॥ याज्ञवल्क्यस्ततः प्रा
हभक्त्यैतत्तेमयोदितम्॥ ममाप्यलंत्वयाधीतंयन्मयातदिदंद्विज॥ श्रीपराशरउवाच॥ ॥इत्युक्त्वारुधि
राक्तानिस्वरूपाणिचयजूंष्यथ॥ छर्दयित्वाददौतस्मैययौचस्वेच्छयामुनिः॥ यजूंष्यथविसृष्टानियाज्ञवल्
क्येनवैद्विजाः॥ जगृहुस्तित्तिरोभूत्वातैत्तिरीयास्तुततः स्मृताः॥ ब्रह्महत्याव्रतंचीर्णंगुरुणानोदितैस्तुयैः॥ चर
काध्वर्यवस्तेतुचरणान्मुनिसत्तम॥ याज्ञवल्क्योपिमैत्रेयप्राणायामपरायणः॥ तुष्टावप्रणतः सूर्यंयजूंष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिलिपन्नमः॥अस्यार्थः॥यजुर्वेदोत्तरेरित्यादिनासप्तविंशतिः॥इयंचप्रधानशाखानांसंख्या॥ब्रह्मा
ण्डपुराणोक्तषडशीतिशाखाभेदस्तुप्रतिशाखाविवक्षयाताश्चशुक्लयजुःपंचदशकंसहेत्येकशाखा
आपस्तंबोक्ताइतिद्रष्टव्यम्॥याज्ञवल्क्येनच्छर्दितैर्यजुर्भिस्तैत्तिरीयशाखाबभूव॥तेयाज्ञवल्क्यव्यति
रिक्तावैशंपायनस्यशिष्याःयाज्ञवल्क्येनच्छर्दितंविप्ररूपेणगृहीतुमनुचितमितितित्तिरपक्षिणोभूत्वाया
ज्ञवल्क्यविसृष्टानियजूंषिजगृहुः॥ततस्ताःशाखास्तैत्तिरीयाबभूवुरित्यर्थः॥याज्ञवल्क्यव्यतिरिक्तानां
चरकाध्वर्युसंज्ञांनिर्वक्ति॥चकाराध्वर्यवस्तेवैवरणान्मुनिसत्तमेति॥चराध्वर्यवमितिपाठेवरणाद्यजुषा
ग्रहणात्॥आध्वर्यवंचक्रुरित्यर्थः॥यजूंषिवैशंपायनेनाधीतानि॥याज्ञवल्क्यस्ततोब्रह्मन्छन्दांस्यधि
गवेषयन्॥गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरमितिभागवतोक्तेः॥याज्ञवल्क्यउवाच॥नमःसवित्रे
द्वारायमुक्तेरमिततेजसे॥ऋग्यजुःसामरूपायत्रयीधाम्नेत्मनेनमः॥इत्येवमादिभिस्तेनस्तूयमानःस
वैरविः॥वाजीरूपधरःप्राहव्रजनामभिवांछितम्॥याज्ञवल्क्यस्तथाप्राहप्रणिपत्यदिवाकरम्॥यजूंषि
तानिमेदेहियानिसन्तिनमेगुरुः॥पाराशरउवाच॥एवमुक्तोददौतस्मैयजूंषिभगवान्रविः॥अयातया
मसंज्ञानियानिनवेत्तितद्गुरुः॥यजूंषियैरधीतानितानिविप्रद्विजोत्तम॥वाजिनस्तेसमाख्याताःसूर्योश्वः
सोभवद्यतः॥शाखाभेदस्तुतेषांवैदशपंचचवाजिनाम्॥काण्वाद्यास्तुमहाभागयाज्ञवल्क्यप्रकीर्तिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति॥ तदुक्तः वैशंपायनो याज्ञिनवेत्तिते यांव्यासेनात्र परिदृष्टत्वादिति भावः॥ वाजिनः समाख्याताः वाजि
रूपसूर्यप्रोक्तसंहिताध्यापित्वात्॥ अग्निपुराणेपि॥ काण्वा माध्यंदिनी संज्ञा कठी माध्यकठी तथा॥ मैत्राय
णीयसंज्ञा च तैत्तिरीयाभिधानका॥ वैशंपायनिकेत्याद्याः शाखा याजुषसंज्ञिताइति॥ आदिशब्देन एतद
न्यशाखाग्रहणम्॥ तदुक्तं नृसिंहपराशरे॥ ॥प्रथमो याज्ञवल्क्यश्च आपस्तंबो द्वितीयकः॥ तृतीयो मूल
घटकश्चतुर्थो वाणसः स्मृतः॥ पंचमः सहवासश्च षष्ठः स्याद्गोत्रपंडितः॥ रामानुजः सप्तमोक्त अष्टमश्च गया
वलः॥ त्रिदंडो नवमः प्रोक्तो नवशाखाः प्रकीर्तिताः॥ तन्मध्ये सहवासस्तु कर्मनिष्ठो द्विजाग्रणी॥ एवं शाखा
देशभेदात् बहवस्तु द्विजातयः॥ तत्रापि कर्मनिष्ठाश्च ग्राह्या यज्ञादिकर्मसु॥ हीना द्विजातयः सर्वे त्याज्याः
सर्वत्र कर्मसु॥ हीना द्विजातयः॥ अभीरादयः॥ परदेशत्रिदंडिनो वेषधारिणः॥ सन्यासिनः स्वग्रामप
रिग्रहयुक्तास्ते त्रिदंडिनः॥ गोत्रपंडितः वैश्ययाजकः॥ मूलघटकः नागवल्लीरोपकः निर्मूलाइति प्रसि
द्धाः॥ अन्ये वाणसादि प्रसिद्धाः॥ केचिद्धर्मशास्त्रानभिज्ञाः वानप्रस्थाज्जाता वाणसाइति वदंति तद्धा कं
आरूढपतितपरम्॥ तदुक्तं कौर्मे वानप्रस्थाश्रमधर्मे॥ यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत्॥ तद्व
तं तस्य लुप्येत प्रायश्चित्तीयते द्विजः॥ तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः॥ न हि वेदेऽधिकारोस्य
तद्वंशेप्येवमेव हि॥ आरूढपतितः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिरिति॥ वाजसनीयवेदोत्पत्तिरित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

काण्वाः माध्यंदिनाः शापीयाः स्थापायनीयाः कापालाः पौंड्रवत्साः आवटिकाः परमावटिकाः पाराशर्या वै
धेया वैनेयाः औधेयाः गालवा वैजवाः कात्यायनीयाश्चेति॥ पंचदश शाखा इत्यर्थः॥ प्रतिपदमनुपदम्
॥ अतिपदमनुपदमन्यपदकर्तव्यमित्यर्थः॥ छन्दः छंदोरत्नाकरादि॥ भाषाशब्दपरिभाषा॥ धर्मशास्त्रं
मिताक्षरादि॥ मीमांसा प्रसिद्धा। न्यायस्तर्कः॥ इति षडंगानि॥ उपज्योतिषं ज्योतिःशास्त्रम्॥ साङ्गलक्ष
णं सामुद्रिकादि॥ प्रतिज्ञानुवाक्यः अनेन वाक्येन अयं सिद्धांतः॥ परिसंख्या भूगोलादि॥ अनक्षरण
व्यूहः॥ श्राद्धकल्पः॥ प्रवराध्यायश्च॥ शास्त्रक्रतुसंख्या कल्यादिषु ज्ञातव्या॥ अनुगमपत्नक्रियाः पा
र्श्वाग्निहोत्रकम्॥ यज्ञक्रिया होत्रम्॥ पशवो बध्यानि पशुयज्ञः॥ कूर्मलक्षणं यज्ञे प्रसिद्धम्॥ इति अष्टा
दश परिशिष्टानि भवंति॥ द्वे सहस्रे शते न्यूने मंत्रे वाजसनेयके। इत्युक्तपरिसंख्या तमेतत्सकलं सशु
क्रियम्॥ वाजसनेयके वेदे नवशताधिकसहस्रमंत्रा इत्यर्थः॥ एतत्सकलं सशुक्रियं मध्यान्हे शुक्लान
र्गे न सूर्येणदत्तः सशुक्रयज्ञः॥ परिसंख्यातमित्यर्थः॥ वेदोपक्रमणे चतुर्दशी पौर्णिमाग्रहणात् शु
क्लयजुः॥ प्रतिपदाद्युक्तपौर्णिमाग्रहणात् कृष्णयजुरिति वा॥ ब्राह्मणं च चतुर्गुणम्॥ वेदचतुर्गुणं ब्राह्मण
मित्यर्थः॥ यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम्॥ तत्रापि शिवा शाखा दश पंच च वाजिनाम्॥ तत्रा
पि मुख्या विज्ञेया शाखा या काण्वसंज्ञिकाः॥ ग्रन्थान्तरे॥ तैत्तिरीयकानां द्विभेदा भवंति॥ औख्या कांडिकेया

CC-0. In Public Domain. Digitization by eGangotri

श्चेति॥तेषामध्ययनपरिमाणम॥कांडास्तुसप्तविज्ञेयाः प्रश्नाश्चाधिकवैचतुः॥चत्वारिंशत्तुविज्ञेयाअ
नुवाकाः शतानिषट्॥एकपंचाशदधिकसंख्यापन्नाशिउच्यते॥द्विसहस्रंचैकशतमष्टानवतिचाधिका॥
लक्षैकंतुद्विनवतिसहस्राणिप्रकीर्तिता॥पदानिनवतिश्चैवतथाअक्षरउच्यते॥लक्षद्वयंत्रिपंचाशत्सह
स्राणिशताष्टकम्॥अष्टषष्ट्यधिकंचैवयजुर्वेदप्रमाणकः॥कांडानि ७ प्रश्नः ४४ अनुवाकः ६५१ पन्नाशी
२१९८ पदानि १९२९० अक्षराणि २५३८६८ शाखावाक्यान्ययुतानिसहस्राणिनवानिच॥चतुःशतान्यशी
तिश्चअष्टौवाक्यानिगण्यते॥इतिब्राह्मणअष्टौवाक्यसंख्या १९४८० इतितैत्तिरीयनिगदवेदास्यसंख्याउ
क्ताइत्यर्थः॥तत्रकठानान्तूपगोयजुचतुश्चत्वारिंशदुपग्रंथाः॥मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते
॥यजुर्वेदःसविज्ञेयअन्येशाखान्तराःस्मृताः॥चतुश्चत्वारिंशदुपग्रन्थाः॥अध्यायाःसमीपउक्ताः चतुश्च
त्वारिंशत॥मंत्रश्चब्राह्मणंचमंत्रब्राह्मणेतयोःमंत्रब्राह्मणयोःवेदइतिसंज्ञा॥तदुक्तम्॥मंत्रब्राह्मण
योर्वेदइतिनामधेयमित्युक्तशाखीयमानिशाखीयभाष्यकारेणआपस्तंबसामान्यसूत्रभाष्यकारेणक
पर्दिनाधूर्तस्वामिनाचमंत्रोनामसंहितामंत्रत्वाइक्मंत्ररूपसंहितायाः तन्मध्येएवतदग्रेब्राह्मणत्वेन
पठनमित्युभयथापिसंहितात्वेनपदत्वेनक्रमत्वेनचपठनंत्रिगुणपठनमितिसमंत्रब्राह्मणयोर्वेदस्त्रि
गुणंयत्रपठ्यतइत्यस्यार्थः॥एतादृशपठनंशाखायाअध्ययनंसयजुर्वेदस्तच्चतैत्तिरीयशाखायामेवास्ति॥त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याहिसंपश्यामिप्रजा अहमिडमजसोमानवीरितिसंहितामन्त्रः॥एतस्यैवब्राह्मणंसंहितायामेवतत्र द
ग्र एवसंपश्यामिप्रजा अहमित्याहयावन्त एवेतिब्राह्मणमित्युभयोरपिसंहितात्वेनपदत्वेनक्रमत्वे
नपठनंत्रिगुणितपठनंभवति॥एतादृशमुदाहरणान्तरमाह॥इमामगृभ्णन्रशनामृतस्यपूर्वआयु
षिविदथेषितिसंहितामन्त्रः॥एतस्यैवब्राह्मणंसंहितायामेवतत्रग्र एवसंहितारूपेणवर्तते॥तत्कथमि
त्यपेक्षायामाह॥इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइतिब्राह्मणम्॥अनयोरपित्रिगुणत्वे
नपठनम्॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयइतित्रिगुणेनपठनंभवति॥एतेत्रिगुणाःकस्या
अपिशाखायांनभवंति॥किन्तुगाथाग्रन्थत्वात्॥एवमन्यानिबहून्यपिवाक्यानिसन्तितानिविस्तरभया
न्नोक्तानि॥अतःकारणात्॥अन्येशाखान्तरास्मृताः॥तेषामध्ययनंप्रवचनीयाश्चेति॥एतेषांशाखानां
अध्ययनंप्रवचनीयाःप्रतिवचनीयत्वेनसमाप्तमित्यर्थः २॥ इतिचरणव्यूहेद्वितीयखंडव्याख्यासमा
प्ता॥ सामवेदस्यखिलसहस्रभेदाआसीदनध्यायेष्वधीयानास्तेवज्रेणशक्रेणाभिहताःप्रनष्टाःशेषा
न्नवदन्त्याम्यासुरायणीयावासुरायणीयाःप्राञ्जलद्वैतभृतःप्राचीनयोग्यानयोग्याचेतिनवराणाय
नीयानामनवभेदाभवन्तिराणायनीयाःशाठ्यायनीयाःसात्यमुग्रलाःखल्वलामहाखल्वलालांगलायौ
ग्यमागौतमाजैमिनीयाश्चेतितेषामध्ययनमष्टादशानिदशानिद्रप्समसुवालखिल्याःसुपर्णःप्रेष्यए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्साम गणं स्मृतम् ३ आसां षोडश शाखानां मध्येतिस्रः शाखा विद्यन्ते॥ तासु गुर्जरदेशे कौथुमी प
सिद्धा॥ कर्नाटके जैमिनीप्रसिद्धा॥ महाराष्ट्रदेशे राणायनीया चेति॥ एषामध्ययनम्॥ अष्टौ साम सह
स्राणि छन्दोगार्चिकसंहिता॥ गानानि तस्य वक्ष्यामि सहस्राणि चतुर्दश ॥ अष्टौ शतानि ज्ञेयानि दशो
त्तराणि तथैव च॥ ब्राह्मणं चोपनिषदं सहस्रत्रितयं तथा ३ अथर्ववेदस्य नव भेदा भवंति पैप्पलादांताः
प्रदांताः स्तौताः औताः ब्रह्मदापलाः शौनकी वेददर्शी चरणव्यूहं विद्याश्चेति तेषामध्ययनं पंच सामवेद
इति किलेति प्रसिद्धा सहस्रभेदा आसीत्॥ सहस्रभेद मध्ये शक्रेण वज्रेणाभिहता अनष्टाः अनध्याये
ष्वधीयानाः स्त्रीयन्ते विद्युता खलु इति॥ शेषान् अहतान् शाखापाठकान्॥ आख्यास्यामः॥ आसुराय
णीया वासुरायणीया वार्तान्तरे। याप्रांजलऋग्वैनविधाः। प्राचीनयोग्या। राणायनीयाश्चेति। राणाय
नीयानां नव भेदा भवंति। राणायनीयाः शाट्यायनीयाः सत्यमुग्रहतः खल्वला महाखल्वला लाङ्गु
लाः कौथुमी गौतमी जैमिनीयाश्चेति॥ तेषामध्ययनं अष्टौ साम सहस्राणि सामानि च चतुर्दशान्यष्टौ
शतानि दशभिर्दश सप्तसुवालखिल्यः सुपर्णः प्रेत्यमेतत्सामगणस्मृतम्॥ अथ प्रकारान्तरेणाह॥ तत्र
राणायनीयानां सप्त भेदा भवंति। राणायनीयाः। सात्यमुग्राः। कालेया महाकालेया लांगलायनाः शार्दू
लाः॥ कौथुमाश्चेति॥ तत्र कौथुमानां षट् भेदा भवंति॥ कौथुमाः १ आसुरायणाः २ वातायनाः ३ प्राञ्ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गेन भृतः ४ प्राचीनयोग्याः ५ नैगमीयाः ६ इति तेषां कौथुमादीनामध्ययनम्॥ अशीति शतमाग्नेयं पा
वमानं चतुःशतम्॥ ऐंद्रं तु षड्विंशतिर्यानि गायंति सामगास्तानि सूक्तानि अधीसे चंडाउत्कृष्टाः ते चंडन
राः अत्युत्कृष्टा भवंति शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टा विंशतिको भवंति शिष्टान् प्रामाणि
कान् आविंशति शिष्टेषु वा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशति गणानां पूरकाः सर्वश्रेष्ठो
भवतीत्यर्थः। तत्र सूक्तेषु केचिन्मंत्रतंत्रा इति मंत्राश्चतुर्धा विधीयंते। आचार्यः तदाहुः ज्ञकतंत्रम् १ सा
मतंत्रम् २ संज्ञालक्षणम् ३ धातु लक्षणमिति ४ इदानीं सामसंख्यामाह ॥ अष्टौ सामसहस्राणि सामा
नि च चतुर्दश। अष्टौ शतानि नवति विंशतिर्वालखिल्यकम्॥ सरहस्यं ससुपर्णं प्रेक्ष्य तत्साम दर्पणम्॥
सारण्यकानि सौपर्णानि एतत्सामगणं स्मृतम्॥ अशीति शतमाग्नेयम् १८० पावमानम् १०४ ऐंद्रं तु २६
शिष्टा २८ गणानां पूरकाः अष्टौ सामसहस्राणि सामानि च चतुर्दश अष्टौ शतानि नवति विंशतिं वालखि
ल्यकम्॥ अस्यार्थः ८८१५ अंकतो ज्ञातव्यः॥ अन्यशाखासंख्यामाह नवती तिसुपर्णप्रेक्षः कश्चिच्छाखा
भेदः तत सहवर्तमानः ससुपर्णप्रेक्षः सुपर्णप्रेक्ष्या सहितो वालखिल्यः शाखाभेदो नवतिः नवति संख्या
काः दश दश तयो यस्मिन् स नवति दशतिः॥ दशतिरिति दशसंख्या संज्ञा दशगुणा नवतिरित्यर्थः॥ अं
कतोपि ९० सारण्यकानि आरण्यकानि आरण्यके तोपनिषद्भागेन सह वर्तमानानि सौपर्णानि सूर्यदैवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निसृक्तानि॥ तत्रवालखिल्यशाखायामेव॥ आरण्यकं सूर्यसूक्तं सुवर्णमेव वालखिल्यानि मिलित्वा नव
शतानीत्यर्थः निगमयंति एतदिति एतत्पूर्वोक्तं साम समूहः स्मृतं कथितम्॥ गणशब्दस्य बलीयस्त्वं छांद
सी॥ राणायनीसात्यमुग्रीद्वांसा। अथ भागुरी गोरुंडी। गौर्ग्यजवी भगवानौपमन्यवः १ दाराली गार्ग्य सावं
र्णी वर्षगण्यश्चेते दश॥ कुथुमि शालिहोत्रश्च जैमिनिश्च त्रयोदशाद्यस्येते सामगाचार्याः स्वस्तिं कुर्वन्तु तर्पिता
इति २ इति चरणव्यूहभाष्ये तृतीयः खंडः॥ अथर्ववेदस्य नव भेदा भवन्ति पैप्पलादा नामप्रदा तास्तौ मौनी
ब्रह्मदायश शौनकी वेददर्शी चरणविद्याश्चेति तेषामध्ययनं पंच कल्पानि भवंति। कल्पा पंचशतैरपि नक्षत्र
कल्पो विधानकल्पो विधिविधानकल्पो संहिता कल्पः शांतिकल्पश्चेति। सर्वेषामेव वेदानामुपवेदा भवं
ति ऋग्वेदस्यायुर्वेद उपवेदो। यजुर्वेदस्य धनुर्वेद उपवेदो। सामवेदस्य गान्धर्ववेद उपवेदो। थर्ववेदस्य शस्त्र
शास्त्राणि भवंति। ऋग्वेदस्यात्रिगोत्रं ब्रह्मदेवत्यं गायत्रं छंदो। यजुर्वेदस्य भारद्वाजगोत्रं विष्णुदेवत्यं त्रैष्टुभं
छंदः। सामवेदस्य काश्यपगोत्रं रुद्रदेवत्यं जागतं छंदो ऽथर्ववेदस्य वैतानगोत्रमिन्द्रदेवत्यमानुष्टुभं छन्दः
ऋग्वेदो रूपवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुंचितकेशः श्मश्रु पिंगाक्षप्रमाणेन हि रत्निमात्रो यजु
र्वेदः दीर्घ कपोलस्ताम्रवर्णो कांचननयन आदित्यवर्णेन पंचारत्निमात्रः सामवेदो नित्यस्रग्वी शुचिः वा
स शमीदान्तो शर्मी दंडी कांचननयन श्वेतवर्णेन षडरत्निमात्रो ऽथर्ववेदस्तीक्ष्णश्चंडः कामः कामरूपी क्षुद्रक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोंश्चेनसाध्यवशीश्वसृजलमूर्द्धनिगालवः स्वदारतुष्टः परस्त्रियान्यपश्येतिपद्ददं दैवतरूपंगोत्रप्रमाणंछंदो
वर्णोवर्णयंति।जन्मजन्मनिवेदपारोभवंतिजन्मजन्मनिवेदपारोभवंतिअप्रहितःप्रहितोभवतिअव्रतोव्रती
भवत्यब्रह्मचारीब्रह्मचारीभवतिजातिस्मरोजायतेनमःशौनकायनमःशौनकायनमः—— परमऋषिभ्यो
नमः परमऋषिभ्यः॥यइदंचरणव्यूहं पर्वसुश्रावयेद्द्विजः।धौतपाप्माशुचिर्विप्रोब्रह्मभूयायकल्पते १ यइ
दंचरणव्यूहंश्राद्धकालेसदापठेत्।अक्षय्यंतद्भवेच्छ्राद्धंपितॄंश्चैवोपतिष्ठति २ यइदंचरणव्यूहंगुर्विण्याःशृ
णुतेस्त्रियः पु—मांसंजनयेत्पुत्रंसर्वज्ञंवेदपारगम् ३ योधीतेचरणव्यूहंसविप्रःपंक्तिपावनः।तारयत्सप्ति
लान्पूर्वान्पुरुषान्सप्तसप्तच ४ योनामानिपुराविद्वाअमृतत्वंचगच्छति।लोकातीतंमहाशान्तममृतत्व
चगच्छतिलोकातीतंमहाशान्तममृतत्वंचगच्छत्योनमः इत्याह भगवान्व्यासःपाराशर्यःनमःपरमऋषि
भ्योनमःपरमऋषिभ्यः।तंवेदशास्त्रपरिनिश्चितशुद्धबुद्धिंचर्मांबरंसुरमुनीन्द्रनतंकवीन्द्रम्॥कृष्णद्विजंक
नकपिंगजटाकलापंव्यासंनमामिशिरसातिलकंमुनीनाम् ५ इतिचरणव्यूहेचतुर्थःखण्डः॥अथप्रकान्त
रमाह।अथर्ववेदस्यनवभेदाभवंतिपिप्पला।शौनका।दामोदा।तोतायना।जाबाला।ब्रह्मपलाशाकुनखी।
देवदर्शी।चारणविद्याश्चेतितेषामध्ययनंद्वादशैवसहस्राणिपंचकल्पानिभवंति।कल्पेकल्पेपञ्चशतानि
भवंति।नक्षत्रकल्पोविधानकल्पःसंहिताविधिरभिचारकल्पःशान्तिकल्पश्चेति।तत्रवेदानामुपवेदाभवंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्यार्थशास्त्रं चेत्याह भगवान्व्यासः स्कन्दो वा य इमे वेदाश्चत्वार
स्तेषामेकैकस्य कीदृशं रूपं वर्णविधोच्यते। ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुंचितकेशश्मश्रुः श्वेतवर्णो वर्णेन तु कीर्तितं
प्रमाणं तावत्तिष्ठन्वितस्तीः पंच। यजुर्वेदः पिंगाक्षः कृशमध्यः स्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रं षडुदीर्घत्वेन सा
मवेदो नित्यं स्रग्वी सुयतः शुचिर्वासाः शमी दान्तो बृहच्छरीरः शमी दंडी कान्तरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेद
स्तीक्ष्णः प्रचंडः कामरूपी श्वात्मा विश्वाकृती क्षुद्रकर्ता स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्रं ऋग्वेदस्या
त्रेयसगोत्रं सोमदैवत्यं गायत्रं छन्दो यजुर्वेदस्य काश्यपसगोत्रमिंद्रदैवत्यं त्रि ष्टुप्छन्दः। सामवेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं ज
गती छंदोऽथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यमनुष्टुप्छन्दः। य इमे वेदा नानानामरूपगोत्रप्रमाणछंदोदैवतं वर्णं वर्णयन्ति। अवि
द्यो लभते विद्यां जातिस्मरोऽथ जायते। जन्मजन्म वेदपारगो भवत्यव्रतीव्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति। नमः शौनकाय नमः शौ
नकाय ५ य इदं चरणव्यूहं गर्भिणीं श्रावयेत्त्रियम्। पुमांसं जनयेत्सुत्रमृषिर्वेदपारगः। य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः। अक्ष
य्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठति। य इदं चरणव्यूहं पठेत्स पंक्तिपावनः। तारयेत्सुत्रप्रभृतीन्सुत्रान्सुरुषः सप्तसप्ततिः। य इदं चरण
व्यूहं पठेत्पर्वसु पर्वसु विधूतपाप्मा स स्वर्गं ब्रह्मभूयाय गच्छति ब्रह्मभूयाय गच्छति॥ राणायनी सात्यमुग्रिर्दुर्वासाऽथ भागुरी। गौरुंडी
गौल्गुलवी भगवानौपमन्यवः। दाराल्लो गार्ग्यसावर्णी वार्षगण्यश्चैते दश। कुथुमिश्च शालिहोत्रश्च जैमिनिश्च त्रयोदश इत्येते सामगा
चार्याः स्वस्ति कुर्वन्तु तर्पिताः अथर्ववेद इति॥ अथर्ववेदस्य नव भेदा भवंति। न व शाखा भवंतीत्यर्थः। तानाह। पैपलादा नामौता
ब्रह्मदायशशौनकी वेददर्शी॥ चरणविद्याश्चेति तेषामध्ययनं द्वादशैव सहस्राणि अत्र बहुवचनं तेन बह्वः यत्र एव त्वचस्त एकएकाते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षामध्ययनंस्वरवायोच्यते द्वादशसहस्राणि मंत्राणाम्॥कीदृशानि पंचकल्पानि भवंति एकस्मिन् कल्पेकल्पे पंचशतानि मं
त्राणाम्।कल्पानाह॥नक्षत्रकल्पः१ विधानकल्पः२ संहिताविधिकल्पः३ अभिचारकल्पः४ शांतिकल्पः५ इति पंचकल्पाः।तत्रवे
दानां चत्वार उपवेदा भवंति।यजुर्वेदस्य धनुरायुर्वेदः चिकित्साशास्त्रम्।ऋग्वेदस्योपवेदः१ धनुर्वेदो युद्धशास्त्रं यजुर्वेदस्योपवेदः
गांधर्ववेदः संगीतशास्त्रं सामवेदस्योपवेदः३ सामवेदस्य गांधर्ववेद उपवेदः ऋग्वेदस्यायुर्वेद उपवेदः अथर्ववेदस्य शास्त्रं चेत्या
द्यर्थशास्त्रं।नीतिशास्त्रं शस्त्रशास्त्रं विश्वकर्मादिशिल्पिशास्त्रं।अथर्ववेदस्योपवेदः४ भगवान्व्यासः स्कंदकुमारो वा इति।यइमे चत्वा
रो वेदा उक्तास्तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः।तत्तद्धर्मा सिदासिताद्विवर्णाः विधकः।प्रकारश्चोच्यते।ऋग्वेदस्वरूपमाह॥ऋ
ऋग्वेदः पद्मपत्रायताक्षः॥पद्मपत्रं कमलदलं तद्वद्दीर्घे नेत्रे यस्य सः।सुविभक्तग्रीवः सुविभक्ता रेखात्रयांकिता ग्रीवा यस्य सः।किं
चित्केशश्मश्रुः कुंचिताः वलीमतः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य स श्वेतवर्णो वर्णेन तु ककुवर्णो न श्वेतवर्णः श्वेतो वर्णो
यस्य सः कीर्तितं प्रमाणं तावन्ति षड्वितस्तीः पंचतावत्साकल्येन पंचवितस्ती न भवंति निह तत्प्रमाणं ऋग्वेदस्य कीर्तितं।उक्तम्।वितस्ति
शब्दो वितस्तिर्द्वादशांगुलः सार्द्धहस्तद्वयप्रमाणमित्यर्थः।यजुर्वेदस्वरूपमाह।यजुर्वेदः पिंगो पीते अक्षिणी यस्य सः।कृशंमध्ये कृशं
मध्ये कटिप्रदेशो यस्य सः।स्थूलगलकपोलः।स्थूलो गलकपोलौ यस्य सः ताम्रपीतवर्णः।ताम्रपीतस्ताम्रवदाचरितो रक्तो वर्णो यस्य
सः।पद्माक्षस्वर्णः।कृसवर्णो यस्य सः।प्रादेशमात्रं षट्दीर्घत्वेन दीर्घत्वेनोच्चत्वेन षट्प्रादेशमात्रः।षट्प्रादेशप्रमाणं यस्य सः।प्रमाण
मात्रस्येत्यर्थः।प्रादेशस्तु प्रदेशस्तु प्रदेशिन्येत्यभिधानोक्तेः।अंगुष्ठप्रदेशिन्यो विहितत्वात्।प्रमाणं प्रादेशो दशांगुलः।तादृशाः षट्प्रा
देशाः प्रमाणम्।षष्ट्यांगुलसार्द्धद्वयहस्तमित्यर्थः२ सामवेदस्वरूपमाह।सामवेदो नित्यं स्रग्वी स्रजो अस्य संतीति स्रग्वी।अस्माय।

CC-0. In Public Domain. Digitization by eGangotri

मेधास्त्रजाविति॥नित्यंपुष्प मालाधारी॥समयननियमवान्सुभयनः॥शुचिःपवित्रःशुचिर्वासः॥शुचिशुद्धेवासोवस्त्रंयस्य
शुद्धवस्त्रधारी॥शमीशमः॥शंतिरस्यास्तीतिशमीशान्तमनाः।दांतः।नियतबाह्येंद्रियः।वृहच्छरीरः वृहत्महत् शरीरंयस्यसः
।सामीदंडी।शमीनरोदंडोयस्यसः॥कातरनयनईसतद्देनयनेनेत्रेयस्यसः।वर्णेन आदित्यवर्णः।आदित्यस्यभानोर्वर्णइव
वर्णोयस्यसः॥नवारत्निमात्रः।नवअरत्निप्रमाणंयस्यसः सार्द्धचतुश्चयहस्त दीर्घइत्यर्थः।अथर्ववेदस्वरूपमाह।अथर्ववेदः
।चपुनः।तीक्ष्णः।उग्रः।प्रचंडः।क्रोधीरकामरूपो।कामेनरूपाणियस्यसः।स्वेच्छारूपधारी।विश्वात्माविश्वस्यात्माविश्वस्यक
र्त्तुः।स्रष्टा।चउपनिषद्वाहुल्यात्।क्षुद्रकर्माक्षुद्राणिकर्माणियस्यसः॥आभिचारकृत्याप्रयोजकमन्त्रबाहुल्यात् स्वशाखाध्या
यी।अथर्वणिविशेषःप्राज्ञश्चमहानीलोत्पलवर्णेनउत्पलंश्यामकमलंतथाद्ववर्णोयस्यश्यामसुंदरः।दशारत्निमात्रःदश
अरत्नयःप्रमाणंयस्यपंचहस्तप्रमाणइत्यर्थः।अथर्वेदानांगोत्रदेवतानांछंदांस्याह।ऋग्वेदस्यात्रेयसगोत्रम्।आत्रेयाः
सगोत्राःसमानगोत्रायस्यतत्।अत्रिगोत्रऋग्वेदइत्यर्थः।सोमदेवतासोमदेवत्यंयस्यतत्।गायत्रीछंदःगायत्रीछंदोयस्यत
त्।एवमग्रेपिव्याख्यानम्॥अथयजुर्वेदस्वरूपं।काश्यपगोत्रइन्द्रदैवत्यंत्रिष्टुप्छंदः।काश्यपगोत्रंइन्द्रदेवत्यंत्रिष्टुप्छंदस्को
यजुर्वेदइत्यर्थः॥अथसामवेदस्वरूपं।भरद्वाजगोत्रंरुद्रदैवत्यंजगतीछन्दः।अथर्ववेदस्यवैतानगोत्रंब्रह्मदेवत्यं अनुष्टुप्छंदः
४अथचतुर्वेदस्यफलस्तुतिमाह यइदमिति यःपुमानइदंवेदानां।नामरूपगोत्रंप्रमाणछंदोदेवत्यवर्णवर्णयति।नामादीनां
द्वंद्वेकवद्भावः।नामऋग्वेदादि १ रूपंपद्मपत्राक्षादि २ गोत्रंआत्रेयादि ३ प्रमाणंपंचवितस्त्यादि ४ छन्दोगायत्र्यादि ५ देवतंसो
मादि ६ वर्णश्वेतादिच ७ इत्यादियोजानातिसअविद्याविद्याहीनःसन्विद्यालभतेप्राप्नोति।जातिस्मरोथजायते।अथजन्मांतरे

Benares

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च॰व्यू॰ जातिर्जायते पूर्वजातिं स्मरति॥जन्मनिजन्मनिप्रतिजन्मवेदपारगोवेदपाठीभवति।अव्रतीव्रतीभवति अव्रतीव्रतहीनोपिव्र
२० तवान्भवति॥व्रतफलमाप्नोति॥अब्रह्मचारीब्रह्मचारीभवति॥ब्रह्मचर्यहीनोपिब्रह्मचर्यफलंप्राप्नोतीत्यर्थः॥शौनकाचा
र्यायनमः।पद्यार्तिः ग्रन्थसमाप्त्यर्थः॥श्रवणपठनफलमाह॥यइदमिति॥यःपुमान् इदंचरणव्यूहंगर्भिणींस्त्रियंश्रावये
त् सास्त्रीपुमांसंपुरुषलक्षणोपेतंपुत्रंजनयेत्॥यइदंचरणव्यूहंश्राद्धकालेपठेत्तत्श्राद्धंपितॄन् प्राप्नोतितर्पयतीत्यर्थः।
यइदंचरणव्यूहंमन्वहंपठेत् सपंक्तिपावनोभवति॥यस्यांद्विजाःपंक्त्यावास्ते यांसर्वांपुनातीत्यर्थः॥सचपुत्रान्प्रभृती
न् पुत्रादिकान्सप्तचपुनःसप्तवारान् जाद्यादीन् पित्रादींश्च आत्मानंचैवयंदशपुरुषान् तारयति॥यइदंनित्यशःपर्व
सुपर्वसु अष्टमीभूतदर्शपौर्णमासीसंक्रान्तिषुचपठतिसधूतपाप्माधूतोदूरीकृतोपाप्मापापं येनसएवशुचिःपवित्रः
सन्ब्रह्मभूयायब्रह्मभावायगच्छति।कर्मणिचेतिचतुर्थी।ब्रह्मभावमाप्नोतीत्यर्थः ५ इतिचरणव्यूहभाष्येचतुर्थःखंडः
॥त्रिदशागधरामितेगतेब्दे मधुमासेदशमीतिथौसुधांशौ।महिदासबुधोपरोपकृत्यैचरणव्यूहमिदंव्यकारिकाश्याम्
१ विद्वद्भिःप्रार्थितेनायंमहिदासद्विजन्मना॥चरणव्यूहवृत्तिश्चविहितेहमयाकृता २॥ इतिचरणव्यूहःसमाप्तः॥
वाराणसीप्रसादस्यनियोगेनमयत्नतः। काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः १।श्रीकाशीजीमहल्लेहौदकटो
राश्रीयुतबाबूवाराणसीप्रसादजीकेमकानमेंकाशीसंस्कृतमुद्रायंत्रमेंछपीजिन्कोलेनाहोयउन्कोउक्तस्थानमें राम
श्रीबाबूवाराणसीप्रसादजीकेपासयाकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपरमिलेगी॥श्रीसंवत् १९४२ २०

CC-0. In Public Domain. Digitization by eGangotri

Benares

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिचरणव्यूहव्याख्यासमाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४२७४ लेखकः व्यासः॥

॥अथ मार्गशीर्षमासमाहात्म्य प्रारंभः॥

Book ell
Benares

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं०
४२८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशायनमः ॥ श्रीलक्ष्मीनारायणाभ्यांनमः ॥ ॥ देवकीनंदनंकृष्णंजगदानंदका
रकम् ॥ भुक्तिमुक्तिप्रदंवंदेमाधवंभक्तवत्सलम् ॥१॥ सूतउवाच ॥ श्वेतद्वीपेसुखासीनंदेवदे
वंरमापतिम् ॥ चतुर्वक्त्रोनमस्कृत्यपप्रच्छपितरंतदा ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ हृषी
केशजगद्धातःपुण्यश्रवणकीर्तन ॥ पृष्टंयद्ब्रूहिदेवेशसर्वज्ञसकलेश्वर ॥ ३ ॥ मासानांमार्ग
शीर्षोऽहमित्युक्तंभवतापुरा ॥ तस्यमासस्यमाहात्म्यंज्ञातुमिच्छामितत्त्वतः ॥ ४ ॥ कोदे
वस्तस्यकिंदानंकथंस्नानंविधिश्चकः ॥ पुरुषैस्तत्रकिंकार्यंभोक्तव्यंकिंरमापते ॥ ५ ॥ वक्त
व्यंकिंतथापूजाध्यानमंत्रादिकंचयत् ॥ तत्रयत्क्रियतेकर्मतत्सर्वंब्रूहिमेऽच्युत॥६॥ ॥ श्री
भगवानुवाच ॥ साधुपृष्टंत्वयाब्रह्मन्सर्वलोकोपकारिणा ॥ यस्मिन्कृतेकृतंसर्वमिष्टापूर्तादि
कंभवेत् ॥ ७ ॥ सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् ॥ तत्फलंसमवाप्नोतिमार्गशीर्षेकृतेसु
त ॥ ८ ॥ तुलापुरुषदानाद्यैर्यत्फलंलभतेनरः ॥ तत्फलंप्राप्यतेपुत्रमाहात्म्यश्रवणात्किल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ यज्ञाध्ययनदानाद्यैःसर्वतीर्थावगाहनैः ॥ सन्यासेनचयोगेननाहंवश्योभवंनृणाम्
॥ १० ॥ स्नानेनदानेनचपूजनेनध्यानेनमौनेनजपादिभिश्च ॥ वश्योयथामार्गशिरेचमा
सितथानचान्येषुचगुह्यमुक्तम् ॥ ११ ॥ अन्यैर्धर्मादिभिःकृत्वागोपितंमार्गशीर्षकम् ॥ म
त्प्राप्तेःकारणंमत्वादेवैःसर्वनिवासिभिः ॥ १२ ॥ येकेचित्पुण्यकर्माणोममभक्तिपरायणाः
॥ तेषामवश्यंकर्तव्योमार्गशीर्षोमदापनः ॥ १३ ॥ मार्गशीर्षंनकुर्वंतियेनराभारताजिरे ॥
पापरूपाश्चतेज्ञेयाःकलिकालविमोहिताः ॥ १४ ॥ अष्टस्वपिचमासेषुयत्फलंलभतेनरः ॥
तत्फलंप्राप्यतेवत्समाघेमकरगेरवौ ॥ १५ ॥ माघाच्छतगुणंपुण्यंवैशाखेमासिलभ्यते ॥
तस्मात्सहस्रगुणितंतुलासंस्थेदिवाकरे ॥ १६ ॥ तस्मात्कोटिगुणंपुण्यंवृश्चिकस्थेदिवाक
रे ॥ मार्गशीर्षोधिकस्तस्मात्सर्वदाचममाप्रियः ॥ १७ ॥ उषस्युत्थाययोमर्त्यःस्नानंविधिव
दाचरेत् ॥ तुष्टोऽहंतस्ययच्छामिस्वात्मानमपिपुत्रक ॥ १८ ॥ अत्राप्युदाहरंतीदंशृणुपुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथानकम् ॥ नंदगोपोमहात्मावैख्यातोयोभूतलेऽभवत् ॥ १९ ॥ तस्यवैगोकुलेरम्येगोप
कन्याःसहस्रशः ॥ तासांचित्तंचमद्रूपेलग्नमासीत्पुराऽनघ ॥ २० ॥ तासांबुद्धिर्मयादत्तामा
र्गशीर्षावगाहने ॥ ततस्ताभिःकृतंस्नानंप्रातःकालेयथाविधि ॥ २१ ॥ पूजाकृताह
विष्यान्नंभुक्तंताभिःकृतानतिः ॥ एवंकृतेनविधिनाप्रसन्नोऽहंततोऽनघ ॥ २२ ॥ वरो
दत्तोमयात्मावैतासांतुष्टेनवैकिल ॥ तस्मान्नरैस्तुकर्तव्योमार्गशीर्षोयथाविधि ॥ २३ ॥
॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मविष्णुसंवादेमार्गशीर्षमाहात्म्येप्रथमोऽध्यायः ॥ १ ॥
॥ ब्रह्मोवाच ॥ ॥ त्वयोक्तोविधिसंयुक्तोमार्गशीर्षोमदापनः ॥ कोविधिस्तस्यदेवेशसर्वं
मेब्रूहिकेशव ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ रात्रावंतेसमुत्थायउपस्पृश्ययथाविधि
॥ नमस्कृत्वागुरुंस्वीयंसंस्मरेन्मामतंद्रितः ॥ २ ॥ सहस्रनामभिर्भक्त्याकीर्तयेद्वाग्यतःशु
चिः ॥ बहिर्ग्रामात्समुत्सृज्यमलमूत्रंयथाविधि ॥ ३ ॥ शौचंकृत्वायथान्यायमाचम्यप्रयतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचिः ॥ दंतधावनपूर्वंचस्नानंकृत्वायथाविधि ॥ ४ ॥ आदायतुलसीमूलमृदंतत्पत्रसंयुता
म् ॥ मूलमंत्रेणाभिमंत्र्यगायत्र्यावामहामते ॥ ५ ॥ मंत्रेणैवाङ्गुलिस्पर्शः स्नायादप्स्वघमर्ष
णम् ॥ अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंविधीयते ॥ ६ ॥ तीर्थंप्रकल्पयेद्विद्वान्मंत्रेणानेनमंत्रवि
त् ॥ ॐनमोनारायणायेतिमूलमंत्रउदाहृतः ॥ ७ ॥ दर्भपाणिस्तुविधिनाआचांतःपुरतः
शुचिः ॥ चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः ॥ ८ ॥ प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः
॥ विष्णुपादप्रसूतासिवैष्णवीविष्णुदेवता ॥ ९ ॥ त्राहिनस्त्वांनमस्तस्मादाजन्ममरणां
तिकम् ॥ तिस्रःकोट्योर्धकोटीचतीर्थानांवायुरब्रवीत् ॥ १० ॥ दिविभुव्यंतरिक्षेचतानिते
संतिजान्हवि ॥ नंदिनीत्येवतेनामदेवेषुनलिनीतिच ॥ ११ ॥ दक्षपुत्रीचविहगाविश्वगायो
गिनांमता ॥ विद्याधरीसुप्रसन्नातथालोकप्रसादिनी ॥ १२ ॥ क्षेमाचजान्हवीचैवशांता
शांतिप्रदायिनी ॥ एतानिपुण्यनामानिस्नानकालेसदापठेत् ॥ १३ ॥ सदासंनिहितातत्रगं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः

गात्रिपथगामिनी ॥ सप्तवाराभिजप्तेनकरसंपुटयोजितम् ॥ १४ ॥ मूर्ध्नीकृतांजलिर्भूयास्त्रि
चतुःपंचसप्तवा ॥ स्नानंकुर्यान्मृदातद्वदामंत्र्यान्तुविधानतः ॥१५॥ अश्वक्रांतेरथक्रांतेविष्णु
क्रांतेवसुंधरे ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ १६ ॥ उद्धृतासिवराहेणकृष्णेनशत
बाहुना ॥ नमस्तेसर्वभूतानांप्रभवारणिसुव्रते ॥१७॥ एवंस्नात्वाततःपश्चादाचम्यचविधा
नतः ॥ उत्थायवाससीशुक्लेकूलेवैपरिधायच ॥१८॥ आचम्यतर्पयेद्देवान्पितृंश्चैवऋषींस्त
था ॥ निष्पीड्यवस्त्रमाचम्यधौतवस्त्रेणवेष्टितः ॥ १९ ॥ विमलांमृत्तिकांरम्यामादायद्विज
सत्तम ॥ मंत्रेणैवाभिमंत्र्याथललाटादिषुवैष्णवः ॥ २० ॥ धारयेदूर्ध्वपुंड्राणियथासंख्यम
तंद्रितः ॥ ब्रह्मन्द्वादशपुंड्राणिब्राह्मणःसततंवहेत् ॥ २१ ॥ चत्वारिभूभृतांपुत्रपुंड्राणिद्वेवि
शांस्मृते ॥ एकपुंड्रंचनारीणांशूद्राणांचविधीयते ॥ २२ ॥ ललाटेउदरेचैववक्षोवैकुंठकूबरे
॥ कुक्ष्योर्बाह्वोःकर्णयोश्चपृष्ठेत्रिकेचवैशिरः ॥ २३ ॥ तिलकाद्वादशप्रोक्ताब्राह्मणस्यसदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनघ ॥ ललाटेहृदिबाह्वोश्चक्षात्रःपुंड्राणिधारयते ॥ २४ ॥ ललाटेहृदयेवैश्योभालेवैशूद्र
योषिताम् ॥ ललाटेकेशवंध्यायेन्नारायणमथोदरे ॥ २५ ॥ वक्षःस्थलेमाधवंचगोविंदंकं
ठकूबरे ॥ विष्णुंचदक्षिणेकुक्षौबाहौचमधुसूदनम् ॥ २६ ॥ त्रिविक्रमंकर्णमूलेवामनंवामपा
र्श्वके ॥ श्रीधरंवामबाहौचहृषीकेशंचकर्णके ॥ २७ ॥ पृष्ठेतुपद्मनाभःस्यात्रिकेदामोदरंन्य
सेत् ॥ तत्प्रक्षालनतोयेनवासुदेवंतुमूर्धनि ॥ २८ ॥ एवंकार्यंब्राह्मणस्यक्षत्रियस्योपधारये
त् ॥ ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा ॥ २९ ॥ बाह्वोश्चउभयोर्वत्सस्मरेद्धैमधुसूदनम् ॥
क्षत्रियस्यविधिःप्रोक्तोवैश्यकृत्यंनिशामय ॥ ३० ॥ ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा
॥ योषिच्छूद्रौस्मरेद्देवंकेशवंभालदेशके ॥ ३१ ॥ अनेनविधिनाकुर्यात्पुंड्राणिममतुष्टये ॥
श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा ॥ ३२ ॥ श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरंशुभम् ॥
एकांतिनोमहाभागाःसर्वलोकहितेरताः ॥ ३३ ॥ सांतरालंप्रकुर्वंतिपुंड्रंहरिपदाकृतिम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्येछिद्रेणसंयुक्तमेतद्धिहरिमंदिरम् ॥ ३४ ॥ ऊर्ध्वंसौम्यमृजुंसूक्ष्मंतुपार्श्वेसुमनोहरम् ॥
निरंतरालंयःकुर्यादूर्ध्वंपुंड्रंद्विजाधमः ॥ ३५ ॥ सहितत्रस्थितंलक्ष्म्यासहमांचव्यपोहति ॥
अच्छिद्रमूर्ध्वपुंड्रंतुयेकुर्वंतिद्विजाधमाः ॥ ३६ ॥ तेर्ललाटेशुनःपादंनिक्षिप्तंवैनसंशयः ॥ त
स्माच्छिद्रान्वितंपुंड्रंमहच्छिद्रंशुभान्वितम् ॥३७॥ धारयेद्ब्राह्मणोनित्यंहरिसालोक्यसि
द्धये ॥ ३८ ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येद्वितीयोऽध्यायः॥२॥ ॥ब्रह्मोवाच॥
॥ पुंड्रंकतिविधंकार्यंप्रब्रूहिममकेशव ॥ पुंड्राणांश्रवणेऽतीवकौतुकंममजायते ॥१॥ ॥श्री
भगवानुवाच ॥ ॥ शृणुपुत्रप्रवक्ष्यामिपुंड्रंचत्रिविधंस्मृतम् ॥ तुलसीमृत्स्नयासार्धंश्रीगो
पीचंदनेनच ॥ २ ॥ हरिचंदनतःकार्यंपुंड्रंतत्रविचक्षणैः ॥ श्रीकृष्णतुलसीमूलमृदमादाय
भक्तिमान् ॥ ३ ॥ धारयेदूर्ध्वपुंड्राणिहरिस्तत्रप्रसीदति ॥ गोपीचंदनमाहात्म्यंनिबोधगद
तोमम ॥ ४ ॥ योमृत्तिकांद्वारवतीसमुद्भवांकरेसमादायललाटपट्टके ॥ करोतिनित्यंपुरुषो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ध्वपुंड्रंक्रियाफलंकोटिगुणंतदाभवेत् ॥ ५ ॥ क्रियाविहीनंयदिमंत्रहीनंश्रद्धाविहीनंयदि
कालवर्जितम् ॥ कृत्वाललाटेयदिगोपिचंदनंप्राप्नोतितत्कर्मफलंसदाऽव्ययम् ॥६॥ गोपी
चंदनसंभवंसुरुचिरंपुंड्रंललाटेद्विजोनित्यंधारयतेयदिप्रतिदिनंरात्रौदिवासर्वदा ॥ यत्पुण्यं
कुरुजांगलेरविग्रहेमाघेप्रयागेतथातत्प्राप्नोतिततोधिकंममगृहेसंतिष्ठतेदेववत् ॥७॥ यस्मि
न्गृहेतिष्ठतिगोपिचंदनंभक्त्याललाटेमनुजोविभर्तिचेत् ॥ तस्मिन्गृहेऽहंनिवसामिसर्व
दाश्रियान्वितःकंसनिहाचतुर्मुख ॥८॥ योधारयेद्द्वारवतीसमुद्भवांमृत्स्नांपवित्रकांलिकल्म
षापहाम् ॥ नित्यंललाटेममंत्रसंयुतांयमंनपश्येदपिपापसंयुतः ॥ ९ ॥ यस्यांतकालेसु
तगोपिचंदनंबाह्वोर्ललाटेहृदिमस्तकेच ॥ प्रयातिलोकेकमलापतेर्ममगोबालघातीयदिब्र
ह्महास्यात् ॥ १० ॥ ग्रहानपीडंतिनरक्षसांगणायक्षःपिशाचोरगभूतनायकाः ॥ ललाटप
ट्टेसुतगोपिचंदनंसंतिष्ठतेयस्यममप्रभावात् ॥ ११ ॥ ऊर्ध्वपुंड्रमृजुंसौम्यंललाटेयस्यदृश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ सचांडालोपिशुद्धात्मापूज्यएवनसंशयः ॥ १२ ॥ अस्नातोयःक्रियाःकुर्यादशुचिःपाप
संयुतः ॥ गोपीचंदनसंपर्कात्पूतोभवतितत्क्षणात् ॥ १३ ॥ अशुचिर्वाप्यनाचारोमहापा
पंसमाचरेत् ॥ शुचिरेवभवेन्नित्यमूर्ध्वपुंड्रांकितोनरः ॥ १४ ॥ मत्प्रियार्थंशुभार्थंवारक्षार्थं
चतुरानन ॥ मत्पूजाहोमकेचैवसायंप्रातःसमाहितः ॥ मद्भक्तोधारयेन्नित्यमूर्ध्वपुंड्रंभयापह
म् ॥ १५ ॥ ऊर्ध्वपुंड्रधरोमर्त्योम्रियतेयदिकुत्रचित् ॥ श्वपाकोपिविमानस्थोममलोकेम
हीयते ॥ १६ ॥ ऊर्ध्वपुंड्रधरोमर्त्योगृहेयस्यान्नमश्नुते ॥ तदाविंशत्कुलंतस्यनरकादुद्धरा
म्यहम् ॥ १७ ॥ वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः ॥ ऊर्ध्वपुंड्रंमहाभागसयाति
परमांगतिम्॥१८॥ अनामिकाशांतिदोक्तामध्यमाऽऽयुष्करीभवेत् ॥ अंगुष्ठःपुष्टिदःप्रोक्त
स्तर्जनीमोक्षदायिनी ॥ १९ ॥ गोपीचंदनखंडंतुयोददातिचवैष्णवे ॥ कुलमष्टोत्तरंतेनता
रितंवैभवेच्छतम् ॥ २० ॥ यज्ञोदानंतपोहोमःस्वाध्यायापितृतर्पणम् ॥ व्यर्थंभवतितत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैमूर्ध्वपुंड्रंविनाकृतम् ॥ २१ ॥ यच्छरीरंमनुष्याणामूर्ध्वपुंड्रंविनाकृतम् ॥ तन्मुखंनैवपश्या
मिश्मशानसदृशंहितत् ॥ २२ ॥ ऊर्ध्वपुंड्रंप्रकुर्वीतमत्स्यकूर्मादिधारणम् ॥ कुर्याद्विष्णु
प्रसादार्थंमहाविष्णोरतिप्रियम् ॥ २३ ॥ यत्पुनःकलिकालंतुमत्पुरीसंभवांमृदम् ॥ मत्स्य
कूर्मांकितांचिह्नंगृहीत्वाकुरुतेनरः ॥ २४ ॥ देहेतस्यप्रविष्टंमांजानीहित्रिदशोत्तम ॥ तस्यमे
नांतरंकिंचित्कर्तव्यंश्रेयइच्छता ॥२५॥ ममावतारचिह्नानिदृश्यंतेयस्यविग्रहे॥मर्त्योमर्त्यो
नविज्ञेयःसनूनंमामकीतनुः ॥ २६ ॥ पापंसुकृतरूपंतुजायतेतस्यदेहिनः ॥ ममायुधानि
दृश्यंतेलिखितानिकलौयुगे ॥ २७ ॥ उभाभ्यामपिचिह्नाभ्यांयोंकितोमत्स्यमुद्रया॥कूर्मे
यामामकंतेजोविक्षिप्तंतस्यविग्रहे ॥ २८ ॥ शंखंचपद्मंचगदांरथांगंमत्स्यंचकूर्मंरचितंस्वदे
हे ॥ करोतिनित्यंसुकृतस्यवृद्धिंपापक्षयंजन्मशतार्जितस्य ॥ २९ ॥ नारायणायुधैर्नित्यं
चिह्नितोयस्यविग्रहः ॥ पापकोटिप्रयुक्तस्यतस्यकिंकुरुतेयमः ॥ ३० ॥ शंखोद्धारेचयत्प्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंवसतांकोटिजन्मभिः ॥ तत्फलंलभतेशंखेप्रत्यहंदक्षिणेभुजे ॥ ३१ ॥ यत्फलंपुष्करेप्रो
क्तंपुंडरीकाक्षदर्शनात् ॥ शंखोपरिकृतेपद्मेतत्फलंकोटिसंमितम् ॥ ३२ ॥ वामेभुजेगदाय
स्यलिखितादृश्यतेकलौ ॥ गदाधरोगयापुण्यंप्रत्यहंतस्ययच्छति ॥ ३३ ॥ यच्चानंदपुरेप्रो
क्तंचक्रस्वामीसमीपतः ॥ गदाचक्रेचलिखितेतत्फलंलिंगदर्शने ॥ ३४ ॥ ममायुधांकितंदे
हंगोपीचंदनमृत्स्नया ॥ प्रयागादिषुतीर्थेषुसगत्वाकिंकरिष्यति ॥ ३५ ॥ यदायदाप्रपश्येत
देहंशंखादिचिह्नितम् ॥ तदातदाप्रसन्नोहंपापंतस्यदहामिवै ॥ ३६ ॥ तिष्ठतेयस्यदेहेतुअ
होरात्रंदिनेदिने ॥ शंखचक्रगदापद्मंलिखितंसमदात्मकः ॥३७॥ नारायणायुधैर्युक्तंकृत्वा
त्मानंकलौयुगे ॥ यत्पुण्यंकर्मकुरुतेमेरुतुल्यंनसंशयः ॥ ३८ ॥ शंखायुधांकितोभक्त्यायः
श्राद्धंकुरुतेसुत ॥ विधिहीनंतुसंपूर्णंपितॄणांदत्तमक्षयम् ॥ ३९ ॥ यथाग्निर्दहतेकाष्ठंवायुना
प्रेषितोभृशम् ॥ तथादह्यंतिपापानिदृष्ट्वामेआयुधानिवै ॥ ४० ॥ ममनामांकितांमुद्रामष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षरसमन्विताम् ॥ शंखादिस्वायुधैर्युक्तांस्वर्णरौप्यमयीमपि ॥ ४१ ॥ धत्तेभगवतोयस्तु
कलिकालेविशेषतः ॥ प्रल्हादस्यसमोज्ञेयोनान्यथाममवल्लभः ॥ ४२ ॥ यस्यनारायणी
मुद्रादेहंशंखादिचिन्हितम् ॥ धात्रीफलैः कृतामालातुलसीकाष्ठसंभवा ॥ ४३ ॥ द्वाद
शाक्षरमंत्रस्तुनियुक्तानिकलेवरे ॥ आयुधानिचविप्रस्यमत्समःसचवैष्णवः ॥४४॥ शंखां
किततनुर्विप्रोभुंक्तेवैयस्यवेश्मनि ॥ तदन्नंस्वयमश्नामिपितृभिःसहपुत्रक ॥ ४५ ॥
कृष्णायुधांकितंहष्ट्वासन्मानंनकरोतियः ॥ द्वादशाब्दार्जितंपुण्यंबाष्कलेयायगच्छति ॥
॥ ४६ ॥ कृष्णायुधांकितोयस्तुश्मशानेम्रियतेयदि ॥ प्रयागेयागतिःप्रोक्तासागतिस्त
स्यमानद ॥ ४७ ॥ ममायुधैःकलौनित्यंमंडितोयस्यविग्रहः ॥ तत्राश्रमंप्रकुर्वंति
विबुधावासवादयः ॥ ४८ ॥ यःकरोतिचमेपूजांममशस्त्रांकितोनरः ॥ अपराधसहस्राणि
नित्यंतस्यहराम्यहम् ॥ ४९ ॥ कृत्वाकाष्ठमयंबिंबंममशस्त्रैःसुचिन्हितम् ॥ योवाअंकयतेदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंतत्समोनास्तिवैष्णवः ॥ ५० ॥ अष्टाक्षरांकितामुद्रायस्यधातुमयीकरे ॥ शंखपद्मादिभि
र्युक्तापूज्यतेसौसुरासुरैः ॥ ५१ ॥ धृतानारायणीमुद्राप्रह्लादेनपुराकरे ॥ विभीषणेनबलि
नाध्रुवेणचशुकेनच ॥ ५२ ॥ मांधात्राद्यंबरीषेणमार्कंडेयमुखैर्द्विजैः ॥ शंखादिचिह्नितैःशस्त्रै
र्देहंकृत्वाचमानद ॥ ५३ ॥ एवमाराध्यमांप्राप्तंसमीहितफलंमहत् ॥ गोपीचंदनमृत्स्नाच
लिखितोयस्यविग्रहः ॥ ५४ ॥ शंखचक्रादिपद्मांकोदेहतस्यवसाम्यहम् ॥ सौवर्णंराज
तंताम्रंकांस्यमायसमेवच ॥ ५५ ॥ चक्रंकृत्वातुमेधावीधारयीतविचक्षणः ॥ द्वादशारंतुष
ट्कोणंवलित्रयविभूषितम् ॥ ५६ ॥ एवंसुदर्शनंचक्रंकारयीतविचक्षणः ॥ उपवीतादिवद्धा
र्याःशंखचक्रगदाःसदा ॥५७॥ ब्राह्मणैश्चाविशेषेणवैष्णवैश्चविशेषतः॥ उपवीतंशिखायद्वच
क्रंलांछनसंयुतम् ॥५८॥ चक्रलांछनहीनस्याविप्रस्याविफलंभवेत् ॥ ममचक्रांकितोदेहःप
वित्रइतिवैश्रुतिः ॥ ५९ ॥ चक्रांकितायदातव्यंहव्यंकव्यंविचक्षणैः ॥ ममचक्राकंकवचम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 भेद्यंदेवदानवैः ॥ ६० ॥ अजेयःसर्वभूतानांशत्रूणांरक्षसामपि ॥ ममचक्रांककवचंशरीरेय
स्यतिष्ठति ॥ ६१ ॥ नाशुभंविद्यतेतस्यगृहपुत्रादिकस्यहि ॥ दक्षिणेचभुजेविप्रोबिभृयाद्वै
 सुदर्शनम् ॥ ६२ ॥ सव्येचशंखंबिभृयादितिवेदविदोविदुः ॥ तत्तन्मंत्रेणमंत्रज्ञःप्रतिष्ठाप्य
पृथक्पृथक् ॥ ६३ ॥ ललाटेचगदाधार्यामूर्ध्निचापंशरस्तथा ॥ नंदकंचैवहृन्मध्येशंखचक्रेभु
जद्वये ॥ ६४ ॥ तस्मात्सर्वप्रयत्नेनचक्रादीन्धारयेत्सदा ॥ धारणानंतरंब्रूयात्तत्रवैवंद्विजो
त्तम ॥ ६५ ॥ पुत्रमित्रकलत्रादिर्यःकश्चिन्मत्परिग्रहः ॥ सहदेहेनसर्वोसौविष्णुप्रीत्यैमया
र्पितः ॥६६॥ पश्चात्स्वधर्ममास्थायातिष्ठेदाजीवनंमम ॥ भक्त्याचाव्यभिचारिण्यासर्वदा
ऽऽप्तमनोरथः ॥६७॥ शंखचक्रांकितंह्वाष्ट्वायेनिंदंतिनराधमाः॥अवलोक्यमुखंतेषामादित्य
मवलोकयेत् ॥ श्रीकृष्णनामचोच्चार्यशुद्धोभवतिनान्यथा ॥ ६८ ॥ ॥ इतिश्रीस्कंदपुरा
णेमार्गशीर्षमाहात्म्येतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ तप्तचक्रांकितंक्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाह्यात्मानमथदीक्षितम् ॥पद्माक्षतुलसीमालेफलंकिंब्रूहिकेशव ॥ १ ॥ ॥ श्रीभगवा
नुवाच ॥ ॥तुलसीकाष्ठसंभूतांयोमालांवहतेद्विजः ॥ अप्यशौचोप्यनाचारोमामेवैतिन
संशयः ॥२॥धात्रीफलकृतामालातुलसीकाष्ठसंभवा ॥ दृश्यतेयस्यदेहेतुसवैभागवतोनरः
॥ ३ ॥ तुलसीदलजांमालांकंठस्थांवहतेतुयः॥ ममोत्तीर्णांविशेषेणसनमस्योदिवौकसा
म् ॥ ४ ॥ तुलसीदलजांमालांधात्रीफलकृतामपि ॥ ददातिपापिनांमुक्तिंकिंपुनर्ममसेवि
नाम्॥५॥तुलसीदलजांमालांममोत्तीर्णांवहेत्तुयः॥ पत्रेपत्रेऽश्वमेधानांदशानांलभतेफलम्
॥ ६ ॥ तुलसीकाष्ठसंभूतांयोमालांवहतेनरः ॥ फलंयच्छाम्यहंवत्सप्रत्यहंद्वारकोद्भवम्
॥ ७ ॥ निवेद्यभक्त्यामांमालांतुलसीकाष्ठसंभवाम् ॥ वहतेयोनरोभक्त्यातस्यवैनास्तिपा
तकम् ॥ ८॥ सदाप्रीतमनास्तस्यअहंप्राणवरोहिसः ॥ तुलसीकाष्ठसंभूतांयोमालांवहतेन
रः ॥ ९ ॥ प्रायश्चित्तंनतस्यास्तिनाशौचंतस्यविग्रहे ॥ तुलसीकाष्ठसंभूतंशिरसःकाष्ठभूषणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १० ॥ बाहौकरेचमर्त्यस्यदेहेयस्यसमेप्रियः ॥ तुलसीकाष्ठमालाभिर्भूषितःपुण्यमाच
रेत् ॥ ११ ॥ पितॄणांदेवतानांचपुण्यंकोटिगुणंभवेत् ॥ तुलसीकाष्ठमालांतुप्रेतराजस्यदू
तकाः ॥ १२ ॥ दृष्ट्वानश्यंतिदूरेणवाताद्धूतंयथादलम् ॥ यद्गृहेतुलसीकाष्ठंपत्रंशुष्कमथार्द्र
कम् ॥ १३ ॥ भवंतितद्गृहेनैवपापंसंक्रमतेकलौ ॥ तुलसीकाष्ठमालाभिर्भूषितोभ्रमतेभुवि
॥ १४ ॥ दुःस्वप्नंदुर्निमित्तंचनभयंशात्रवंक्वचित् ॥ धारयंतिनयेमालांहैतुकाःपापबुद्धयः
॥ १५ ॥ नरकान्ननिवर्तंतेदग्धाःकोपाग्निनामम ॥ तस्माद्धार्याप्रयत्नेनमालातुलसिसंभवा
॥ १६ ॥ पद्माक्षनिर्मिताभक्त्याफलैर्धात्र्याःसुपुण्यदा ॥ तदूर्ध्वंपुंड्रशंखाद्यैर्युक्तस्तुलसिमू
लके ॥ १७ ॥ संध्योपास्त्यादिकंकुर्यात्कुशपाणिर्हिमांस्मरन् ॥ कृतसंध्यादिकोभक्तस्त
तःसंपूजयेच्चमाम् ॥ १८ ॥ गुरुश्चेत्तत्रवर्तेतआदौगत्वानमेद्गुरुम् ॥ किंचिद्दत्वोपायनंवदंड
वत्प्रणमेन्मुदा ॥ १९ ॥ आचम्यैकाग्रमनसापूजामंडपमाविशेत् ॥ उपविश्यासनेरम्येक्व

CC-0. In Public Domain. Digitization by eGangotri

ष्णाजिनकुशोत्तरे ॥ २० ॥ सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत् ॥ प्राणायामत्रयंकृ
त्वामंत्रेणचाजितेंद्रियः ॥ २१ ॥ उदङ्मुखस्ततःकृत्वाहृत्पंकजमनुत्तमम् ॥ विकासंतस्य
कुर्वीतविज्ञानरविणाहृदि ॥ २२ ॥ कर्णिकायांन्यसेत्सूर्येंदुशशिमग्निमनुक्रमात् ॥ त्रयंत्रया
त्मकेतस्मिन्नाचिंतयेद्वैष्णवोनरः ॥ २३ ॥ नानारत्नमयंपीठंतेषामुपरिविन्यसेत् ॥ तस्मि
न्मृदुश्लक्ष्णतरंबालार्कसदृशद्युतिं ॥२४॥ अष्टैश्वर्यदलंपद्मंमंत्राक्षरमयंन्यसेत् ॥ तस्मिन्देवं
समासीनंकोटिसीतांशुसन्निभं ॥ २५ ॥ चतुर्भुजंमहापद्मशंखचक्रगदाधरम् ॥ पद्मपत्रावि
शालाक्षंसर्वलक्षणलक्षितम् ॥ २६ ॥ श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रान्वितंचमाम् ॥ वि
चित्राभरणैर्युक्तंदिव्यमंडनमंडितम् ॥ २७ ॥ दिव्यचंदनलिप्तांगंदिव्यपुष्पोपशोभितम्
॥ तुलसीकोमलदलवनमालाविभूषितम् ॥ २८ ॥ कोटिबालार्कसदृशंकांतंदिव्यश्रिया
सह॥सर्वलक्षणलक्षिण्यासमाश्लिष्टतनुंशिवम् ॥२९॥ एवंध्यात्वाजपेन्मंत्रंसमाहितमनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचिः ॥ सहस्रंशतवारंवायथाशक्तिजपेन्मनुम् ॥ ३० ॥ मनसैवार्चनंकृत्वाततोविधि
वदाचरेत् ॥ संप्रदायानुरोधेनशंखंसंस्थाप्यममाग्रतः ॥ ३१ ॥ दूर्वांकुरैश्चपुष्पैश्चगंधो
देनचपूरितम् ॥ दक्षिणेगंधपुष्पाणांपात्रंस्थाप्यंचदैशिकैः ॥ ३२ ॥ वामभागेन्यसे
त्कुंभंवस्त्रपूतंसुवासितम् ॥ पुरतोममघंटांचदिक्षुदीपान्नियोजयेत् ॥ ३३ ॥ अन्यत्सर्वंसा
धनंचयथास्थानेषुविन्यसेत् ॥ अर्घ्यपाद्याचामनीयमधुपर्कस्यकारणात् ॥ ३४ ॥ विन्यसेत्पुर
तोमह्यंचत्वार्यमत्रकाणिवै ॥ सिद्धार्थाक्षतपुष्पाणिकुशाग्रंतिलचंदनम् ॥ ३५ ॥ फलंयवाश्चतु
र्वक्त्रअर्घ्यपात्रेविनिक्षिपेत् ॥ दूर्वाविष्णुपदीश्यामापद्मंचैवचतुर्थकम् ॥ ३६ ॥ पाद्यपात्रेन्यसे
त्पुत्रदेशिकोममतुष्टये ॥ कंकोलंचलवंगंचफलंमालतिसंभवम् ॥ ३७ ॥ कुर्याद्भैश्रद्धयापुत्रपा
त्रेआचमनीयके ॥ गव्यंपयोदधिमधुघृतंखंडसमन्वितम् ॥ ३८ ॥ मधुपर्कस्यपात्रेवैदद्याद्भै
श्रद्धयार्चकः ॥ उक्तानांद्रव्यजातीनामलाभेपत्रपुष्पयोः ॥ ३९ ॥ तत्तद्भावनयाकुर्यात्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदाविधिकोविदः ॥ करन्यासंततःकुर्यादंगन्यासंतथैवच ॥ ४० ॥ पंचांगंवाषडंगंवाविन्य
सेत्संप्रदायतः ॥ ममानुस्मरणंकार्यमात्मानंमत्समंस्मरेत् ॥४१॥ पूजारंभेचतुर्वक्त्रमंगलं
तुपठेन्नरः ॥ अथसंपूजयेच्छंखंपांचजन्यंममप्रियम् ॥ ४२ ॥ यस्यसंपूजनाद्वत्सआनंदःपर
मोमम ॥ शंखस्यपूजनेवत्समंत्रानेतानुदीरयेत् ॥ ४३ ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृ
तःकरे ॥ निर्मितःसर्वदेवैश्चपांचजन्यनमोस्तुते ॥४४॥ तवनादेनजीमूतावित्रसंतिसुराऽसु
राः ॥ शशांकायुतदीप्ताभपांचजन्यनमोस्तुते ॥ ४५ ॥ गर्भादेवारिनारीणांविलीयंतेसह
स्रधा ॥ तवनादेनपातालेपांचजन्यनमोस्तुते ॥ ४६ ॥ दर्शनेनैवशंखस्यकिंपुनःस्पर्शनेकृ
ते ॥ विलयंयांतिपापानिहिमवद्भास्करोदये ॥ ४७ ॥ नत्वाशंखंकरेधृत्वामंत्रैरेभिस्तुवै
ष्णवः ॥ यःस्नापयतिमांभक्त्यातस्यपुण्यमनंतकम् ॥ ४८ ॥ सुवासितेनतैलेनकुर्यादभ्यंज
नंततः ॥ कस्तूर्यांचंदनेनैवकुर्यादुद्वर्तनादिकम् ॥४९॥ सुगंधावासितैस्तोयैःस्नाप्यमंत्रयुतैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 शुभैः ॥ अर्घ्यंदत्वाततोवत्सपाद्यमाचमनीयकम् ॥ ५० ॥ मधुपर्कंततोदद्यादथसर्वोपचा
रकान् ॥ वस्त्रैराभरणैर्दिव्यैरलंकृत्ययथाविधि॥५१॥पुष्पैःसंपूजयेत्पीठंतत्रदेवंनिधायच॥
 वस्त्रालंकारगंधादीनर्पयेच्छ्रद्धयामम ॥ ५२ ॥ नैवेद्यंविविधंदद्यात्पायसापूपमिश्रितम् ॥
सकर्पूरंचतांबूलंभक्त्याचैवनिवेदयेत् ॥ ५३ ॥ सुरभीणिचपुष्पाणिभक्त्यासम्यक्निवेद
येत् ॥ धूपंदशांगमष्टांगंदीपंचसुमनोहरम् ॥ ५४ ॥ परिणीयप्रणम्याथस्तुत्वास्तुतिभिरा
दरात् ॥ शाययित्वातुपर्यंकेमंगलार्घ्यंनिवेदयेत् ॥ ५५ ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमा
हात्म्येचतुर्थोध्यायः ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ पंचामृतस्यस्नपनाद्यत्फलंलभतेहरेः॥
शंखोदकेनयत्किंचित्तन्मेब्रूह्यजिताच्युत ॥ १ ॥ श्रीभगवानुवाच ॥ ॥ क्षीरस्नानं
प्रकुर्वंतियेनराममममूर्द्धनि ॥ शताश्वमेधजंपुण्यंबिंदुनाबिंदुनास्मृतम् ॥ २ ॥ क्षीराद्दशगुणंद
ध्नाघृतेनैवदशोत्तरम्॥ मधुनातद्दशगुणंसितयातुततोधिकम् ॥ गंधपुष्पोदकेमंत्रंसर्वोत्कृष्टंप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शस्यते ॥ ३ ॥ द्वादश्यांपंचदश्यांवागव्येनपयसामम ॥ स्नापनंदेवशार्दूलमहापातकनाश
नम् ॥ ४ ॥ दध्यादीनांविकाराणांक्षीरतःसंभवोयथा ॥ तथैवशेषकामानांक्षीरस्नपनतो
मम ॥ ५ ॥ क्षीरस्नानेनसौभाग्यंदध्नामिष्टान्नभोजनम् ॥ घृतेनस्नापयेद्योमांनरोममपुरंव्र
जेत् ॥ ६ ॥ स्नानंशर्करयायस्तुकारयेन्मार्गशीर्षके ॥ सराजाजायतेलोकेपुनःस्वर्गादि
हागतः ॥ ७ ॥ गजाश्वरथसंपूर्णंसराज्यंलभतेभुवि ॥ कारयेन्मार्गशीर्षेवैयःक्षीरस्नाप
नंमम ॥ ८ ॥ स्वर्गेलोकेसजयतिचंद्ररुद्रेंद्रमारुतान् ॥ क्षीरस्नानंपरंश्रेष्ठंमार्गशीर्षेचपुत्रक
॥ ९ ॥ क्षीरस्नपनमाहात्म्यंवर्चस्कंपुष्टिवर्धनम् ॥ दौर्भाग्यंविलयंयातिक्षीरस्नानेनमेसुत
॥ १० ॥ स्नापयेन्मार्गशीर्षेमांयोवैपंचामृतेनतु ॥ सनाशोच्योभवेज्जंतुर्बंधुनाभुविमानद
॥ ११ ॥ कपिलाक्षीरमादाययःस्नापयतिमांसुत ॥ कपिलाशतदानस्यफलंप्राप्नोतिमान
वः १२ ॥ शंखेतीर्थोदकंकृत्वायःस्नापयतिदेशिकः ॥ बिंदुनापिसहोमासेस्वकुलंतारयेद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ १३ ॥ कापिलंक्षीरमादायशंखेकृत्वाचमानवः ॥ यःस्नापयतिमांभक्त्यासर्वतीर्थ
फलंलभेत् ॥ १४ ॥ शंखेकृत्वातुपानीयंसाक्षतंकुशसंयुतम् ॥ यःस्नापयेत्सहोमासेसर्वती
र्थफलंलभेत् ॥ १५ ॥ शंखाष्टकेनयःस्नानंकारयेन्मार्गशीर्षके ॥ भक्त्याभगवतःश्रेष्ठोमम
लोकेमहीयते ॥ १६ ॥ शंखषोडशकेनाथयःस्नापयतिमेसुत ॥ सपापमुक्तःसुचिरंस्वर्गलो
केमहीयते ॥ १७ ॥ चतुर्विंशतिसंख्याकैःशंखैर्यःस्नापयेच्चमाम् ॥ इंद्रलोकेचिरंस्थित्वा
सराजाभुविजायते ॥ १८ ॥ शंखाष्टोत्तरशतेनैवस्नापयेन्मार्गशीर्षके ॥ शंखेशंखेसुवर्णस्यफ
लंप्राप्नोतिमानवः ॥ १९ ॥ मार्गशीर्षेभक्तिमान्यःकृत्वाशंखध्वनिंहिमाम् ॥ स्नापयेत्पित
रस्तस्यस्वर्गेतावत्प्रतिष्ठिताः ॥ २० ॥ अष्टोत्तरसहस्रंतुशंखस्नानंतुयश्चरेत् ॥ सगणोमुक्ति
माप्नोतियावदाभूतसंप्लवम् ॥ २१ ॥ नित्यंसंस्नापयेद्योमांशंखेनसुरसत्तम ॥ गंगास्नानफ
लंप्राप्यनित्यंनंदतिदेववत् ॥ २२ ॥ शंखेतोयंसमादाययःस्नापयतिमांसुत ॥ नमोनाराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेत्युक्त्वामुच्यतेसर्वकिल्बिषैः ॥ २३ ॥ कृत्वापादोदकंशंखेवैष्णवानांमहात्मनाम् ॥ यो
ददातितिलोन्मिश्रंचांद्रायणफलंलभेत् ॥ २४ ॥ नाद्यंतडागजंवापिवापीकूपादिकंचयत् ॥
गांगेयंजायतेसर्वंजलंशंखकृतंचयत् ॥ २५ ॥ गृहीत्वाममपादांबुशंखेकृत्वातुवैष्णवः ॥
योवहेच्छिरसानित्यंसमुनिस्तपतांवरः ॥ २६ ॥ त्रैलोक्येयानितीर्थानिममचैवाज्ञयासु
त ॥ शंखेतानिवसंतीहतस्माच्छंखोवरःस्मृतः ॥ २७ ॥ सांबुंशंखंकरेधृत्वामंत्रैरेतैस्तुवैष्ण
वः ॥ यःस्नापयेन्मार्गशीर्षेतुष्टस्तस्यभवाम्यहम् ॥ २८ ॥ शंखादौचंद्रदैवत्यंकुक्षौवरुणदेवता ॥
पृष्ठेप्रजापतिश्चैवअग्रेगंगासरस्वती ॥ २९ ॥ तेषामुच्चारपूर्वंतुस्नापयेन्मामतंद्रितः ॥ तस्य
पुण्यस्यसंख्यांवैकर्तुंनैवसुरासुराः ॥ ३० ॥ पुरतोममदेवेशसपुष्पःसजलाक्षतः ॥ शंखस्त्व
भ्यर्चितस्तिष्ठेत्तस्यश्रीःसर्वतोमुखी ॥ ३१ ॥ विलेपनेनसंपूर्णंशंखंकृत्वातुमांभजेत् ॥ तदा
मेपरमाप्रीतिर्भवेद्वैशतवार्षिकी ॥ ३२ ॥ शंखेकृत्वातुपानीयंसपुष्पंसजलाक्षतम् ॥ अर्घ्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ददातियोमांवैतस्यपुण्यमनंतकम् ॥ ३३ ॥ अर्घ्यंकृत्वास्वयंशंखेयःकरोतिप्रदक्षिणाम् ॥
प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा ॥३४॥भ्रामयित्वाचमेमूर्ध्निमंदिरंशंखवारिणा॥प्रोक्षये
 द्वैष्णवो यस्तुनाशुभंतद्गृहेभवेत् ॥३५॥नाधयोनक्लमस्तस्यनारकंनभयंकचित्॥तस्यपादो
दकंशंखेकृतंमूर्धानमालभेत्॥३६॥ग्रहारक्षांसिकूष्मांडपिशाचोरगदानवाः॥दृष्ट्वाशंखोदकं
मूर्ध्निविद्रवंतिदिशोदश ॥ ३७॥ वादित्रनिनदैस्स्तवैर्गीतमंगलनिःस्वनैः॥यःस्नापयतिमांभ
त्त्याजीवन्मुक्तोभवेद्विसः॥३८॥इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येपंचमोऽध्यायः॥५
॥ ब्रह्मोवाच ॥ ॥ घंटानादस्यमाहात्म्यंचंदनस्यतथाऽच्युत ॥ यत्फलंलभतेस्वामिंस्त
त्सर्वंब्रूहितत्त्वतः ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ स्नानार्चनक्रियाकालेघंटानादंकरो
तियः ॥ पुरतोममदेवेशतस्यपुण्यफलंशृणु ॥ २ ॥ वर्षकोटिसहस्राणिवर्षकोटिशतानिच
॥ वसतेमामकेलोकेअप्सरोगणसेवितः ॥ ३ ॥ सर्ववाद्यमयीघंटासर्वदेवमयीयतः ॥ तस्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सर्वप्रयत्नेनघंटानादंतुकारयेत् ॥ ४ ॥ सर्ववाद्यमयीघंटासर्वदाममवल्लभा ॥ वादनाल्लभ
तेपुण्यंयज्ञकोटिशतोद्भवम् ॥ ५ ॥ घंटानादःसदाकार्यःपूजाकालेविशेषतः ॥ मन्वंतरस
हस्राणिमन्वंतरशतानिच ॥ ६ ॥ प्रीतोभवामिसततंघंटानादेनपुत्रक ॥ भेरीशंखनिनादे
नघंटानादान्वितेनच ॥ ७॥ मृदंगशंखेनयुतंप्रणवेनसमन्वितम् ॥ अर्चनंममदेवेशसततंमो
क्षदंनृणाम् ॥८॥यत्रतिष्ठेतपुरतोघंटानादान्विताभम॥अर्चितावैष्णवैर्यत्रतत्रमांविद्धिपुत्रक
॥ ९ ॥ वैनतेयांकिताघंटासुदर्शनयुताऽथवा ॥ ममाग्रेस्थापयेद्यस्तुतस्यपापंहराम्यहम्॥
॥ १० ॥ मदीयार्चनवेलायांघंटानादंकरोतियः ॥ नश्यंतितस्यपापानिशतजन्मार्जिता
न्यपि ॥ ११ ॥ स्वापकालेप्रकुर्वीतघंटानादंस्वभक्तितः ॥ ममैवार्चनवेलायांफलंकोटिगु
णोद्भवम् ॥ १२ ॥ येमामर्चंतिदेवेशंसुपर्णोपरिसंस्थितम् ॥ शंखपद्मगदायुक्तंसचक्रंचाश्रि
यायुतम् ॥ १३ ॥ किंकरिष्यंतितेतीर्थैर्देवतानांचदर्शनैः ॥ किंयज्ञैःकिंव्रतैर्वापिकिंदानैःकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुपोषणैः ॥ १४ ॥ मूर्तिर्नारायणीयत्रमामकीगरुडोपरि ॥ स्थापयित्वाकलौयातिकल्प
कोटिपदंमम ॥ १५ ॥ ममाग्रेस्थापयेद्यस्तुप्रासादेऽथगृहेऽथवा॥तीर्थकोटिसहस्राणितत्र
तिष्ठंतिदेवताः ॥ १६ ॥ यस्तुपूजयतेधन्यागरुडोपरिसंस्थितम् ॥ एकादश्यांतथारात्रौवा
सनासंयुतोमम ॥ १७ ॥ कृत्वागीतंचनृत्यंचतारयेन्नरकात्पितॄन् ॥ पुनश्चकथयिष्यामि
शृणुघंटामहंसुत ॥ १८ ॥ ममनामांकिताघंटापुरतोयाचतिष्ठति ॥ अर्चितावैष्णवीयत्रतत्र
मांविद्धिपुत्रक ॥ १९ ॥ यस्तुवादयतेघंटांवैनतेयविचिह्निताम् ॥ धूपनीराजनेस्नानेपूजा
कालेविलेपने ॥ २० ॥ ममाग्रेप्रत्यहंवत्सप्रत्येकंलभतेफलम् ॥ मखायुतंगोयुतंचचांद्राय
णशतोद्भवम् ॥ २१ ॥ विधिबाह्यकृतापूजासफलाजायतेनृणाम् ॥ घंटानादेनतुष्टोहंप्रय
च्छामिस्वकंपदम् ॥ २२ ॥ नागारिचिह्निताघंटारथांगेनसमन्विता ॥ वादनात्कुरुतेनाशं
जन्मकोटिभयस्यवै ॥ २३ ॥ गरुडेनांकितांघंटांदृष्ट्वाहंप्रत्यहंमुदा ॥ प्रीतिंकरोमिदेवेशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मींप्राप्ययथाऽधनः ॥ २४ ॥ घंटादंडस्यशिरसिसुचक्रंस्थापयेत्तुयः ॥ मत्प्रियंवैनते
यंवास्थापितंभुवनत्रयम् ॥ २५ ॥ घंटानादंसचक्रंचअंतकालेशृणोतियः ॥ पापकोटियुत
स्यापिनश्यंतियमकिंकराः ॥ २६ ॥ सर्वदोषाःप्रणश्यंतिघंटानादेनवैसुत ॥ देवतानांस
रुद्राणांपितृणामुत्सवोभवेत् ॥ २७ ॥ अभावेवैनतेयस्यचक्रस्यापिनसंशयः ॥ घंटानादे
नभक्तानांप्रसादंप्रकरोम्यहम् ॥ २८ ॥ गृहेयस्मिन्भवेन्नित्यंघंटानागारिसंयुता ॥ सर्पा
णांनभयंतत्रनाग्निविद्युत्समुद्भवम् ॥ २९ ॥ यस्यघंटागृहेनास्तिशंखोनपुरतोमम ॥ कथ
भागवतोज्ञेयःकथंभवतिवल्लभः ॥ ३० ॥ घंदनस्यप्रवक्ष्यामिमाहात्म्यंतवपुत्रक ॥ य
स्मिन्कृतेभवेत्प्रीतिर्ममात्यंतंनसंशयः ॥ ३१ ॥ सचंदनंसकुसुमंकर्पूरागरुमिश्रितम् ॥ मृग
नाभिसमायुक्तंजातीफलसमन्वितम् ॥३२॥ तुलसीचंदनोपेतंममात्यंतसुखावहम् ॥ योद
दातिहिमांनित्यंतुलसीकाष्ठसंभवम् ॥ ३३ ॥ युगानिवसतेस्वर्गेह्यनंतानिनरोत्तमः ॥ म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाविष्णोःकलौभक्त्यादत्वातुलसिचंदनम् ॥ ३४ ॥ अर्चयेन्मालतीपुष्पैर्नभूयःस्तनपोभ
वेत् ॥ तुलसीकाष्ठसंभूतंचंदनंयच्छतेमम ॥ ३५ ॥ दहामिपातकंसर्वपूर्वजन्मशतैःकृतम् ॥
सर्वेषामेवदेवानांतुलसीकाष्ठचंदनम् ॥ ३६ ॥ पितृणांचविशेषेणसदाऽभीष्टंयथामम॥श्री
खंडंचंदनंतावच्छ्रेष्ठंकृष्णागुरुंतथा ॥ ३७ ॥ यावन्नदृश्यतेपुण्यंतुलसीकाष्ठचंदनम् ॥ ताव
त्कस्तूरिकामोदःकर्पूरस्यसुगंधिता ॥ ३८ ॥ यावन्नदीयतेमह्यंतुलसीकाष्ठचंदनम् ॥ कलौ
यच्छंतियेमह्यंतुलसीकाष्ठचंदनम् ॥ मार्गशीर्षेशुभेमासेतेकृतार्थानसंशयः ॥ ३९ ॥ योहि
भागवतोभूत्वाकलौतुलसिचंदनम् ॥ नार्पयेद्दैसहोमासेनासौभागवतोनरः ॥ ४० ॥ कुंकु
मागुरुश्रीखंडकर्दमैर्ममविग्रहम् ॥ आलिंपेद्दैसहोमासेकल्पकोटिवसेद्दिवि ॥ ४१ ॥ कर्पू
रागुरुमिश्रेणचंदनेनानुलिंपयेत् ॥ मृगदर्पविशेषेणअभीष्टंचसदामम ॥ ४२ ॥ विलेपय
तियोमांवैशंखेकृत्वातुचंदनं ॥ मार्गशीर्षेतदाप्रीतिंकरोमिशतवार्षिकीं ॥ ४३ ॥ सेवतेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लसीपत्रैर्नित्यमामलकैश्चयः ॥ मार्गशीर्षेसदाभक्त्यासलभेद्वांछितंफलं ॥ ४४ ॥ इतिश्री
स्कंदपुराणेमार्गशीर्षमाहात्म्येषष्ठोऽध्यायः ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ माहात्म्यंवद
देवेशपुष्पजातिसमुद्भवम् ॥ येनयेनचपुष्पेणयत्फलंलभतेनरः ॥ १ ॥ ॥ श्रीभगवानु
वाच ॥ ॥ शृणुपुत्रप्रवक्ष्यामिमाहात्म्यंपुष्पसंभवम् ॥ येनपुष्पेणमेप्रीतिर्भवेत्सम्यङ्
नसंशयः ॥ २ ॥ मल्लिकामालतीचैवयूथिकाचातिमुक्तका ॥ पाटलाकरवीरंचजयंतीविज
यातथा ॥ ३ ॥ कुब्जकस्तबकश्चैवकार्णिकारंकुरंटकः ॥ चंपकोचातकःकुंदोबाणःकर्च्चू
रमल्लिका ॥ ४ ॥ अशोकस्तिलकश्चैवतथैवापरयूथिकः ॥ अमीपुष्पप्रकारास्तुशस्तामेपू
जनेसुत ॥ ५ ॥ केतकीपत्रपुष्पंचभृंगराजस्तथैवच ॥ तुलसीपत्रपुष्पंचसद्यःप्रीतिकरंमम
॥ ६ ॥ पद्मान्यंबुसमुत्थानिरक्तनीलोत्पलेतथा ॥ सितोत्पलंसहोमासेममात्यंतंहिवल्लभ
म् ॥ ७ ॥ तान्येवचप्रशस्तानिकुसुमानिचमेसुत ॥ यानिस्युर्वर्णयुक्तानिरसगंधयुतानिच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥८॥ निर्गंधान्यपिशस्तानिकुसुमानिमतानिमे ॥सुरभीणितथान्यानिवर्जयित्वातुकेतकी
म् ॥ ९ ॥ बाणंचचंपकाशोकंकरवीरंचयूथिका ॥ पारिभद्रंपाटलाचबकुलंगिरिशालिनी
॥ १० ॥ बिल्वपत्रंशमीपत्रंपत्रंभृंगिरजस्यच ॥ तमालामलकीपत्रंशस्तंमेपूजनेसुत ॥
॥ ११ ॥ पुष्पैररण्यसंभूतैःपत्रैर्वागिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैःप्रोक्षितैर्जंतुवर्जितैः॥
॥ १२ ॥ अथारामोद्भवैर्वापिपुष्पैःसंपूजयेच्चमाम् ॥ पुष्पजातिविशेषेणभवेत्पुण्यंविशेषतः
॥ १३ ॥ तपःशीलगुणोपेतेपात्रेवेदस्यपारगे ॥ दशदत्वासुवर्णानियत्फलंलभतेनरः ॥
॥ १४ ॥ तत्फलंलभतेमर्त्यःसहेकुसुमदानतः ॥ द्रोणपुष्पैस्तथैकस्मिन्मह्यंचविनिवेदिते
॥ १५ ॥ दशदत्वासुवर्णानिफलंतदधिकंसुत ॥ पुष्पात्पुष्पांतरेभेदोयथासीत्तन्निबोधमे ॥
॥ १६ ॥ द्रोणपुष्पसहस्रेभ्यःखादिरंतुविशिष्यते ॥ खादिरात्पुष्पसाहस्राच्छमीपुष्पंवि ॥१५॥
शिष्यते ॥ १७ ॥ शमीपुष्पसहस्रेभ्योबिल्वपुष्पंविशिष्यते ॥ बिल्वपुष्पसहस्रेभ्योबकपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्पंविशिष्यते ॥ १८ ॥ बकपुष्पसहस्त्रेभ्योनद्यावर्तंविशिष्यते ॥ नद्यावर्तसहस्त्राद्धिकरवी
रंविशिष्यते ॥ १९ ॥ करवीरसहस्त्रस्यकुसुमंश्वेतमुत्तमम् ॥ करवीरश्वेतपुष्पात्पालाशंपु
ष्पमुत्तमम् ॥ २० ॥ पालाशपुष्पसाहस्त्रात्कुशपुष्पंविशिष्यते ॥ कुशपुष्पसहस्त्राद्धिवन
मालाविशिष्यते ॥ २१ ॥ वनमालासहस्त्राद्धिचंपकंचविशिष्यते ॥ चंपकस्यपुष्पशताद
शोकंपुष्पमुत्तमम् ॥ २२ ॥ अशोकपुष्पसाहस्त्राच्छेवंतीपुष्पमुत्तमम् ॥ शेवंतीपुष्पसाहस्त्रा
त्कुजकंपुष्पमुत्तमम् ॥ २३ ॥ कुजपुष्पसहस्त्राद्धिमालतीपुष्पमुत्तमम् ॥ मालतीपुष्पसाह
स्त्रात्संध्यापुष्पंविशिष्यते॥ ॥ २४ ॥ पलाशस्यसहस्त्राद्धिमालतीपुष्पमुत्तमम् ॥ मालती
पुष्पसाहस्त्रात्त्रिसंध्यापुष्पमुत्तमम् ॥ २५ ॥ त्रिसंध्यारक्तसाहस्त्रात्त्रिसंध्याश्वेतमुत्तमम् ॥
त्रिसंध्याश्वेतसाहस्त्रात्कुंदपुष्पंविशिष्यते ॥ २६ ॥ कुंदपुष्पसहस्त्राद्धिजातीपुष्पंविशिष्य
ते ॥ सर्वासांपुष्पजातीनांजातीपुष्पमिहोत्तमम् ॥ २७ ॥ जातीपुष्पसहस्त्रेणयच्छेन्मालां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुशोभनाम् ॥ मह्यंयोविधिवद्दद्यात्तस्यपुण्यफलंशृणु ॥ २८ ॥ कल्पकोटिसहस्राणिकल्प
कोटिशतानिच ॥ मत्पुरेवसतेनित्यंममतुल्यपराक्रमः ॥२९॥ येषांसंतिचपुष्पाणिप्रशस्ता
निममार्चने ॥ तेषांपत्राणिशस्तानितदभावेफलानिच ॥ ३० ॥ एतैःपत्रैश्चपुष्पैश्चफलैश्चा
पितथाहिमाम् ॥ अर्चन्दशसुवर्णस्यप्रत्येकंफलमाप्नुयात् ॥ ३१ ॥ एताभिःपुष्पजाती
भिःसहोमासेर्चयंतिये ॥ भक्तिंददामितेषांवैतुष्टःसन्नात्रसंशयः ॥ ३२ ॥ धनंपुत्रांस्तथादा
रान्यत्किंचिद्वांछतेहिसः ॥ तत्तद्ददामिदेवेशपुष्पैःरोभिःप्रतोषितः ॥ ३३ ॥ ॥ इतिश्री
स्कंदपुराणेमार्गशीर्षमाहात्म्येसप्तमोऽध्यायः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रीमत्तुलसी
माहात्म्यंयथावद्वर्णयप्रभो ॥ यस्याःसन्निधिमात्रेणप्रीतिर्भवतितेऽधिका ॥ १ ॥ ॥ श्री
भगवानुवाच ॥ ॥ मणिकांचनपुष्पाणितथामुक्तामयानिच ॥ तुलसीपत्रदानस्यकलां
नार्हंतिषोडशीं ॥ २ ॥ तुलसीमंजरीभिर्यःकुर्याद्धेममपूजनम् ॥ नसगर्भगृहान्यायान्मुक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागीभवेन्नरः ॥ ३ ॥ आरोप्यतुलसींवत्सपूजयेत्तद्दलैश्चमाम् ॥ दिविसंमोदमानास्तेश्चे
तद्वीपेचमेगृहे ॥ ४ ॥ श्रीमत्तुलस्यार्चयतेसकृद्विमांपत्रैःसुगंधैर्विमलैरखंडितैः ॥ यत्त
स्यपापंपटसांस्थितंतदानिरीक्षयित्वापरिमार्जयेद्यमः ॥ ५ ॥ तुलसीनयेषांममपूजनार्थंसं
पादितैकादशिपुण्यवासरे ॥ धिग्यौवनंजीवितमर्थसंततिस्तेषांसुखंनेहचदृश्यतेपरे ॥ ६ ॥
लिंगमभ्यर्चितंदृष्ट्वासहोमासेचमामकम् ॥ तुलसीपत्रनिकरैर्मुच्यतेब्रह्महत्यया ॥ ७ ॥ नि
त्यमभ्यर्चयेद्योवैतुलस्यामांरमेश्वरम् ॥ महापापानिनश्यंतिकिंपुनश्चोपपातकम् ॥ ८ ॥
वर्ज्यंपर्युषितंपुष्पंवर्ज्यंपर्युषितंजलम् ॥ नवर्ज्यंतुलसीपत्रंनवर्ज्यंजान्हवीजलम् ॥ ९ ॥ ता
वद्गर्जंतिपुष्पाणिमालत्यादीनिभोसुत ॥ यावन्नप्राप्यतेपुण्यातुलसीममवल्लभा ॥ १० ॥
सकृदभ्यर्चयेद्योमांबिल्वपत्रेणमानवः ॥ मुक्तिभागीनिरातंकोममपार्श्वगतोभवेत् ॥ ११ ॥
बिल्वपत्राच्छमीपत्राज्जातीपत्रात्सरोरुहात्॥ वल्लभंतुलसीपत्रंकौस्तुभादधिकंमम॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अभिन्नपत्रातुलसीह्यामंजरिसंयुता ॥ क्षीरोदार्णवसंभूतापद्मैवेयंसदामम ॥ १३ ॥ अ
कृष्णाप्यथवाकृष्णातुलसीममवल्लभा ॥ सितावाप्यसितावापिद्वादशीवल्लभायथा ॥ १४ ॥
॥ गृहीत्वातुलसीपत्रंभक्त्यायोमांसमर्चयेत् ॥ अर्चितंतेनसकलंसदेवासुरमानुषम् ॥ १५ ॥
॥ तावद्गर्जंतिरत्नानिकौस्तुभादीन्यनंतशः ॥ यावन्नप्राप्यतेकृष्णतुलसीकृष्णमंजरी ॥ १६ ॥
कृष्णंकृष्णतुलस्याहियोभक्त्यापूजयेन्नरः ॥ सयातिभुवनंशुभ्रंयत्राविष्णुःश्रियासह ॥ १७ ॥
ममार्चनार्थंभिक्षूणांयच्छंतितुलसीदलम् ॥ अन्येषामपिभक्तानांयांतितेपदमव्ययम् ॥ १८
तुलसीकृष्णगौरायातयायोमांसमर्चयेत् ॥ नरोयातितनुंत्यक्त्वावैष्णवींशाश्वतींगतिम् ॥
॥ १९ ॥ ॥ ब्रह्मोवाच ॥ धूपदानस्यमाहात्म्यंदीपस्यापिचकेशव ॥ यत्फलंलभतेम
र्त्यस्तन्मेब्रूहियथार्थतः ॥ २० ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणुपुत्रप्रवक्ष्यामिधूपदा
नस्ययत्फलम् ॥ दीपदानस्यमाहात्म्यंममप्रीतिकरंपरम् ॥ २१ ॥ अगुरुंचसकर्पूरंदिव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनसौरभम् ॥ दत्त्वामांवैसहोमासेकुलानांतारयेच्छतम् ॥ २२ ॥ कृष्णागुरुसमुत्थेनधू
पेनचममालयम् ॥ धूपयेद्वैष्णवोयस्तुसमुक्तोनरकार्णवात् ॥ २३ ॥ माहिषंगुग्गुलंयस्तु
आज्ययुक्तंसशर्करम् ॥ धूपंददातियोवैमांतस्येच्छांप्रददाम्यहम् ॥ २४ ॥ गुग्गुलोहंत्यशे
षाणिअरिष्टानिचधूपितः ॥ कामान्नानाविधांश्चैवअगुरुःसंप्रयच्छति ॥ २५ ॥ देहंगेहंपु
नात्येवधूपस्त्वगुरुसंभवः ॥ नाशयेद्यक्षरक्षांसिधूपःसर्वरसोद्भवः ॥ २६ ॥ जातिपुष्पम
थैलाचगुग्गुलश्चहरीतकी ॥ कूटःसर्जरसश्चैवगुडसेलाछडस्तथा ॥ नखयुक्तानिचैतानिदशां
गोधूपउच्यते॥२७॥ धूपंदशांगंयदिचेत्करोतिमासेसहेमेअतिवल्लभेच॥ददामिकामानपि
दुर्लभानपिबलंचपुष्टिंसुतदारभक्तिः ॥२८॥मुस्ताधूपेमानुषाणांप्रियत्वंमांगल्यकंवश्यकरं
गुडस्यवै ॥ कुर्यात्सहोमासिममाग्रतोयोविहायपापानिसमांसमाप्नुयात् ॥ २९ ॥ नभयं
विद्यतेतस्यदिव्यभौमांतरिक्षजम्॥ममधूपावशेषेणयस्यांगंपरिमार्जितम् ॥ ३० ॥ नचाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विद्यतेतस्यभवंतिसंपदोऽखिलाः ॥ धूपेकृतेसहोमासेममाग्रेश्रद्धयाऽनिशम् ॥३१॥ धूपः
सुरूपतांधत्तेधूपःपावनमुत्तमम् ॥ वनस्पतिरसोदिव्यःपरमःपावनःशुचिः ॥ ३२ ॥ अतः
परंप्रवक्ष्यामिदीपमाहात्म्यमुत्तमम् ॥ यस्मिन्कृतेनरोयातिवैकुंठंनात्रसंशयः ॥ ३३ ॥ ब
हुवर्तिसमायुक्तंघृतपूरसमान्वितम् ॥ कुर्यादारार्तिकंयोवैकल्पकोटिदिवंवसेत् ॥ ३४ ॥ नी
राजनंतुयःपश्येत्सहोमासेममाग्रतः ॥ सप्तजन्मभवोविप्रोह्यंतेचपरमंपदम् ॥ ३५ ॥ कर्पू
रेणतुयःकुर्याद्भक्त्याचैवममाग्रतः ॥ आरार्तिकंद्विजश्रेष्ठप्रविशेन्मामनंतकम् ॥ ३६ ॥ मं
त्रहीनंक्रियाहीनंयत्कृतंपूजनंमम ॥ सर्वंसंपूर्णतामेतिकृतेनीराजनेसुत ॥ ३७ ॥ यःकरो
तिसहोमासेकर्पूरेणचदीपकम् ॥ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ३८ ॥ ममाग्रेवै
द्विजानांचदीपंदद्याच्चतुष्पथे ॥ मेधावीज्ञानसंपन्नश्चक्षुष्मान्जायतेनरः ॥ ३९ ॥ घृतेनवा
थतैलेनदीपंप्रज्वालयेन्नरः ॥ सहोमासेममाग्रेचतस्यपुण्यफलंशृणु ॥४०॥ विहायसकलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापंसहस्रादित्यसान्निभः ॥ ज्योतिष्मताविमानेनममलोकेमहीयते ॥ ४१ ॥ तस्मात्सर्व
प्रयत्नेनदीपंदद्याद्विचक्षणः ॥ तंचदत्वाविहिंसेद्यःसपतेन्नरकेध्रुवम् ॥ ४२ ॥ दीपंयोवैहरे
त्पापीलोभाद्द्वेषाद्द्विजोत्तम ॥ तद्दीपहरणात्सोऽपिमूकोंधश्चप्रजायते ॥ ४३ ॥ ॥ इति
श्रीस्कंदपुराणेमार्गशीर्षे मा० विष्णुब्रह्मसंवादेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥
नैवेद्यस्यविधिंब्रूहिदेवमेतत्वतःप्रभो ॥ अन्नंकतिविधंचेष्टंव्यंजनादीन्यशेषतः ॥ १ ॥ ॥
॥ श्रीभगवानुवाच ॥ ॥ साधुपृष्टंत्वयावत्सममप्रीतिकरंपरम् ॥ वक्ष्यामितेऽन्नपानादि
व्यंजनादीन्यशेषतः ॥ २ ॥ अदौहिरण्मयंपात्रंतदभावेचराजतं ॥ तदभावेचपालाशंवि
स्तीर्णंबहुसुंदरम् ॥ ३ ॥ कचोलाःशतशःकार्याःपात्रेवैपरितोनघ ॥ तन्मध्येव्यंजनादया
नानाफलमयाःशुभाः॥४॥ पायसंचंद्रसंकाशंपात्रेवैशर्करायुतम् ॥ भक्तंकुमुदसंकाशंसुन्ना
न्नकाचप्रभाञ्छुभान् ॥५॥ नानाव्यंजनसंरुद्धंत्रिभिःपंक्तिभिरेवच॥ निंबूरसेनचंद्रेणफलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयुतेनच ॥ ६ ॥ वैकृताश्चतदाकार्याःशतशोभोजनेमम ॥ द्राक्षास्तुमिश्रिताश्चूतकरमर्द
कृताःशुभाः ॥ ७ ॥ मरीचपिप्पलीसार्द्रकैलाचंद्रकसंयुताः ॥ काथिताःकथिकाःकार्याःश
तशोभोजनेमम ॥ ८ ॥ प्रलेह्नास्तथाकार्याःकचोलशतसंकुलाः ॥ नानाकुसुमसंमोदयु
क्ताःसह्यसिमेप्रियाः ॥ ९ ॥ मंडकावर्त्तुलारम्याःसमाःसर्वत्रबिंदुवत् ॥ सितयासहितेनाथ
दुग्धेनक्काथितेनच ॥ १० ॥ मधुवर्णेनगव्येनयुक्तेतस्मिन्सुभोजने ॥ कचोलेसुप्रभेवत्स
स्थितंकांचनसुप्रभम् ॥ ११ ॥ घृतंसुवासितंप्रीत्यादेयंहिममभोजने ॥ तत्रगोधूमपात्रेण
चंद्रकेणहिचोज्ज्वलम् ॥ १२ ॥ सौबाल्हिकाःपूरिकास्तुशतच्छिद्राःसवेष्टिकाः ॥ अपूपा
श्चतथाक्षीरप्रकारांस्तुप्रकारयेत् ॥ १३ ॥ मणयःसूत्रसंज्ञाश्चमालतीकुसुमादयः ॥ पर्प
टावर्पटारम्यामाषकूष्मांडसंभवाः ॥ १४ ॥ वटकान्नवधारम्यान्कुर्यान्मासेसहेमम ॥ द्वि
धाजातीमरीचैश्चपूरिताद्रोणकेशुभाः ॥ १५ ॥ युक्तेनलवणेनातिशुद्धतैलेनपूरिताः ॥ कुंकु ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माभाःस्नेहहीनाःसक्षताइवदुर्जनाः ॥ १६ ॥ दधिदुग्धयुताःकेचिच्चिंचणीचूतसंभवाः ॥
द्राक्षारसयुताःकेचित्तथान्येक्षुरसैर्युताः ॥ १७ ॥ राजिकाजलमध्यस्थास्तथान्येसितया
सह ॥ रसैश्चतुर्विधैश्चान्यैर्वटकानवधामताः ॥ १८ ॥ वज्रप्रभानुकणिकाचारबीजसुखारि
कैः ॥ शकलैर्नारिकेलस्यलवंगशतसंयुताः ॥ १९ ॥ घृतक्षीरासिताद्यास्ताःकटाहेसुप्र
लोडिताः ॥ लब्धासितादिकूसररम्याःस्निग्धाश्चफेनिकाः ॥ २० ॥ पराकिकासुवेपक्काः
कृताश्चंद्रेणपोलिकाः ॥ मोदकास्तत्रवैकार्याश्चारबीजभवाःपरे ॥ २१ ॥ सितयासहिताः
कार्याअन्येदुग्धेननिर्मिताः ॥ नारिकेलफलैश्चान्येवृक्षनिर्यासनिर्मिताः ॥ २२ ॥ बदामै
श्चशुभाश्चान्येतिलैश्चकणबीजकैः ॥ ईदृशान्मोदकांश्चान्यांस्तुभ्यर्थंममकारयेत् ॥ २३ ॥
अर्शोघ्नंमोचनीकंदंतथार्द्रंकरमर्दकम् ॥ नारिंगंचिंचणीकंचकंकोलफलमेवच ॥ २४ ॥ द
शारंत्रिपुरीजातंशुभंनिंबफलंबिसम् ॥ तिंदूफलंलवंगंचश्रीफलंतिलकंलुती ॥ २५ ॥ वल्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंवंशकारीरंतथाकायफलंबलम् ॥ द्राक्षाफलंचूतफलंरम्यंकंटाकिनीफलम् ॥ २६ ॥ धात्री
फलंशुक्तिभवंफलमंबाडवंतथा ॥ रंभाफलंपिप्पलीचमरीचाश्चमनोहराः ॥ २७ ॥ शुद्धस
र्षपतैलेनलवणेनसुवेधितम् ॥ तथाराजिकयाविद्धांत्रिभिर्वर्षैर्घटेस्थितम् ॥ २८ ॥ एवंवि
धानिजातानिव्यंजनानिचमानद ॥ कर्तव्यानिसहोमासेममप्रीतिकराणिवै ॥ २९ ॥ ए
तादृशेभोजनेचेदसामर्थ्यंभवेद्यदि ॥ एवंकार्यंतदातेनसंक्षेपेणशृणुष्वमे ॥३०॥ लड्डुकमेकं
घृतपूरमेकंफेनद्वयंकोकरसत्रयंच ॥ घृतप्लुतंमंडकषोडशानांवटाष्टदायीनरकंनपश्येत्॥३१॥
अर्द्धाढकंसुचिरपर्युषितंचदुग्धंखंडस्यषोडशपलानिशशिप्रभस्य ॥ सर्पिष्पलंमधुपलंमारि
चंद्विकर्षंशुंठ्याःपलार्धमथवार्धपलंचतुर्णाम् ॥३२॥श्लक्ष्णपटेललनयामृदुपाणिघृष्टाकर्पूरधू
लिधवलीकृतभांडसंस्था ॥ एषाशुभारसवतीप्रकरोतियोवैकामन्ददामिसकलान्मनुज
स्यतस्य॥३३॥इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेनवमोऽध्यायः॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ब्रह्मोवाच ॥ ॥ नैवेद्यानंतरंतातकिंकर्तव्यंनृभिःप्रभो ॥ यत्कर्तव्यंसहोमासेतत्सर्वंब्रू
हितत्त्वतः ॥ १ ॥ श्रीभगवानुवाच ॥ ॥ अथभुक्तवतेदत्वाजलैःकर्पूरवासितैः ॥ आच
मनंचतांबूलंचंदनंकरमार्जनम् ॥ २ ॥ पुष्पांजलिंततःकुर्याद्भक्त्यादर्शंप्रदर्शयेत् ॥ नीराज
नंततःकार्यंकार्पूरंविभवेसति ॥ ३ ॥ समर्प्यमुकुटादीनिभूषणानिविचक्षणः ॥ ततःपश्चा
न्महाभागप्रकल्प्यछत्रचामरे ॥ ४ ॥ प्रसादसुमुखंध्यात्वाश्यामसुंदरविग्रहम् ॥ जपेद
ष्टोत्तरशतंस्तुवीतस्तुतिभिःप्रभुम् ॥ ५ ॥ शंखरौप्यमयीमालाकांचनीचविशेषतः ॥ पद्मा
क्षैश्चैवशुभगैर्विद्रुमैर्मणिमौक्तिकैः ॥ ६ ॥ रचितैर्द्राक्षकैर्मालातथैवांगुलिपर्वभिः ॥ पुत्र
जीवमयीमालाशस्तावैजपकर्मणि ॥ ७ ॥ नचक्रमन्नचहसन्नपार्श्वमवलोकयन् ॥ नपदाप
दमाक्राम्यकरप्राप्ताशिरस्तथा ॥८॥ नोत्तिष्ठन्मन्मन्त्रंविद्वान्नजपेद्व्यग्रमानसः ॥ जपका
लेनभाषेतव्रतहोमार्चनादिषु ॥ ९ ॥ गृहेष्वेकगुणंजाप्यंगोष्ठदशगुणंभवेत् ॥ नदीतीरेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविद्यादग्न्यगारेदशाधिकम् ॥ १० ॥ तीर्थादिषुसहस्रंस्यादनंतंममसन्निधौ ॥ एवंकृत्वा
सहोमासेयःकुर्यांच्चप्रदक्षिणाम् ॥ ११ ॥सप्तद्वीपवतीपुण्यंलभतेसपदेपदे ॥ पठन्नामसह
स्रंतुअथवानामकेवलम् ॥१२॥ एकाप्रदाक्षिणाभक्त्यादहेत्पापंसदान्हिकम् ॥ प्रदाक्षिणी
कृतातेनसप्तद्वीपावसुंधरा ॥१३॥ दिनसप्तोद्भवंपापंममतिस्रःप्रदाक्षिणाः ॥ तत्क्षणान्नशयं
त्येवपापंदेहेदशान्हिकम् ॥ १४ ॥ कृताःप्रदाक्षिणायेनएकविंशतिभक्तितः ॥ भ्रूणहत्या
दिपापानिनाशमायांतितत्क्षणात् ॥ १५ ॥ अष्टोत्तरशतंयेनकृताभक्त्याप्रदाक्षिणाः ॥ ते
नेष्टंक्रतुभिःसर्वैःसमाप्तवरदाक्षिणैः ॥ १६ ॥ प्रदाक्षिणीकृतातेनतावद्वारंवसुंधरा ॥ मातुःप्र
दाक्षिणास्तद्वद्भूतधात्रीप्रदाक्षिणाः ॥ १७ ॥ शालिग्रामाशिलायाश्चसममेतत्त्रयंस्मृतम् ॥
एकोदंडप्रपातश्चसहेसप्तप्रदाक्षिणाः ॥ १८ ॥ सममेतद्द्वयंनोवादंडपातोविशिष्यते ॥ प्रद
क्षिणेदंडपातंयःकरोतिसदाममम ॥ १९ ॥ सहोमासेविशेषेणआकल्पंसवसेद्दिवि ॥ क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्पादनंतरंतातचक्रवर्त्तीप्रजायते ॥ २० ॥ चिरायुर्धनवान्भोगीदानवान्धर्मवत्सलः ॥
सहस्रनामपठनात्पापंनश्येत्रिधाकृतम् ॥ २१ ॥ अथकिंबहुनोक्तेनशृणुगुह्यंचमेसुत ॥
दामोदरेतिनाम्नावैभवेत्प्रीतिर्ममातुला ॥ २२ ॥ गुणसंबंधिमन्नामकृतंमात्रायशोदया ॥
यदामेदधिभांडस्यस्फोटनंगोकुलेकृतम् ॥२३॥ तदायशोदयागाढंबद्धोदाम्नाह्युलूखले ॥
ततःप्रभृतिमेनामख्यातंदामोदरेतिच ॥२४ ॥ नमोदामोदरायेतिजपेद्यःसुसमाहितः ॥ सू
र्योदयेशुचिर्भूत्वात्रिसहस्रंदिनेदिने॥२५॥सार्द्धलक्षत्रयंयावत्ततउद्यापयेद्बुधः ॥ तर्पणंहवनं
चैवब्रह्मभोज्यंदशांशतः ॥ २६ ॥ एवंयःकुरुतेभक्त्यातस्ययच्छामिवांछितम् ॥ धनंधा
न्यंतथादारान्पुत्रांश्चान्यच्चवांछितम् ॥ २७ ॥ त्रिसत्येनमयाचोक्तंश्रद्धस्वत्वंमहामते ॥
मंत्रराजमिमंपुत्रकृपयामेप्रकाशितम् ॥ २८ ॥ दामोदरायेतिपठन्नित्यंकुर्यात्प्रदक्षिणम्॥
दंडपातंतथापुत्रअष्टांगेनसमान्वितम् ॥ २९ ॥ पद्भ्यांकराभ्यांजानुभ्यामुरसाशिरसातथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसावचसादृष्ट्याप्रणामोष्टांगउच्यते ॥३०॥ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परम् ॥
प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ॥ ३१ ॥ पश्चाच्छेषांमयादत्तांशिरस्याधायसाद
रम् ॥ एवंब्रूयात्ततोवत्समपूजाप्रपूर्त्तये ॥ ३२ ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन ॥
यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ॥ ३३ ॥ मृदंगवाद्येनसमंप्रणवेनसुसंयुतम् ॥ एवंकार्यं
सहोमासेनृत्यंपुण्यप्रदंनृणाम् ॥ ३४ ॥ गीतंवाद्यंचनृत्यंचतथापुस्तकवाचनम् ॥ पूजा
कालेचतुर्वर्गसर्वदाममचाप्रियम् ॥ ३५ ॥ गीतवाद्याद्यभावेचममनामसहस्रकम् ॥ स्तव
राजंतथापुत्रगजेंद्रस्यचमोक्षणम् ॥ ३६ ॥ अनुस्मृतिश्चगीताचस्तवनंपंचधामतम् ॥ पंच
स्तवंमहाभागममप्रीतिकरंपरम् ॥ ३७ ॥ पादोदकंपिबेद्योवैशालग्रामसमुद्भवम् ॥ पंच
गव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनम् ॥ ३८ ॥ शालग्रामशिलातोयंयःपिबेद्बिंदुनासमम् ॥
मातुःस्तन्यंपुनर्नैवसापिबेन्मुक्तिभाङ्नरः ॥ ३९ ॥ आशौचंनैवविद्येतसूतकेमृतकेपिच ॥ ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षां पादोदकं मूर्ध्नि प्राशनं ये प्रकुर्वते ॥ ४० ॥ अंतकालेपि यस्येदं दीयते पादयोर्जलम् ॥
सोपि सद्गतिमाप्नोति सदाचारबहिष्कृतः ॥ ४१ ॥ अपेयं पिबते यस्तु भुंक्ते यश्चाप्यभोजनम् ॥
अगम्यागमनो यो वै पापाचारश्च यो नरः ॥ ४२ ॥ सोपि पूतो भवत्याशु सद्यः पादांबुधारणा
त् ॥ चांद्रायणात्पादकृच्छ्रादधिकं पादयोर्जलम् ॥ ४३ ॥ अगुरुं कुंकुमं वापि कर्पूरं चानुलेप
नम् ॥ मम पादांबुसंस्पृष्टं तद्वै पावनपावनम् ॥ ४४ ॥ दृष्टिपूतं तु यत्तोयं भवेद्वै विप्रसत्तम ॥ त
द्वै पापहरं नॄणां किं पुनः पादयोर्जलम् ॥ ४५ ॥ प्रियस्त्वं मे ग्रजः पुत्रो विशेषेण च मत्प्रियः ॥
तदर्थं कथितं सर्वं रहस्यं यच्च मेस्थितम् ॥ ४६ ॥ इति श्रीस्कं० मार्ग० ब्रह्मविष्णुसं० दशमो
ऽध्यायः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ एकादश्याश्च माहात्म्यं मूर्तीनां चाविधानकम् ॥
सर्वं ब्रूहि मम स्वामिन्कृपया भूतभावन ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणुष्वाद्विज
शार्दूल कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा याति विलयं पापं ब्रह्मवधादिकम् ॥ २ ॥ कांपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल्येनगरेराजावीरबाहुरितिस्मृतः ॥ सत्यवादीजितक्रोधोब्रह्मज्ञोममतत्परः ॥ ३ ॥ भाव
वान्सदयाशीलोरूपवान्बलवान्नरः ॥ भक्तोभगवतांनॄणांसदाममकथारुचिः ॥ ४ ॥ सदा
ममकथासक्तःसदाजागरणप्रियः ॥ दाताविद्वान्क्षमाशीलोविक्रमीविजितेंद्रियः ॥ ५ ॥
विजयीरणशीलश्चऋद्ध्याचधनदोपमः ॥ पुत्रवान्पशुमांश्चैवसदारनिरतस्तथा ॥ ६ ॥ त
स्यभार्याकांतिमतीरूपेणाप्रतिमाभुवि ॥ पतिव्रतामहासाध्वीममभक्तिरतासदा ॥ ७ ॥
तयासहविशालाक्षोबुभुजेमेदिनींयुवा ॥ मुक्त्वैकंमांमहाबाहोनान्यज्जानातिदैवतम् ॥ ८ ॥
एकस्मिन्दिवसेपुत्रभारद्वाजोमहामुनिः ॥ समागतोगृहेतस्यवीरबाहोर्महात्मनः ॥ ९ ॥
दृष्ट्वासमागतंदूराद्भारद्वाजंमहामुनिम् ॥ स्वागतंकारयामासदत्वार्घ्यंविधिवत्तदा ॥ १० ॥
आसनंकल्पयामासस्वयमेवमहीपतिः ॥ प्रणम्यपरयाभक्त्यातस्थौमुनिवराग्रतः ॥ ११ ॥
॥ राजोवाच ॥ ॥ अद्यमेसफलंजन्मअद्यमेसफलंदिनम् ॥ अद्यमेसफलंराज्यमद्यमेसफ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंगृहम् ॥ १२ ॥ प्रसन्नोममविप्रर्षेपरमात्माजनार्दनः ॥ यत्त्वंसमागतोह्यद्यगृहेयोगिवर
स्तथा ॥ १३ ॥ मुक्तोहंपापकोव्याद्ययत्त्वयाहंनिरीक्षितः ॥ राज्यंलक्ष्मीर्गजाश्वाश्चामया
तुभ्यंनिवेदिताः ॥ १४ ॥ वैष्णवोसिमुनिश्रेष्ठनास्त्यदेयंमयातव ॥ मेरुतुल्यंभवेत्सर्वं वै
ष्णवस्यवराटिका ॥ १५ ॥ नायातिहिगृहेयस्यवैष्णयोवैद्विजोत्तमः ॥ तद्दिनंविफलंतस्य
कथितंब्राह्मणैर्मम ॥१६॥ विष्णुभक्ताश्चयेकेचित्सर्वेवर्णाद्विजातयः॥कथितंममगार्ग्येणगौ
तमेनसुमंतुना ॥ १७ ॥ येत्वभक्ताहृषीकेशेपिशाचास्तेहिमानवाः ॥ महापातकलिप्तास्ते
येभुंजंतिहरेर्दिने ॥ १८ ॥ शिवव्रतसहस्रैस्तुसौरैर्ब्राह्मैश्चकोटिभिः ॥ यत्फलंकविभिःप्रो
क्तंवासरैकेनतद्धरेः॥ १९ ॥ गर्वमुद्वहतेतावत्तिथिर्ब्राह्मीचशांकरी ॥ यावन्नायातिविप्रेंद्रद्वा
दशीचममप्रिया ॥ २० ॥ तावत्प्रभावस्ताराणांयावन्नोदयतेशशी ॥ तिथिस्तथाचविप्रें
द्रयावन्नायातिद्वादशी ॥ २१ ॥ नारदेनपुराप्रोक्तंवासिष्ठेनममाग्रतः ॥ त्वंवेत्तासर्वधर्माणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैष्णवानांमहामुने ॥ २२ ॥ ॥भारद्वाजउवाच ॥ ॥ साधुपृष्टंमहाभागयत्त्वंभक्तोसि वैष्णवः ॥ सासुप्रजामहीधन्यायत्त्वंरक्षासिभूमिप ॥ २३ ॥ तस्मिन्नराष्ट्रेनवस्तव्यंयत्रराजानवैष्णवः ॥ वरंवासोवनेतीर्थेनतुराष्ट्रेत्ववैष्णवे॥२४॥यत्रभागवतोराजासंप्रशास्तिचमेदिनीम् ॥ वैकुंठमितिमंतव्यंतद्राष्ट्रंपापवर्जितम् ॥ २५ ॥ चक्षुर्हीनंयथादेहंपतिहीनायथास्त्रियः ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ २६ ॥ यथापुत्रोमहीपालमातापित्रोरपोषकः ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ २७ ॥ दानहीनोयथाराजाब्राह्मणोरसविक्रयी ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ २८ ॥ दंतहीनोयथाहस्तीपक्षहीनोयथाखगः ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ २९ ॥ प्रतिग्रहार्थंवेदादिद्रव्यार्थंसुकृतंयथा ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३० ॥ दर्भहीनायथासंध्यायथाश्राद्धमदक्षिणम् ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३१ ॥ साशिखंचय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाशूद्रंकापिलाक्षीरपायिनम् ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३२ ॥ ब्राह्मणी
गामिनंशूद्रंहेमघ्नंधर्मदूषकम् ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३३ ॥ हरिसूर्या
दिवृक्षाणांयथाछेदंनरोत्तम ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३४ ॥ यथाहुती
मंत्रहीनाम्रतवत्सापयोयथा ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३५ ॥ सकेशावि
धवायद्वद्व्रतंस्नानाविवर्जितम् ॥ द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ॥ ३६ ॥ सराजा
प्रोच्यतेसद्भिर्यौभक्तोमधुसूदने ॥ तद्राष्ट्रंवर्धतेनित्यंसुखीभवतिसप्रजः ॥ ३७ ॥ दृष्टिर्मेस
फलाराजन्यत्त्वयाहंनिरीक्षितः ॥ अद्यमेसफलावाणीजल्पतेयात्वयासह ॥ ३८ ॥ दूरमे
वहिगंतव्यंश्रूयतेयत्रवैष्णवः ॥ दर्शनात्तुभवेत्पुण्यंतीर्थस्नानसमुद्भवम् ॥३९॥ सत्वंराजन्म
याहृष्टोविष्णुभक्तिरतःशुचिः ॥ स्वस्तितेस्तुगमिष्यामिसुखीभवनराधिप ॥ ४० ॥ एतस्मि
न्नंतरेराज्ञाकांतिमत्यानमस्कृतः ॥ भारद्वाजोमुनिश्रेष्ठःप्रवरःसर्वयोगिनाम् ॥ ४१ ॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैधव्यंवरारोहेभक्ताभवस्वभर्त्तरि ॥ निश्चलाकेशवेभक्तिःसदाभवतुतेशुभे ॥ ४२ ॥ एत
स्मिन्नंतरेराजाभारद्वाजंमहामुनिम् ॥ उवाचप्रीणयन्वाचामेघनादगभीरया ॥ ४३ ॥ ॥
राजोवाच ॥ ॥ विपुलामेकथंलक्ष्मीःकिंकृतंपूर्वजन्मनि ॥ सर्वंब्रूहिमुनिश्रेष्ठकृपायादि
ममोपरि ॥४४॥ एतन्मयाकथंप्राप्तंराज्यंनिहतकंटकम् ॥ पुत्रोवैगुणवान्श्रेष्ठःप्रियाचसुम
नोहरा ॥ ४५ ॥ मच्चित्तामद्गतप्राणाचिंतयंतीजनार्दनम् ॥ कोहंमुनेकथंचैषाकश्चधर्मोमया
कृतः ॥ ४६ ॥ किंचानयापिचार्वंग्याममपत्न्याकृतंमुने ॥ केनपुण्येनमेलक्ष्मीर्मृत्युलोकेसु
दुर्लभा ॥ ४७ ॥ अशेषाभूमिपालावैवर्ततेयस्यमेवशे ॥ विक्रमंचाप्रतिहतंशरीरारोग्यता
तथा ॥ ४८ ॥ ममापिविपुलंतेजोनकाश्चित्सहतेमुने ॥ इच्छामेद्यप्रतिज्ञातुंयथाचेयमानं
दिता ॥ ४९ ॥ मयापिसुकृतंविप्रकिंकृतंपूर्वजन्मनि ॥ इतिपृष्टोनरेंद्रेणपूर्वजन्मविचेष्टितम्
॥ ५० ॥ स्वपत्न्याश्चेष्टितंचैवसंपदांचैवकारणम् ॥ योगात्थंसुचिरंकालंतथाविंदतमानसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५१ ॥ विज्ञातमेतन्नृपतेपूर्वंजन्मविचेष्टितम् ॥ तवपत्न्याश्चराजर्षेशृणुष्वकथयाम्यहम्
॥ ५२ ॥ ॥ भारद्वाजउवाच ॥ ॥ शृणुभूपालसकलंयस्येदंकर्मणःफलम् ॥ त्वमासीः
शूद्रजातीयोजीवहिंसापरायणः ॥ ५३ ॥नास्तिकोदुष्टचारित्रःपरदारप्रधर्षकः ॥ कृतघ्नोदु
र्विनीतश्चशुद्धाचारविवर्जितः ॥ ५४ ॥ इयंयाभवतोभार्यापूर्वमप्यायतेक्षणा ॥ कर्मणामन
सावाचानान्यदस्यास्त्वयाविना ॥ ५५ ॥ पतिव्रतामहाभागाभजमानानिरंतरम् ॥ भा
वंनकुरुतेदुष्टंतवोपरितथासति ॥ ५६ ॥ सखिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् ॥ क्ष
यंजगामचार्थोयःसंचितस्तवपूर्वजैः ॥ ५७ ॥ नष्टेद्रव्येफलाकांक्षीत्वमासीर्जगतीपते ॥ पू
र्वकर्मविपाकेनकृषिश्चविफलागता ॥ ५८ ॥ ततोवित्तेपरिक्षीणेपरित्यक्तश्चबांधवैः ॥ क्षी
यमाणापिसाध्वीयमत्यजत्त्वांनभामिनी ॥ ५९ ॥ त्वंभग्नःसर्वकामेभ्योगतवान्निर्जनेवने
॥ हत्वाजीवाननेकांश्चचकारात्मविपोषणम् ॥६०॥ एवंप्रवृत्तस्यतवसहपत्न्यातदानृप ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतानिबहुवर्षाणिपापवृत्त्यामहीतले ॥ ६१ ॥ अन्यस्मिन्वासरेराजन्मार्गभ्रष्टोमहामुनिः
॥ नादिशंविदिशंवेत्तिदेवशर्माद्विजोत्तमः ॥ ६२ ॥ क्षुत्तृषापीडितोत्यर्थंमध्याह्नगदिवाकरे
॥ पतितोवनमध्येतुमार्गभ्रष्टोमहीपते ॥ ६३ ॥ दयाजाताचतेभूपदृष्ट्वादुःखेनपीडितम् ॥
ब्राह्मणंवृद्धमज्ञातंगृहीत्वातुकरेणवै ॥ ६४ ॥ उत्थाप्यपतितंभूमौत्वयोक्तंहितदानृप ॥ प्र
सादंकुरुविप्रर्षेआगच्छत्वंममाश्रमम् ॥ ६५ ॥ जलपूर्णंतडागंचपद्मिनीखंडमंडितम् ॥ वृ
क्षैर्मनोहरैर्युक्तंफलैःपुष्पैर्मनोरमैः ॥ ६६ ॥ स्नात्वासुशीतलेतोयेकृत्वाकर्मचनैत्यकम् ॥ कु
रुविप्रफलाहारंपिबवारिसुशीतलम् ॥ ६७ ॥ सुखेनकुरुविश्रामंमयासंरक्षितःस्वयम् ॥ तृ
प्तिपर्यंतंविप्रेंद्रवसत्वंचममाश्रमे ॥ ६८ ॥ उत्तिष्ठत्वंद्विजश्रेष्ठप्रसादंकर्तुमर्हसि ॥ लब्धसंज्ञ
स्तदाविप्रःश्रुत्वाशूद्रस्यभाषितम् ॥६९॥ करंजग्राहतंशूद्रंगतोयत्रजलाशयः ॥ उपविष्टो
महाबाहोछायामाश्रित्यतत्तटे ॥ ७० ॥ स्नानंचकारविधिवत्पूजयामासकेशवम् ॥ तर्पयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वापितॄन्देवान्पपौनीरंसुशीतलम् ॥ ७१ ॥ विश्रांतोवृक्षमूलेभूद्देवशर्माद्विजोत्तमः ॥ सा
ष्टांगंमुनयेकृत्वानमस्कारंसहस्त्रिया ॥ ७२ ॥ शूद्रस्तुपरयाभक्त्याप्रोवाचमुनिसन्निधौ ॥
आवयोस्तरणार्थायअतिथिस्त्वंसमागतः ॥ ७३ ॥ दर्शनात्तवविप्रर्षेजातःपापस्यसंक्ष
यः ॥ प्रियेफलानिस्वादूनिप्रयच्छास्मैद्विजातये ॥ मृदूनिरससयुक्तानिसुपक्कानिप्रियाणिच
॥ ७४ ॥ ॥ ब्राह्मणउवाच ॥ ॥ त्वामहंनैवजानामिस्वज्ञातिंकथयस्वमे ॥ नाज्ञात
स्यहिभोक्तव्यंब्राह्मणस्यापिपुत्रक ॥ ७५ ॥ ॥ शूद्रउवाच ॥ ॥ शूद्रोहंद्विजशार्दूल
नकार्यःसंशयस्त्वया ॥ आत्मजैर्दुर्जनैर्विप्रपरित्यक्तःस्वबंधुभिः ॥ ७६ ॥ तयोःसंवदतोरे
वंशूद्रपत्न्याफलानिच ॥ दत्तानितस्मैविप्रायतेनभुक्तानितानिवै ॥ ७७ ॥ अभूत्प्रीतमना
विप्रःपीत्वानीरंसुशीतलम् ॥ सुखंसंप्राप्यसमुनिर्विश्रांतस्तरुमूलके ॥ ७८ ॥ सचशूद्रःस
पत्नीकोभुक्ताचपुनरागतः ॥ स्वागतंतेमुनिश्रेष्ठकुतस्त्वमिहचागतः ॥ ७९ ॥ शून्याटवीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजश्रेष्ठदुष्टसत्वभयाकुलाम् ॥ निर्मनुष्यांदुःखयुक्तांदिवारात्रंभयानकाम् ॥ ८० ॥ ॥
॥ ब्राह्मणउवाच ॥ ब्राह्मणोहंमहाभागप्रयागगमनंप्रति॥अहमज्ञातमार्गेणप्रविष्टोदारुणेव
ने॥८१॥ममपुण्यप्रभावेनजातोऽसिवरबांधवः ॥ जीवितंमेत्वयादत्तंब्रूहिकिंकरवाणिते॥८२
भवानपिकुतःप्राप्तोनिर्मनुष्येवनेखलु॥कोभवान्कारणंकिंस्वित्कथयस्वममाग्रतः ॥८३॥
॥ शूद्रउवाच ॥ ॥ विदर्भनगरीराज्ञाभीमसेनेनरक्षिता ॥वासोममहाराष्ट्रशूद्रोहंपापलंप
टः॥ ८४ ॥ स्वकर्मविहितोधर्मोमयात्यक्तोद्विजोत्तम ॥ त्यक्तोहंबंधुवर्गेणततोऽहंवनमागतः
॥८५ ॥ कृत्वाजीववधंनित्यंजीवेहंभार्ययासह॥सांप्रतंपातकात्सम्यङ्निर्विण्णोस्मिमहा
मुने ॥ ८६ ॥ कुरुष्वानुग्रहंकिंचित्पापयुक्तस्यमेप्रभो ॥ ममपुण्यप्रभावेनआगतस्त्वंद्विजो
त्तम ॥ ८७ ॥ नपश्यामियथासौरिंपत्न्यासहमहामुने ॥ उपदेशप्रभावेणप्रसादंकर्तुमर्हसि
॥ ८८ ॥ नान्यदिच्छाम्यहंकिंचिन्मुक्तादेवंजनार्दनम् ॥ कुरुष्वानुग्रहंमेद्यप्रसादमृषिसत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म ॥८९॥ भारद्वाजउवाच ॥ ॥इतितेनसमापृष्टोदेवशर्माद्विजाग्रणीः ॥ शूद्रेणपरया
भक्त्याप्रहसन्वाक्यमब्रवीत् ॥ ९० ॥ ॥ इतिश्रीस्कंदपुराणे मार्गशीर्षमाहात्म्येविष्णु
ब्रह्मसंवादेएकादश्याख्यानंनामएकादशोध्यायः ॥ ११ ॥ ॥देवशर्मोवाच ॥ ॥ तवे
दृशीमतिर्जातासहसाकेशवोपरि ॥ एतस्मान्मेगतंपापंपूर्वजन्मशतोद्भवम् ॥ १ ॥ विना
व्रतैर्विनातीर्थैर्मुक्तस्त्वंपापकोटिभिः ॥ ममातिथ्येनभक्त्याचजातंतवहरेःपदम् ॥२॥ तेन
पुण्यप्रभावेणमतिर्जातातवेदृशी ॥ ध्यात्वासंचिंत्यमनसाज्ञातंपूर्वेविचेष्टितम् ॥ ३ पूर्वज
न्मनिविप्रस्त्वमवंत्यांधर्मतत्परः ॥ सदाध्ययनशीलश्चसुशीलश्चसदाव्रती॥४॥एकातुद्वाद
शीविष्णोःकृतादशमिसंयुता ॥ तत्पापस्यप्रभावेनसमस्तंसुकृतंगतम् ॥ ५॥ सर्वतद्विफ
लंजातंयथाशूद्रपतिर्द्विजः ॥ बहुवर्षसहस्राणिप्राप्तानरकयातनां ॥ ६ ॥ तस्मादेवंत्वयापू
र्वंकृतंदुष्टंचिरंबहु ॥ कृतातुदशमीमिश्रातिथिर्विष्णोर्महात्मनः॥७॥तेनशूद्रोभवाञ्जातःपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेतवमातिस्तथा ॥ धर्मेंनरमतेचित्तंदशमीवेधदूषितम् ॥ ८ ॥ विदर्भेनगरेवत्सआस्तितेपुत्रि
काखुतः ॥ कृतंतेनविधानोक्तंहरेरेकादशीव्रतम् ॥ ९ ॥ प्रदत्तंतेनतत्पुण्यमखंडैकादशीव्रत
म् ॥ धर्मोपरिमतिर्जाताजातःपापस्यसंक्षयः ॥ १० ॥ तेनपुण्यप्रभावेणएकादश्याव्रतेन
च ॥ दशमीवेधजंपापंयमेनपरिमार्जितम् ॥ ११ ॥इहजन्मनियत्पापंजन्मायुतकृतानिच
॥ मार्जितानियमेनैवपापानितवसांप्रतम् ॥ १२ ॥ तयोर्विवदतोरेवंविष्वक्सेनःसमागतः
॥ वर्णावरस्त्वागतंतेतुष्टस्तेहंजनार्दनः ॥ १३ ॥विप्रस्यातिथ्यहेतुत्वाज्जातःपापस्यसंक्षयः
॥ परदत्तेनपुण्येनएकादश्याव्रतेनच ॥ १४ ॥ दशमीवेधजंपापंतवशूद्रलयंगतं ॥ व्रतंकृत्वा
ददौपुण्यंदौहित्रस्तेनतारितः ॥ १५ ॥ पत्न्यासहमहाभागवैनतेयंसमारुह ॥ इत्युक्त्वादे
वदेवेनविमानेस्थापितस्तदा ॥१६॥ स्वर्गंततःसपत्नीकःशूद्रत्वेननृपोत्तम ॥ देवशर्मातु
विप्रोवैतीर्थराजंययौपुनः ॥ १७ ॥ एतत्तेसर्वमाख्यातंयत्त्वयापरिपृच्छितं ॥ अखंडैकाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीपुण्यात्प्राप्तस्यातिथ्यकारणात् ॥ विष्णुभक्तिमतीभार्याराज्यंनिहतकंटकं ॥ १८ ॥ ॥
राजोवा० ॥ ॥ब्रह्मन्नखंडैकादश्याविधिंसम्यक्समादिश ॥ विष्णोःसंप्रीणनार्थायप्रसा
दंकर्तुमर्हसि ॥ १९ ॥ ॥ ऋषिरु० ॥ ॥ शृणुष्वनृपशार्दूलएकादश्याविधिंशुभं ॥ पुरा
ऽऽसीद्भगवान्विष्णुर्नारदाययदुक्तवान् ॥ २० ॥ तत्तेहंसंप्रवक्ष्यामिउद्यापनविधिंशुभं॥मा
र्गशीर्षादिमासेषुद्वादशीषुनरोत्तम ॥ २१ ॥ व्रतंशुभमिदंकार्यमखंडैकादशीव्रतम् ॥ दश
म्यांचैवनक्तंचएकादश्यामुपोषणम् ॥ २२ ॥ द्वादश्यामेकभुक्तंचअखंडाइतिकथ्यते ॥ दि
वसस्याष्टमेभागेमंदीभूतेदिवाकरे ॥२३॥ तद्विनक्तंविजानीयाननक्तंनिशिभोजनम् ॥ कां
स्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा ॥ २४ ॥ शाकंमधुपरान्नंचपुनर्भोजनमैथुने ॥
विष्णुभक्तोनरोवापिदशम्यांदशवर्जयेत् ॥ २५ ॥ दशम्याविधिरुक्तोयमेकादश्यास्तथा
शृणु ॥ असकृज्जलपानंचाहिंसाशौचमसत्यता ॥ २६ ॥ तांबूलंदंतकाष्ठंचादिवाशयनमैथु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ने ॥ द्यूतंक्रीडानिशिस्वापःपतितैःसहभाषणम् ॥ एकादश्यांदशैतानिविष्णुभक्तस्तुव
र्जयेत् ॥ २७ ॥ अद्यमेस्त्रीसुखंनास्तिभोजनंनास्तिकेशव ॥ प्रीत्यर्थंतवदेवेशनियमस्तु
दिवानिशि ॥ २८ ॥ सुप्तेंद्रियैस्तुवैकुर्व्यंभोजनंयच्चमैथुनम् ॥ दंतांतरविलग्नान्नंक्षमस्व
पुरुषोत्तम ॥ २९ ॥ उपावृत्तस्तुपापेभ्योयस्तुवासोगुणैःसह ॥ उपवासःसविज्ञेयोनशरी
रस्यशोषणम् ॥ ३० ॥ पूर्वोक्तानिदशैतानिपरान्नंचतथामधु ॥ द्वादश्यांविष्णुभक्तोवैवर्ज
येन्मर्दनादिकम् ॥ ३१ ॥ अद्यमेद्वादशीपुण्यापवित्रापापनाशनी ॥ पारणंचकरिष्यामि
प्रसीदगरुडध्वज ॥ ३२ ॥ विष्णोःसंतोषणार्थायनियमोमयानियमःकृतः ॥ अद्याहंभोजयि
ष्यामित्वत्प्रसादाद्द्विजोत्तम ॥ ३३ ॥ अनेनविधिनाकुर्याद्यःवर्षंसमाप्यते ॥ संपूर्णेतुततोव
र्षेकुर्यादुद्यापनंबुधः ॥ ३४ ॥ आदौमध्येतथाचांतेव्रतस्योद्यापनंस्मृतम् ॥ उद्यापनंनकु
र्याद्यःकुष्ठीचांधश्चजायते ॥ ३५ ॥ तस्मादुद्यापनंकुर्याद्यथाविभवसारतः ॥ क्रियतेशुक्लप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेचमासेमार्गशिरेशुभे ॥ ३६ ॥ आमंत्र्यद्वादशमितान् ब्राह्मणान्विधिकोविदान् ॥ त्रयो
दशंसपत्नीकमाचार्यंविधिकोविदम् ॥ ३७ ॥ यजमानःशुचिःस्नात्वाश्रद्धायुक्तोजितेंद्रियः
॥ पादशौचार्घवस्त्राद्यैराचार्यादींस्ततोऽर्चयेत् ॥ ३८ ॥ आचार्यस्तुततःकृत्वामंडलंवर्णकैः
शुभैः ॥ चक्राब्जंसर्वतोभद्रंश्वेतवस्त्रेणवेष्टितम् ॥ ३९ ॥ जलपूर्णंचकुंभंतुपंचरत्नसमन्वित
म् ॥ पंचपल्लवसंयुक्तंकर्पूरागुरुवासितम् ॥ ४० ॥ वेष्टितंरक्तवस्त्रेणताम्रपात्रेणसंयुतम् ॥
वेष्टितंपुष्पमालाभिर्मंडलोपरिविन्यसेत् ॥ ४१ ॥ तस्योपरीन्यसेद्देवंलक्ष्मीनारायणंनृ
प ॥ सौवर्णींप्रतिमाकार्याएककर्षप्रमाणतः ॥ ४२ ॥ वाहनायुधसंयुक्ताप्रमाणंचतुरंगुलम्
॥ किंवाशक्त्याप्रकुर्वीतवित्तशाठ्यंविवर्जयेत्॥४३॥ततःसंस्थापयेन्मूर्तिंमंडलेद्वादशैवहि ॥
मासानामधिपःपूज्यश्चाखंडव्रतहेतवे ॥४४॥मंडलात्पूर्वदिग्भागेशंखंसंस्थापयेच्छुभम् ॥
त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ॥ निर्मितःसर्वदेवैस्त्वंपांचजन्यनमोस्तुते ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तुस्थंडिलंकार्यंमंडलादुत्तरांदिशम् ॥ संकल्प्यहवनंकार्यंमंत्रैर्वेदोक्तवैष्णवैः ॥ ४६ ॥
स्वस्थानेस्थापयेद्विष्णुंस्नापयेच्चहरींप्रति ॥पूजयेत्पुरुषसूक्तेनमंत्रैःपौराणिकैःशुभैः॥४७॥
नैवेद्यार्थंचवैकार्यामोदकाबहवोपिच ॥ धूपदीपोपहाराणिकृत्वानीराजनंततः ॥ ४८ ॥
यक्षकर्दमेनसंपूज्यततःकुर्यात्प्रदक्षिणाम् ॥स्वस्तिवाचनकैर्विप्रैर्नमस्कारंततोनृप॥ ४९ ॥
ततस्तुब्राह्मणैःकार्यआचार्यक्रमशोजपः ॥ जपश्चपावमानीयमंडलंब्राह्मणंमधु ॥ ५० ॥
तेजोसिशुक्रजंवाचंब्रह्मसामादनंतरम् ॥ पवित्रवंतंसूर्यस्याविष्णोर्महसिसंहिताम् ॥ ५१ ॥
जपांतेकलशेविष्णुंसोपांगमुपरिन्यसेत् ॥ दिवसस्योदयेचैवहोमंकुर्यादनुक्रमम् ॥ ५२ ॥
संस्थाप्यप्रथमंपात्रंपूजयित्वाविधानतः ॥ स्तवनंचततोहोमःकर्तव्यश्चरुपूर्वकः ॥ ५३ ॥
स्वगृह्योक्तविधानेनयजनाग्निक्रियापरः ॥ चरुद्वयंचकुर्वीतपायसंवैष्णवंचरुम् ॥ ५४ ॥ जु
हुयात्पुरुषसूक्तेनचरोःषोडशचाहुतीः ॥ तथाचतुर्गृहीतेनघृतयुक्तावराहुतिम् ॥ ५५ ॥ प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशमात्राः पालाशसमिधश्चघृतप्लुताः ॥ इदंविष्ण्वितिमंत्रेणहोतव्याः कर्मसिद्धये॥५६॥शत
मेकंतुजुहुयाद्विगुणाश्चतिलाहुतीः॥कृतेचवैष्णवेहोमेग्रहयज्ञंसमारभेत्॥५७॥ समिद्भिश्चरु
होमंचतिलहोमंक्रमेणतु ॥ उभयोःस्वस्तिकंवाचयंततःपूजांसमाचरेत् ॥५८॥ ऋत्विजांचत
तोदद्याद्धेन्वादिग्रहदक्षिणाः॥ देवस्यतत्त्र्येदद्याद्वाब्राह्मणाययथाविधि ॥ ५९ ॥ गांवैप
यस्विनींदद्याद्वृषभंचसुशोभनम् ॥ ब्राह्मणानांततोदद्यात्त्रयोदशपदानिच ॥ ६० ॥ आचा
र्यंतुसपत्नीकंवस्त्रैश्चपरितोषयेत् ॥ तोषयित्वामहादानैस्तंसार्थंचसमर्पयेत् ॥ ६१ ॥ पंच
विंशतिकुंभांश्चसोदकान्वस्त्रवेष्टितान् ॥ ब्राह्मणांश्चततोदद्यात्कृतेपारणकेनिशि ॥ ६२ ॥
भूरिदानंचदातव्यंबंधूनामिष्टभोजनम् ॥ पूर्णपात्रंततोदद्यादाचार्यायसदक्षिणम् ॥ ६३ ॥
पूर्णपात्रप्रदानेनकार्यंसंपूरितंभवेत् ॥ उपवासव्रतंचैवस्नानंतीर्थफलंभवेत् ॥ ६४ ॥ विप्रैः
संभाषितंतस्यसंपूर्णंतद्भवेत्फलम् ॥ वित्तशक्तिर्गृहेनास्तिकृतंचैकादशव्रतम् ॥ ६५ ॥ स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्त्याचैवकर्तव्यंतथाचोद्यापनादिकम् ॥ एतत्तेसर्वमाख्यातमखंडैकादशीव्रतम् ॥ ६३ ॥
॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुचतुर्मुखसंवादेअखंडैकादशीकथनंनामद्वा
 दशोऽध्यायः ॥ १२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणुपुत्रप्रवक्ष्यामिजागरस्यचलक्ष
णम् ॥ येनविज्ञानमात्रेणसुलभोहंसदाकलौ ॥ १ ॥ गीतंवाद्यंचनृत्यंचपुराणपठनंतथा ॥
धूपंदीपंचनैवेद्यंपुष्पंगंधानुलेपनम् ॥२ ॥ फलार्पणंचश्रद्धांचदानमिंद्रियसंयमम् ॥ सत्या
न्वितंविनिद्रंचमुदामद्यजनान्वितम् ॥३ ॥ साश्चर्यंचैवसोत्साहंपापालस्यादिवर्जनम् ॥प्र
दक्षिणासमायुक्तंनमस्कारपुरःसरम् ॥ ४ ॥ नीराजनसमायुक्तमतिहृष्टेनचेतसा ॥ यामेया
मेमहाभागकुर्यादारार्तिकंमम ॥ ५ ॥ षड्विंशद्गुणसंयुक्तमेकादश्यांचजागरम् ॥ यःकरोति
नरोभक्त्यानपुनर्जायतेभुवि ॥ ६ ॥ यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः ॥ जागरंपरया
भक्त्यासलीनोजायतेमयि ॥ ७ ॥ दृष्टाःकलिभुजंगेनस्वपंतेयेदिनेमम ॥ कुर्वंतिजागरंनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायापाशविमोहिताः ॥ ८ ॥ प्राप्याप्यैकादशीयेषांकलौजागरणंविना ॥ तेविनष्टानसंदेहो
यस्माज्जीवितमध्रुवम् ॥९॥ उद्धृतंनेत्रयुग्मंचदत्त्वावैहृदयेपदम् ॥ कृतंयेनैवपश्यंतिपापिनो
ममजागरम् ॥ १०॥ अभावेवाचकस्याथगीतंनृत्यंचकारयेत् ॥ वाचकेसतिदेवेशपुराणंप्रथ
मंपठेत् ॥ ११ ॥ अश्वमेधसहस्रस्यवाजपेयशतस्यच ॥ पुण्यंकोटिगुणंपुत्रममजागरणेकृते
॥ १२॥ पितृपक्षेमातृपक्षेभार्यापक्षेचमानद ॥ कुलान्युद्धरतेचैतन्ममजागरणेकृते ॥ १३ ॥
उपोषणदिनेविघ्नेप्रारब्धेजागरेसति ॥ विहायस्थानंतत्राहंशापंदत्त्वाव्रजाम्यहम् ॥ १४॥
अविद्धवासरेयेमेप्रकुर्वंतिहिजागरम् ॥ तेषांमध्येप्रहृष्टःसन्नृत्यंवैप्रकरोम्यहम् ॥ १५ ॥ या
वद्दिनानिकुरुतेजागरंममसन्निधौ ॥ युगायुतानितावंतिवसतेममवेश्मनि ॥ १६ ॥ नगया
पिंडदानेननतीर्थैर्बहुभिर्मखैः ॥ पूर्वजामुक्तिमायांतिविनैकादशिजागरात् ॥ १७ ॥ यःकु
र्याज्जागरेपूजांकुसुमैर्ममवासरे ॥ पुष्पेपुष्पेश्वमेधस्यफलमाप्नोतिमानवः ॥ १८ ॥ यःकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यद्दीपदानंचरात्रौजागरणेमम ॥ निमिषेनिमिषेपुत्रलभतेगोयुतंफलम् ॥ १९ ॥ योदद्या
ज्जागरेपुत्रहविष्यान्नसमुद्भवम् ॥ नैवेद्यंलभतेपुण्यंशालिशैलसमुद्भवम् ॥ २० ॥ पक्वान्ना
निचयोदद्यात्फलानिविविधानिच ॥ जागरेमेचतुर्वक्त्रलभतेगोशतंफलम् ॥ २१ ॥ कर्पूरे
णचतांबूलंददातिममजागरे ॥ मद्भक्तोमत्प्रसादेनसप्तद्वीपाधिपोभवेत् ॥ २२ ॥ जागरेम
मदेवेशयःकुर्यात्पुष्पमंडपम् ॥ सपुष्पकविमानेनक्रीडतेममसद्मनि ॥२३॥ मेजागरेतुयोधू
पंसकर्पूरंसगुग्गुलम् ॥ ददातिदहतेपापंजन्मलक्षसमुद्भवम् ॥ २४ ॥ स्नापयेज्जागरेयोमां
दधिक्षीरघृतांबुकैः ॥ भोगानिहलभेत्सोवैअंतेचपरमांगतिम् ॥ २५ ॥ दिव्यांबराणियोद
द्यात्फलानिविविधानिच ॥ सचिरंवसतेस्वर्गेतंतुसंख्यासमानिवै ॥ २६ ॥ दद्यादाभरणं
योमेहेमजंरत्नसंभवम् ॥ सप्तकल्पानिवसतेसोत्संगेमत्प्रियोमम ॥ २७ ॥ घृतेनदीपकं
योमेगन्धेनचाविशेषतः ॥ ज्वालयेज्जागरेरात्रौनिमिषेगोयुतंफलम् ॥ २८ ॥ जागरेमेचतुर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्कर्पूरेणचदीपकम् ॥ योज्वालयेतनीराजंकपिलादानजंफलम् ॥ २९ ॥ यःपुनःकुरुते
दीपंगीतंनृत्यंचपूजनम् ॥ शतक्रतुःसमंपुण्यंव्रतैर्दानशतैरपि ॥ ३० ॥ स्वयंयःकुरुतेगीतंवि
लज्जोनृत्यतेयदि ॥ सलभेन्निमिषार्धेनकोटियज्ञकृतंफलम् ॥ ३१ ॥ निवारयतियोगीतंनृ
त्यंजागरणेमम ॥ षष्टियुगसहस्राणिपच्यतेरौरवादिषु ॥ ३२ ॥ नृत्यमानस्यमर्त्यस्यये
केचिन्निकटेगताः ॥ विमुक्ताधर्मराजेनमुक्तायांतिचमत्पदम् ॥ ३३ ॥ नृत्यमानस्यमर्त्य
स्यउपहासंकरोतियः ॥ जागरेयांतिनिरयंयावदिंद्राश्चतुर्दश ॥ ३४ ॥ जागरेममयःकुर्या
द्भक्त्यापुस्तकवाचनम् ॥ श्लोकसंख्यायुगान्येवसवसेन्ममसान्निधौ ॥ ३५ ॥ प्रदक्षिणाप्र
दानेनयत्फलंकथितंबुधैः ॥ नतत्कोटिमखैःपुण्यंयुगसंख्यैरवाप्यते ॥ ३६ ॥ दीपमाला
ममाग्रेवैयःकुर्याज्जागरेसुत ॥ विमानकोटिसंयुक्तआकल्पंवसतेदिवि ॥ ३७ ॥ ममबाल
चरित्राणिजागरेपठतेहियः ॥ युगकोटिसहस्राणिश्वेतद्वीपेवसेन्नरः ॥ ३८ ॥ तस्माज्जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गरणंकार्यंपक्षयोःशुक्लकृष्णयोः ॥ योगीतांपठतेरात्रौममनामसहस्रकम् ॥ ३९ ॥ वेदो
क्तानांपुराणानांजागरात्पुण्यमाप्नुयात् ॥ धेनुदानंतुयःकुर्याज्जागरंममपुत्रक ॥ ४० ॥
 लभतेनात्रसंदेहःसप्तद्वीपवतीफलम् ॥ सर्वेषामेवपुण्यानांमहत्पुण्यंमहीतले ॥ ४१ ॥
द्वादशीजागरंपुत्रप्रसिद्धंभुवनत्रये ॥ जागरंयेचकुर्वंतिकर्मणामनसागिरा ॥ ४२ ॥ नते
षांपुनरावृत्तिर्ममलोकात्कथंचन ॥ प्रोत्साहयित्वालोकान्यःकुरुतेजागरंनिशि ॥ ४३ ॥
प्राप्नोतिचक्रवर्तित्वंसत्यंमेव्याहृतंसुत ॥ संमानिताःककुत्स्थेनरात्रौजागरकारिणः ॥४४॥
स्वशक्त्याचैवदानेनप्राप्तंराज्यंसुदुर्लभम् ॥ येकेचिन्नायकाविप्रावाद्यकानर्तकाश्चये ॥४५॥
नर्तकीसहितायांतिममलोकेसनातने ॥ दुर्योनिधुगतैःसर्वैःकृत्वाजागरणंमम ॥ ४६ ॥ सं
प्राप्ताःपृथिवीशत्वंकामुकैर्मुनिसत्तम ॥ निष्कामामुक्तिमापन्नाःश्वपचाद्याश्चजागरात् ॥४७॥
विवेकोनास्तिवर्णानांममजागरकारिणाम् ॥ नकलौपावनंध्यानंनकलौजान्हवीजलम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ नकलौपावनंजाप्यंमुक्त्वैकंजागरंमम ॥ द्वादशीदिवसेप्राप्तेयेकुर्वंतिहिजागरम् ॥
॥ ४९ ॥ तेधन्यास्तेकृतार्थावैकलिकालेनसंशयः ॥ नभूयान्मानुषेलोकेद्वादशीविमुखोनरः
॥ ५० ॥ अतीतान्वागतान्वापिपातयेन्नरकेहिसः ॥ वरमेकोगुणैर्युक्तःकिंजातैर्बहुभिःसुतैः
॥ ५१ ॥ द्वादशीजागरात्सर्वांस्तारयेद्योहिपूर्वजान् ॥ माहात्म्यंपठतेभक्त्यामयोक्तंजागरो
द्भवम् ॥ ५२ ॥ द्वादशीसंभवंपुत्रकुलानांतारयेच्छतम् ॥ अगम्यागमनेपापमभक्षस्यापि
भक्षणे ॥ ५३ ॥ पापंविलयमायातिकृतेजागरणेसुत ॥ अज्ञानाद्यत्कृतंपापंज्ञात्वायत्पा
तकंकृतम् ॥ ५४ ॥ पूर्वजन्मार्जितंपापमिहजन्मनियत्कृतम् ॥ सिद्ध्यंतिसर्वकार्याणिमन
साचिंतितान्यपि ॥ ५५ ॥ द्वादश्यांवैचतुर्वक्त्ररात्रौजागरणेकृते ॥ द्वादशीजागरेणैवमुक्तिंग
च्छंतिमानवाः ॥ ५६ ॥ नतत्पुण्यंकुरुक्षेत्रेप्रयागेवसतांकलौ ॥ माहात्म्यंवसतांपुंसांयत्फ
लंद्वादशीषुच ॥ ५७ ॥ नाश्वमेधसहस्रैस्तुतीर्थकोट्यवगाहनात् ॥ तत्फलंप्राप्यतेपुत्रद्वाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीजागरेकृते ॥ ५८ ॥ पठेद्वाशृणुयाद्वापिमहात्म्यंद्वादशीभवम् ॥ सर्वपापविशुद्धात्मा
सलभेच्छाश्वतींगतिम् ॥ ५९ ॥ सर्वेदुष्टाःसमस्ताश्चसौम्यास्तस्यसदाग्रहाः ॥ संततेर्न
वियोगस्तुद्वादशीयस्यकारणम् ॥ ६० ॥ ममकीर्तिरुचिर्नित्यंनाविपद्येतकर्हिचित् ॥ रणे
राजकुलेचैवसर्वदाविजयीभवेत् ॥ ६१ ॥ धर्मोपारिमतिर्नित्यंभक्तिर्मय्यपिसुनिर्मला ॥ पा
तकंनैवलिप्येतद्वादशीभक्तितोनरम् ॥ ६२ ॥ प्रेतत्वंनैवतस्यास्तिकृतेजागरणेमम ॥ एका
दश्याविहीनस्यपरलोकगतिर्नहि ॥ ६३ ॥ तस्मात्सर्वप्रयत्नेनकलौकार्यंहितद्दिनम् ॥
॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येब्रह्मविष्णुसंवादेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥
॥ श्रीभगवानुवाच ॥ ॥ ततःप्रभातेद्वादश्यांकार्योमत्स्योत्सवोबुधैः ॥ मार्गशीर्षेशुक्लपक्षे
यथाविध्युपचारतः ॥ १ ॥ अथमार्गशिरेमासेदशम्यांनियतात्मवान् ॥ कृत्वादेवार्चनंधी
मानाग्निकार्यंयथाविधि ॥ २ ॥ शुचिवासाःप्रसन्नात्माहव्यमन्नंसुसंस्कृतम् ॥ पक्त्वापंचपदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वापुनःशौचंतुपादयोः ॥ ३ ॥ कृत्वाष्टांगुलमानंतुक्षीरवृक्षसमुद्भवम् ॥ भक्षयेद्दंतकाष्ठंतु
ततश्चाचम्ययत्नतः ॥ ४ ॥ दृष्ट्वाकाशानिसर्वाणिध्यात्वावैमांगदाधरम् ॥ शंखचक्रगदापा
णिंकिरीटंपीतवाससम् ॥ ५ ॥ प्रसन्नवदनांभोजंसर्वलक्षणलक्षितम् ॥ ध्यात्वापुनर्जलंह
स्तेगृहीत्वाभानुमध्यगम् ॥ ६ ॥ ध्यात्वार्घ्यंदापयेत्तत्रकरतोयेनमानवः ॥ एवमुच्चारयेद्वा
चंतस्मिन्कालेचतुर्मुख ॥ ७ ॥ एकादश्यांनिराहारःस्थित्वाहानिपरेह्यहम् ॥ भोक्ष्यामिपुं
डरीकाक्षशरणंमेभवाच्युत ॥ ८ ॥ एवमुक्त्वाततोरात्रौममर्तेश्चसान्निधौ ॥ जपेन्नारायणा
येतिस्वयंतत्राविधानतः ॥ ९ ॥ ततःप्रभातेविमलांनदींगत्वासमुद्रगाम् ॥ इतरांवातडागं
वागृहेवानियतात्मवान् ॥ १० ॥ आनीयमृत्तिकांशुद्धांमंत्रेणानेनमानवः ॥ वंदयेद्देवदेवेशं
तदाशुद्धोभवेन्नरः ॥ ११ ॥ धारणंपोषणंत्वत्तोभूतानांदेवसर्वदा ॥ तेनसत्येनमेपापंयाव
न्मोचयसुव्रते ॥ १२ ॥ ब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानिदैवतैः ॥ तेनेमांमृत्तिकांस्पृष्टामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 लभामित्वयोद्धृताम् ॥ १३ ॥ त्वयिनित्यंरसाःसर्वेस्थितावरुणसर्वदा ॥ तेनेमांमृत्तिकां
प्राण्यपूतांकुरुष्वमाचिरम् ॥ १४ ॥ एवंमृदंतथातोयंप्रसाद्यात्मानमालभेत् ॥ त्रिःकृत्वा
 शेषमृदयापिंडमालिप्यवैजले ॥ १५ ॥ तस्मिन्नरःसदासम्यङ्नक्रकच्छपचारतः ॥ स्ना
त्वाचावश्यकंकृत्वापुनर्ममगृहंव्रजेत् ॥ १६ ॥ तत्राराध्यमहायोगिन्देवंनारायणंहरिम् ॥
केशवायनमःपादौकटिंदामोदरायच ॥ १७ ॥ जानुयुग्मंनृसिंहायउरःश्रीवत्सधारिणे ॥
कंठंकौस्तुभनाभायवक्षःश्रीपतयेतथा ॥ १८ ॥ त्रैलोक्यविजयायेतिबाहुंसर्वात्मनोशिरः॥
रथांगधारिणेचक्रंकरायेतिचवारिज ॥ १९ ॥ गंभीरायेतिचगदामंभोजंशांतमूर्तये ॥ एव
मभ्यर्च्यदेवेशंदेवंनारायणंप्रभुम् ॥ २० ॥ पुनस्तस्याग्रतःकुंभांश्चतुरःस्थापयेद्बुधः ॥ ज
लपूर्णान्समाल्यांश्चसितचंदनलेपितान् ॥ २१ ॥ चूतपल्लवसंयुक्तान्सितवस्त्रावगुंठितान्
॥ छादितांस्ताम्रपात्रैश्चतिलपूर्णैःसकांचनैः ॥ २२ ॥ चत्वारस्तुसमुद्राश्चकलशाःसंप्रकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तिताः ॥ तेषांमध्येशुभंपीठंस्थापयेद्व्रत्रगर्भितम् ॥ २३ ॥ तस्मिन्सुवर्णरौप्यंवाताम्रंवादा
रवंतथा ॥ अलाभेसर्वपात्राणांपालाशंपात्रमिष्यते ॥ २४ ॥ तोयपूर्णंचतत्कृत्वातस्मि
न्पात्रेततोन्यसेत् ॥ सौवर्णंमत्स्यरूपंचकृत्वादेवंजनार्दनम् ॥२५॥ देवदेवांगसंयुक्तंश्रुति
स्मृतिविभूषितम् ॥ तत्रानेकविधैर्भक्ष्यैःफलैःपुष्पैश्चशोभितम् ॥ २६ ॥ गंधैर्धूपैश्चवस्त्रैश्च
अर्चयित्वायथाविधि ॥ रसातलगतावेदायथादेवत्वयोद्धृताः ॥ २७ ॥ मत्स्यरूपेणतद्व
न्मांभवाद्उद्धरकेशव ॥ एवमुच्चार्यतस्याग्रेजागरंतत्रकारयेत् ॥ २८ ॥ यथाविभवसारेणप्र
भातेविमलेतथा ॥ चतुर्णांब्राह्मणानांचचतुरोदापयेद्घटान् ॥ २९ ॥ पूर्वंचबह्वृचेदद्याच्छां
दोग्येदक्षिणंतथा ॥ यजुःशाखान्वितेदद्यात्पश्चिमंघटमुत्तमम् ॥ ३० ॥ उत्तरंकामतोद
द्यादेषएवविधिःस्मृतः ॥ ऋग्वेदःप्रीयतांपूर्वेसामवेदस्तुदक्षिणे ॥ ३१ ॥ यजुर्वेदःपश्चि
मतोह्यथर्वश्चोत्तरेणतु ॥ अनेनक्रमयोगेनप्रीयतामितिवाचयेत् ॥ ३२ ॥ मत्स्यरूपंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौवर्णआचार्यायनिवेदयेत् ॥ गंधधूपादिवस्त्रैस्तुसंपूज्यविधिवत्क्रमात् ॥ ३३ ॥ यस्त्विमं
मंसरहस्यंचमंत्रेणैवोपपादयेत् ॥ विधानंविधिवद्दत्वादाताकोटिगुणोत्तरम् ॥ ३४ ॥
प्रतिपद्यगुरुंयस्तुमोहाद्विप्रतिपद्यते ॥ सजन्मकोटिनरकेपच्यतेपुरुषाधमः ॥ ३५ ॥वि
धानस्यप्रदातायोगुरुरित्युच्यतेबुधैः ॥ एवंदत्वाविधानेनद्वादश्यांमांसमर्चयेत् ॥ ३६ ॥
विप्राणांभोजनंदद्याद्यथाशक्त्याचदक्षिणाम् ॥ भूरिणापरमान्नेनततःपश्चात्स्वयंनरः
॥३७॥ भुंजीतसहितोविप्रैर्वाग्यतःसंयतेंद्रियः ॥ अनेनविधिनायस्तुकुर्यान्मत्स्योत्सवंनरः
॥ ३८ ॥ तस्यपुण्यफलंचाग्रेशृणुसत्यवतांवर ॥ यदिवक्त्रसहस्राणांसहस्राणिभवंतिहि
॥ ३९ ॥ आयुश्चब्रह्मणातुल्यंलभेद्यदिमहाव्रत ॥ तदावैह्यस्यधर्मस्यफलंकथयितुंभवेत्
॥ ४० ॥ यइमंश्रावयेद्भक्त्याद्वादशीकल्पमुत्तमम् ॥ शृणोतिवासपापैस्तुसर्वैरेवविमु
च्यते ॥ ४१ ॥ ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुचतुर्मुखसंवादेमत्स्योत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकथनंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ येत्वयावैकृताःप्र
श्नाःपूर्वंप्रश्नविदांवर ॥ तान्वर्णयिष्येक्रमशोनिशामयसुनिश्चितम् ॥१॥ सहोमासेचदेवोवै
कीर्तियुक्तोहिकेशवः ॥ तस्यपूजाप्रकर्तव्यायथापूर्वंप्रभाषितम् ॥ २ ॥ ब्राह्मणंकेशवंस्मृ
त्वातत्पत्नींकीर्तिमेवच ॥ दंपतीविधिवत्पूज्यौवस्त्राभरणधेनुभिः ॥ ३ ॥ दंपतीपूजितौव
त्सपूजितोहंनसंशयः ॥ तस्मादवश्यंसंपूज्यौदंपतीममतुष्टिदौ ॥ ४ ॥ दानंचविविधंकार्यं
ममतुष्टिकरंपरम् ॥ गोदानंभूमिदानंचस्वर्णदानंविशेषतः ॥५॥ वस्त्रदानंतथाशय्यातथा
लंकरणानिच ॥ सन्नदानंप्रकर्तव्यंममसंतोषकारकम् ॥ ६ ॥ सर्वेषामेवदानानांविशेषंच
त्रिकंस्मृतम् ॥ वसुंधरातथाधेनुर्विद्यादानंतथैवच ॥ ७ ॥ दत्तेदानत्रिकेवत्सभवेत्प्रीतिर्म
मातुला ॥ तस्मान्नरैस्तुकर्तव्यंसहोमासेत्रिकंशुभम् ॥ ८ ॥ स्नानस्यचविधिःसम्यक् पुरै
वोक्तोमयानघ ॥ पूजास्नानंचदानंचविधिरेषनसंशयः ॥ ९ ॥ मार्गशीर्षंसमग्रंतुएकभक्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यःक्षिपेत् ॥ भोजयेद्योद्विजान्भक्त्यासमुच्येद्द्वयाधिकिल्बिषैः ॥ १० ॥ कृषिभागीबहुध
नोबहुधान्यश्वजायते ॥ किमत्रबहुनोक्तेनशृणुगुह्यंपरंमम ॥ ११ ॥ हुतभुग्ब्राह्मणश्चैववदनं
 ममानद ॥ ब्राह्मणाख्यंमुखंश्रेष्ठंनतथाहव्यवाहनः ॥ १२ ॥ ब्राह्मणाख्येमुखेपुत्रहुतंको
टिगुणंभवेत् ॥ अग्न्याख्यंब्राह्मणाधीनंस्वतंत्राब्राह्मणाःकिल ॥ १३ ॥ सशर्करंसर्पियुतं
पायसंशशिसन्निभम् ॥ होतव्यंब्राह्मणमुखेममतुष्टिकरंसुत ॥ १४ ॥ शुभमंडलमोदककोकरसंयुतफेनिकयाघृतपूरयुतम् ॥ यजविप्रमुखेममतुष्टिकरंयदिचेच्छसिदारसुतादिसुखम्
॥ १५ ॥ कुमुदेनसमप्रभसौरभदंशुभभक्तयुतंत्वथमुद्गयुतम् ॥ सुरभीकृतपुष्कलसर्पिसमं
कुरुविप्रमुखेहवनंहिसहे ॥ १६ ॥ पयसासहसर्पिषिचक्रथितंबहुखारिकचारफलैःसितया
॥ सहकर्पूरनारिफलेनसमंयुतसीकरकंसुतशुभ्रकरम् ॥ १७ ॥ व्यंजनानिचशुभ्राणिमनोज्ञा
निप्रियाणिच ॥ कर्त्तव्यानिसहोमासेब्राह्मणार्थेचतुर्मुख ॥१८॥ प्रियाशिखरिणीकार्याचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यत्तेषांप्रियंचयत् ॥ कृत्वैवंभोजयेद्विप्रान् श्रद्धयापरयासुत ॥ १९ ॥ रसस्वादनपूर्वैर्हिभुं
जतेवैयथायथा ॥ तथातथाममप्रीतिर्जायतेभुविदुर्लभा ॥ २० ॥ तस्मात्ताततथाका
र्यंयथातुष्यंतिब्राह्मणाः ॥ तुष्टैस्तैश्चाप्यहंतुष्टोभवामीहनसंशयः ॥ २१ ॥ श्रद्धस्व
त्वंचतुर्वक्त्रनतेमिथ्याब्रवीम्यहम् ॥ एतद्गुह्यंमयाप्रोक्तंश्रेयोर्थंतवमानद ॥ २२ ॥ आ
क्रोशयंतियदितेअथवाप्रहरंतिचेत् ॥ तथापितेनमस्यावैममप्रीत्याहिमानद ॥ २३ ॥
एवंकार्यंसदापुत्रमार्गशीर्षेविशेषतः ॥ यदुक्तंभवताब्रह्मन्भोक्तव्यंकिंशृणुष्वतत् ॥ २४ ॥
भोक्तव्यंममचोच्छिष्टंममभक्तिपरायणैः ॥ पवित्रकरणंपुत्रपापिनामपिमुक्तिदम् ॥ २५ ॥
ममाशनस्यशेषंचयोभुनक्तिदिनेदिने ॥ सिक्थेसिक्थेभवेत्पुण्यंचांद्रायणशतोद्भवम् ॥ २६ ॥
अवशिष्टंतथोच्छिष्टंभक्तानांभोजनद्वयम् ॥ नान्यद्वैभोजनंतेषांभुक्त्वाचांद्रायणंचरेत् ॥ २७ ॥
अनर्पयित्वायोभुंक्तेअन्नपानादिकंचयत् ॥ श्वानविष्ठासमंचान्नंपानंचमदिरासमम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मान्मामर्पयेत्पुत्र अन्नपानादिचौषधम् ॥ भक्षयेत्परयाभक्त्याअशुचेःशुचिकारकम् ॥
॥ २९ ॥ तीर्थयज्ञादिकफलंकालिदोषविनाशनम् ॥ ममोच्छिष्टंसुगतिदमपिदुष्कृतकर्मणा
म् ॥ ३० ॥ अन्येषांदेवतानांचनगृण्हीयाच्चभक्षितम् ॥ अभक्तानांचपक्वान्नंभुक्ताचनरकंव्र
जेत् ॥ ३१ ॥ वक्तव्यमेवयत्प्रोक्तंतच्छृणुष्वसमाहितः ॥ कथयिष्येतवप्रीत्याअपिगुह्यत
रंमम ॥३२॥ ममनामप्रवक्तव्यंसहचैवविशेषतः ॥ कृष्णकृष्णेतिवक्तव्यंममप्रीतिकरंप
रम् ॥ ३३ ॥ प्रतिज्ञैषाचमेपुत्रनजानंतिसुरासुराः ॥ मनसाकर्मणावाचायोमेशरणमाग
तः ॥ ३४ ॥ सहिसर्वामवाप्नोतिकामनामिहलौकिकीम् ॥ सर्वोत्कृष्टंचवैकुंठमतिप्रियांकम
लामपि ॥ ३५ ॥ कृष्णकृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः ॥ जलंभित्त्वायथापद्मं
नरकादुद्धराम्यहम् ॥ ३६ ॥ विनोदेनापिदंभेनमौढ्याल्लोभाच्छलादपि ॥ योमांभजति
सोवत्समद्भक्तोनावसीदति ॥ ३७ ॥ येवैपठतिकृष्णेतिमरणेपर्युपस्थिते ॥ यदिपापयु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताःपुत्रनपश्यंतियमंक्वचित् ॥ ३८ ॥ पूर्वेवयसिपापानिकृतान्यपिचकृत्स्नशः ॥ अंतकाले
चकृष्णेतिस्मृत्वामामेत्यसंशयम् ॥ ३९ ॥ नमःकृष्णायमहतेविवशोपिवदेद्यदि ॥ ध्रुवंप
दमवाप्नोतिमरणेपर्युपस्थिते ॥ ४० ॥ श्रीकृष्णेतिकृतोच्चारेप्राणैर्यदिवियुज्यते ॥ दूरस्थः
पश्यतिचतंस्वर्गतंप्रेतनायकः ॥ ४१ ॥ श्मशानेयदिरथ्यायांकृष्णकृष्णेतिजल्पति ॥ म्रि
यतेयदिचेत्पुत्रमामेवैतिनसंशयः ॥ ४२ ॥ दर्शनान्ममभक्तानांमृत्युमाप्नोतियःक्वचित् ॥
विनामत्स्मरणात्पुत्रमुक्तिमेतिसमानवः ॥ ४३ ॥ पापानलस्यदीप्तस्यभयंमाकुरुपुत्रक॥
श्रीकृष्णनाममेघोत्थैःसिच्यतेनीरबिंदुभिः ॥ ४४ ॥ कलिकालभुजंगस्यतीक्ष्णदंष्ट्रस्याकिं
भयम् ॥ श्रीकृष्णनामदारूत्थवन्हिदग्धःसनश्यति ॥४५॥ पापपावकदग्धानांकर्मचेष्टा
वियोगिनाम् ॥ भेषजंनास्तिमर्त्यानांश्रीकृष्णस्मरणंविना ॥ ४६ ॥ प्रयागेवैयथागंगाशु
क्लतीर्थेचनर्मदा ॥ सरस्वतीकुरुक्षेत्रेतद्वच्छ्रीकृष्णकीर्तनम् ॥ ४७ ॥ भवांभोधिनिमग्नानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापापोर्मिपातिनाम् ॥ नगतिर्मानवानांचश्रीकृष्णस्मरणंविना ॥ ४८ ॥ मृत्युका
लेऽपिमर्त्यानांपापिनांतदनिच्छताम् ॥ गच्छतांनास्तिपाथेयंश्रीकृष्णस्मरणंविना ॥
॥ ४९ ॥ तत्रपुत्रगयाकाशीपुष्करंकुरुजांगलम् ॥ प्रत्यहंमंदिरेयस्यकृष्णकृष्णेतिकी
र्तनम् ॥ ५० ॥ जीवितंजन्मसाफल्यंसुखंतस्यैवसार्थकम् ॥ सततंरसनायस्यकृष्णकृष्णे
तिजल्पति ॥ ५१ ॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयम् ॥ बद्धःपरिकरस्तेनमोक्षायगमनंप्र
ति ॥ ५२ ॥ नाम्नोस्ययावतीशक्तिःपापनिर्दहनेमम ॥ तावत्कर्तुंनशक्नोतिपातकंपातकी
जनः ॥ ५३ ॥ नापविद्धंभवेत्तस्यशरीरंनैवमानसम् ॥ नपापंनचवैक्लव्यंकृष्णकृष्णेतिकी
र्तनात् ॥ ५४ ॥ श्रीकृष्णेतिवचःपथ्यंनत्यजेद्यःकलौनरः ॥ पापामयोवैनभवेत्कलौत
स्यैवमानसे ॥ ५५ ॥ श्रीकृष्णेतिप्रजल्पंतंदाक्षिणाशापतिर्नरम् ॥ श्रुत्वामार्जयतेपापंत
स्यजन्मशतार्जितम् ॥ ५६ ॥ चांद्रायणशतैःपापंपराकाणांसहस्रकैः ॥ यन्नापयातितद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिकृष्णकृष्णेतिकीर्तनात् ॥ ५७ ॥ नान्याभिर्नामकोटीभिस्तोषोममभवेत्क्वचित् ॥ श्री
कृष्णेतिकृतोच्चारेप्रीतिरेवाधिकाधिका ॥ ५८ ॥ चंद्रसूर्योपरागैस्तुकोटीभिर्यत्फलंस्मृतं॥
तत्फलंसमवाप्नोतिकृष्णकृष्णेतिकीर्तनात् ॥ ५९ ॥ गुरुदाराभिगमनंहेमस्तेयादिपातक
म् ॥ श्रीकृष्णकीर्तनाद्यातिघर्मतप्तंहिमंयथा ॥ ६० ॥ युक्तोयदिमहापापैरगम्यागमनादि
भिः ॥ मुच्यतेचांतकालेपिसकृच्छ्रीकृष्णकीर्तनात् ॥ ६१ ॥ अविशुद्धमनायस्तुविनाप्या
चारवर्तनात् ॥ प्रेतत्वंसोपिनाप्नोतिअंतेश्रीकृष्णकीर्तनात् ॥ ६२ ॥ मुखेभवतुमाजिह्वास
तीयातुरसातलम् ॥ नसाचेत्कलिकालेयाश्रीकृष्णगुणवादिनी ॥ ६३ ॥ स्ववक्रेपरवक्रेचवं
ध्याजिह्वाप्रयत्नतः ॥ कुरुतेयाकलौपुत्रश्रीकृष्णगुणकीर्तनम् ॥ ६४ ॥ पापवल्लीमुखेतस्य
जिह्वारूपेणकीर्त्यते ॥ यानवक्तिदिवारात्रौश्रीकृष्णगुणकीर्तनम् ॥६५॥ पततांशतखंडा
तुसाजिह्वारोगरूपिणी ॥ श्रीकृष्णकृष्णकृष्णेतिश्रीकृष्णेतिनजल्पति ॥ ६६ ॥ श्रीकृष्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाममाहात्म्यंप्रातरुत्थाययःपठेत् ॥ तस्याहंश्रेयसांदाताभवाम्येवनसंशयः ॥ ६७ ॥
श्रीकृष्णनाममाहात्म्यंत्रिसंध्यंहिपठेत्तुयः ॥ सर्वान्कामानवाप्नोतिसमृतःपरमांगतिम् ॥
॥ ६८ ॥ ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णुचतुर्मुखसंवादेश्रीकृष्णवर्णनं
नामपंचदशोऽध्यायः ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीभगवानुवाच ॥
शृणुध्यानंचतुर्वक्त्रवक्ष्यामिप्रीतमानसः ॥ श्रुतेनैवचसौभाग्यंलभतेमानवोभुवि ॥ १ ॥ अ
थश्रीमदुद्यानसंवीतहैमस्थलोद्भासिरत्नस्फुरन्मंडपांतः ॥ लसत्कल्पवृक्षोदितोद्दीप्तरत्न
स्थलाधिष्ठितांभोजपीठाधिरूढम् ॥ २ ॥ महानीलनीलाभमत्यंतबालंगुडास्निग्धवक्रांत
विस्रस्तकेशम् ॥ अलिव्रातपर्याकुलोत्फुल्लपद्मप्रमुग्धाननंश्रीमदिंदीवराक्षम् ॥ ३ ॥ चल
त्कुंडलोल्लासितोत्फुल्लगल्लंसुघोणंसुशोणाधरंसुस्मितास्यम् ॥ अनेकोल्लसत्कंठभूषालसंतंव
हंतंनखंपौंडरीकंसुनेत्रम् ॥४॥ समुद्भूसरोरःस्थलंधेनुधूल्यासुपुष्टांगमष्टापदाकल्पदीप्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कटीरस्थलेचारुजंघोरुयुग्मेपिनद्धंक्वणत्किंकिणीजालदाम्ना ॥५॥ हसंतंलसद्बंधुजीवप्रसून
प्रभापाणिपादांबुजोदारकांत्या ॥ करेदक्षिणेपायसंवामहस्तेदधानंनवंशुद्धहय्यंगवीनम्
॥६॥महीभारभूतामरारातियूथानलंपूतनादीन्निहंतुंप्रवृत्तम्॥प्रभुंगोपिकागोपवृंदेनवीतंसु
रेंद्रादिभिर्वंदितंदेवदेवम्॥७॥ प्रगेपूजयित्वात्वनुस्मृत्यकृष्णंभुजंगेंद्रवज्रादिभिर्भक्तिनम्रः
॥ सितांभोजहय्यंगवीनैश्चदध्नाविमिश्रेणदुग्धेनसंप्रीणयेत्तम् ॥८॥ इतिप्रातरेवार्चयेदच्यु
तंयोनरःप्रत्यहंशश्वदास्तिक्ययुक्तः ॥लभेत्सोचिरेणैवलक्ष्मींसमग्रामिहप्रेत्यशुद्धंपरंधामभू
यात् ॥९॥ मंत्रश्चोक्तःपुरापुत्रआदौलोकमनोहरः ॥ श्रीमहामोदराख्योहिशृणुतस्याधिका
रिणः ॥ १० ॥ अयोग्यायनदातव्योमंत्रराजस्त्वयासुत ॥ यत्नेनगोपनीयंचरहस्यंशीघ्र
सिद्धिदम् ॥ ११ ॥ अलसंमलिनंक्लिष्टंदंभमोहसमन्वितम् ॥ दरिद्रंरोगिणंक्रुद्धंरागिणंभो
गलालसम् ॥ १२ ॥ असूयामत्सरग्रस्तंशठंपरुषवादिनम् ॥ अन्यायेनार्जितधनंपरदाररं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तंसदा ॥ १३ ॥ विदुषांवैरिणंनित्यमज्ञंपंडितमानिनम् ॥ भ्रष्टव्रतंक्लिष्टवृत्तिंपिशुनंदुष्टमान
सम् ॥१४॥ बह्वाशिनंक्रूरचेष्टमग्रगण्यंदुरात्मनाम् ॥ कृपणंपापिनंरौद्रमाश्रितानांभयंकर
 म् ॥ १५ ॥ एवमादिगुणैर्युक्तंशिष्यंनैवपरिग्रहेत् ॥ गृह्णीयाद्यदितद्दोषःप्रायोगुरुमुपस्पृ
शेत् ॥ १६ ॥ अमात्यदोषोराजानंजायादोषःपतिंयथा ॥ तथाशिष्यकृतोदोषोगुरुंप्राप्नो
त्यसंशयम् ॥ १७ ॥ तस्माच्छिष्यंगुरुर्नित्यंपरीक्ष्यैवपरिग्रहेत् ॥ कायेनमनसावाचागुरु
शुश्रूषणेरतम् ॥ १८ ॥ अस्तेयवृत्तिमास्तिक्ययुक्तंमोक्षकृतोद्यमम् ॥ ब्रह्मचर्यरतंनित्यंदृढ
व्रतमकल्मषम् ॥ १९ ॥ प्रसन्नहृदयंशुद्धमशठंविमलाशयम् ॥ परोपकारनिरतंस्वार्थेचावि
गतस्पृहम् ॥ २० ॥ स्वचित्तवित्तदेहैस्तुपरितोषकरंगुरोः ॥ आश्रितानांतथापुत्रपरितोषक
रंशुचिम् ॥ २१ ॥ ईदृग्विधायशिष्यायमंत्रंदद्यात्तुनान्यथा ॥ यद्यन्यथावदेत्तस्मिन्देवता
शापआपतेत् ॥ २२ ॥ शृणुपुत्रप्रवक्ष्यामिगुरोरपिचलक्षणम् ॥ एभिस्तुलक्षणैर्युक्तोगुरुरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वभवेन्नृणाम् ॥ २३ ॥ ममचेताःप्रशांतात्माविमन्युश्चसुहृन्नृणाम् ॥ साधुर्महान्समोलोके
सगुरुःपरिकीर्तितः ॥२४॥ ममव्रतधरोनित्यंवैष्णवानांसुसंमतः ॥ मदाश्रयकथासक्तोममो
त्सवरतःसदा ॥ २५ ॥ कृपासिंधुःसुपूर्णार्थःसर्वसत्त्वोपकारकः ॥ निःस्पृहःसर्वतःसिद्धः
सर्वविद्याविशारदः ॥ २६ ॥ सर्वसंशयसंछेत्तानलसोगुरुराहृतः ॥ ब्राह्मणःसर्वकालज्ञःकु
र्यात्सर्वेष्वनुग्रहम् ॥ २७ ॥ पूर्वोक्तलक्षणैर्युक्तःशिष्यईदृग्विधोगुरोः ॥ गृण्हीयात्सुव्रतन्मं
त्रंमार्गशीर्षेमदायने ॥ २८ ॥ वैष्णवानांव्रतानांचकुर्यात्स्वीकरणंबुधः ॥ मत्प्रियंशृणु
याच्छश्वच्छ्रीमद्भागवतंपरम् ॥ २९ ॥ श्रीमद्भागवतंनामपुराणंलोकविश्रुतम् ॥ शृणुयाच्छ्र
द्धयायुक्तोममसंतोषकारणम् ॥ ३० ॥ नित्यंभागवतंयस्तुपुराणंपठतेनरः ॥ प्रत्यक्षरंभवे
त्तस्यकापिलादानजंफलम् ॥ ३१ ॥ श्लोकार्धंश्लोकपादंवानित्यंभागवतोद्भवम् ॥ पठतेशृ
णुयाद्यस्तुगोसहस्रफलंलभेत ॥ ३२ ॥ यःपठेत्प्रयतोनित्यंश्लोकंभागवतंसुत ॥ अष्टाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शपुराणानांफलमाप्नोतिमानवः ॥ ३३ ॥ नित्यंममकथायत्रतत्रातिष्ठंतिवैष्णवाः ॥ क
लिबाह्यानरास्तेवैयेर्चयंतिसदामम ॥ ३४ ॥ वैष्णवानांतुशास्त्राणियेर्चयंतिगृहेनराः ॥
सर्वपापविनिर्मुक्ताभवंतिसुरवंदिताः ॥ ३५ ॥ येर्चयंतिगृहेनित्यंशास्त्रंभागवतंकलौ ॥
आस्फोटयांतिवल्गंन्तितेषांप्रीतोभवाम्यहम् ॥३६॥ यावद्दिनानिहेपुत्रशास्त्रंभागवतंगृ
हे ॥ तावत्पिबंतिपितरःक्षीरंसर्पिर्मधूदकम् ॥ ३७॥ यच्छंतिवैष्णवेभक्त्याशास्त्रंभागवतं
हिये ॥ कल्पकोटिसहस्त्राणिममलोकेवसंतिते ॥ ३८ ॥ येर्चयंतिसदागेहेशास्त्रंभागवतंन
राः ॥ प्रीणितास्तैश्चविबुधायावदाभूतसंप्लवम् ॥ ३९ ॥ श्लोकार्धंश्लोकपादंवावरंभागव
तंगृहे ॥ शतशोऽथसहस्त्रैश्चकिमन्यैः शास्त्रसंग्रहैः ॥ ४० ॥ नयस्यातिष्ठतेशास्त्रंगृहेभागवतं
कलौ ॥ नतस्यपुनरावृत्तिर्याम्यपाशात्कदाचन ॥ ४१ ॥ कथंसवैष्णवोज्ञेयःशास्त्रंभागवतं
कलौ ॥ गृहेनातिष्ठतेयस्यश्वपचादधिकोहिसः ॥ ४२ ॥ सर्वस्वेनापिलोकेशकर्तव्यःशास्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संग्रहः ॥ वैष्णवैस्तुसदाभक्त्यातुष्ट्यर्थंममपुत्रक ॥ ४३ ॥ यत्रयत्रभवेत्पुण्यंशास्त्रंभागवतं
कलौ ॥ तत्रतत्रसदैवाहंभवामित्रिदशैःसह ॥ ४४ ॥ तत्रसर्वाणितीर्थानिनदीनदसरांसि
च ॥ यज्ञाःसप्तपुरीनित्यंपुण्याःसर्वेशिलोच्चयाः ॥ ४५ ॥ श्रोतव्यंममशास्त्रंहियशोधर्मज
यार्थिना ॥ पापक्षयार्थंलोकेशमोक्षार्थंधर्मबुद्धिना ॥४६॥ श्रीमद्भागवतंपुण्यमायुरारोग्यपु
ष्टिदम्॥पठनाच्छ्रवणाद्वापिसर्वपापैःप्रमुच्यते ॥४७॥नशृण्वंतिनहृष्यंतिश्रीमद्भागवतंपरम्
॥ सत्यंसत्यंहिलोकेशतेषांस्वामीसदायमः ॥ ४८ ॥ नगच्छतियदामर्त्यःश्रोतुंभागवतंसु
त ॥ एकादश्यांविशेषेणनास्तिपापरतस्ततः ॥ ४९ ॥ श्लोकंभागवतंचापिश्लोकार्धंपाद
मेववा ॥ लिखितंतिष्ठतेयस्यगृहेतस्यवसाम्यहम् ॥ ५० ॥ सर्वाश्रमाभिगमनंसर्वतीर्थाव
गाहनम् ॥ नतथापावनंनृणांश्रीमद्भागवतंयथा ॥ ५१ ॥ यत्रयत्रचतुर्वक्त्रश्रीमद्भागवतंभ
वेत् ॥ गच्छामितत्रतत्राहंगौर्यथासुतवत्सला ॥५२॥ मत्कथावाचकंनित्यंमत्कथाश्रवणेर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ मत्कथाप्रीतमनसंनाहंत्यक्ष्यामितंनरम् ॥ ५३ ॥ श्रीमद्भागवतंपुण्यंदृष्ट्वानोत्तिष्ठते
ह्रियः ॥ सांवत्सरंतस्यपुण्यंविलयंयातिपुत्रक ॥ ५४ ॥ श्रीमद्भागवतंदृष्ट्वाप्रत्युत्थानाभि
वादनैः ॥ सन्मानयेत्तंदृष्ट्वाभवेत्प्रीतिर्ममातुला ॥ ५५ ॥ दृष्ट्वाभागवतंदूरात्प्रक्रमेत्संमुखं
ह्रियः ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयम् ॥ ५६ ॥ उत्थायप्रणमेद्योवैश्रीमद्भागवतं
नरः ॥ धनंपुत्रांस्तथादारान्भक्तिंचप्रददाम्यहम् ॥ ५७ ॥ महाराजोपचारैस्तुश्रीमद्भागव
तंसुत ॥ शृण्वंतियेनराभक्त्यातेषांवश्योभवाम्यहम् ॥५८॥ ममोत्सवेषुसर्वेषुश्रीमद्भागव
तंपरम् ॥ शृण्वंतियेनराभक्त्याममभेदनसुव्रत ॥ ५९ ॥ वस्त्रालंकरणैःपुष्पैर्धूपदीपोपहार
कैः ॥ वशीकृतोहंवत्ससत्स्त्रियःसत्पतिर्यथा ॥ ६० ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहा
त्म्येश्रीविष्णुचतुर्मुखसंवादेषोडशोऽध्यायः ॥ १६ ॥ ब्रह्मोवाच ॥ कस्मिन्नक्षेत्रेहिदेवेश
मार्गशीर्षोऽधिकःस्मृतः ॥ किंफलंचभवेत्तस्मिन्व्रतेतत्सर्वंवदप्रभो ॥ १ ॥ श्रीभगवानुवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मथुरेतिसुविख्यातमस्तिक्षेत्रंपरंमम ॥ सुरम्याचप्रशस्ताचजन्मभूमिःप्रियामम ॥ २ ॥ प
देपदेतीर्थफलंमथुरायांचतुर्मुख ॥ यत्रयत्रनरःस्नातोमुच्यतेघोरकिल्बिषात् ॥ ३ ॥ सर्वध
र्मविहीनानांपुरुषाणांदुरात्मनाम् ॥ नरकार्तिहरापुत्रमथुरापापनाशिनी ॥ ४ ॥ कृतघ्नश्च
सुरापश्चचौरोभग्नव्रतस्तथा ॥ मथुरांप्राप्यमनुजोमुच्यतेघोरपातकात् ॥ ५ ॥ सूर्योदयेत
मोनश्येद्यथावज्रभयान्नगाः ॥ तार्क्ष्यंदृष्ट्वायथासर्पामेघावातहतायथा ॥ ६ ॥ तत्त्वज्ञानाद्य
थादुःखंहरिंदृष्ट्वायथागजाः ॥ तथापापानिनश्यंतिमथुरादर्शनात्सुत ॥ ७ ॥ श्रद्धयाभक्ति
युक्तस्तुदृष्ट्वामधुपुरींनरः ॥ ब्रह्महापिविशुध्येतकिंपुनस्त्वन्यपातकी ॥ ८ ॥ मथुरांस्नातु
कामस्यगच्छतस्तुपदेपदे ॥ निराशानिव्रजंत्येवपापानिचशरीरतः ॥ ९ ॥ अनुषंगेणगच्छं
तिवाणिज्येनापिसेवया ॥ मथुरास्नानमात्रेणपापंत्यक्त्वादिवंव्रजेत् ॥ १० ॥ नामापिगृ
ह्णतामस्याःसदैवत्वंनसंशयः ॥ सदाकृतयुगंतत्रसदाचैवोत्तरायणम् ॥ ११ ॥ यःशृणोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्वक्रमाथुरंममर्मंदिरम् ॥ अन्येनोच्चारितेसद्यःसोपिपापात्प्रमुच्यते ॥ १२ ॥ त्रिरा
त्रमपियेतत्रवसंतिमनुजाःसुत ॥ तेषांपुनंतिसंहृष्टास्पृष्टाश्चरणरेणवः ॥ १३ ॥ यथातृण
समूहंतुज्वालयंतिस्फुलिंगकाः ॥ तथामहांतिपापानिदहतेमथुरापुरी ॥ १४ ॥ स्नानेनस
र्वतीर्थानांयःस्यात्सुकृतसंचयः ॥ ततोधिकतरंप्रोक्तामथुरासर्वमंडले ॥ १५ ॥ चतुर्णाम
पिवेदानांपुण्यमध्ययनाच्चयत् ॥ तत्पुण्यंजायतेतत्रमथुरांस्मरतांनृणाम् ॥ १६ ॥ अ
न्यत्राहिकृतंपापंतीर्थमासाद्यनश्यति ॥ तीर्थेषुयत्कृतंपापंवज्रलेपोभविष्यति ॥ १७ ॥
मथुरायांकृतंपापंमथुरायांप्रणश्यति ॥ धर्मार्थकाममोक्षाख्यंस्थित्वातत्रलभेन्नरः ॥१८॥
अन्यत्रदशभिर्वर्षैःप्रारब्धंभुज्यतेहियत्॥किल्बिषंवचतुर्वक्रमाथुरेदशभिर्दिनैः ॥१९॥दिवि
नैवनपातालेनांतरिक्षेनमानुषे॥समंतुमथुरायांहिप्रियंममसदैवहि ॥२०॥ सर्वेषामेवतीर्था
नांमाथुरंपरमंमहत् ॥ बालक्रीडनरूपाणिकृतानिसहगोपकैः॥२१॥त्रिंशद्वर्षसहस्राणित्रिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दर्षशतानिच॥यत्फलंभारतेवर्षेतत्फलंमथुरांस्मरन् ॥२२॥ सन्निहत्यातुयत्पुण्यंराहुग्रस्ते
दिवाकरे ॥ ततोऽधिकंलभेत्पुत्रमथुरायांदिनेदिने ॥२३॥ पूर्णेवर्षसहस्रेतुतीर्थराजेतुयत्फ
लम् ॥ तत्फलंलभतेपुत्रसहोमासेमधोःपुरे ॥ २४ ॥ पूर्णेवर्षसहस्रेतुवाराणस्यांचयत्फल
म् ॥ तत्फलंलभतेपुत्रमथुरायांसहोदिने ॥२५॥ गोदावरीद्वारकयोर्नरोयःक्षेत्रेकुरूणांक्षि
तिदायकोयः ॥ षण्मासकात्साधयतेगयायांसमंभवेन्नोदिनमकमाथुरम् ॥२६॥ नद्वारका
काशिकांचीनमायागदाधरोयस्यसमंनतीर्थम् ॥ संतर्पितायद्यमुनाजलेनवांच्छंतिनोवैपि
तरःपिंडदानम् ॥२७॥ मथुरायांप्रकुर्वंतिपुरीसाधारणीदृशम् ॥ येनरास्तेपिविज्ञेयाःपाप
राशिभिरन्विताः ॥ २८ ॥नदृष्टामथुरा येनदिदृक्षायस्यजायते ॥ यत्रतत्रमृतस्यापिमाथुरे
जन्मजायते ॥ २९ ॥ भूमेरजांसिगण येत्कालेनापिचतुर्मुख ॥ माथुरेयानितीर्थानितेषांसं
ख्यानविद्यते ॥ ३० ॥ कुरुभोःकुरुभोवासंमथुराख्यांपुरींप्रति ॥ वसामिसततंतस्यांगोप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्याभिरावृतः ॥३१॥ रेरेसंसारमग्नाश्चशिष्यामेशृणुतापरे ॥ यदीच्छथसुखंसांद्रंवासं
कुरुतमत्पुरीम् ॥३२॥ अहोलोकोमहानंधोनेत्रयुक्तोनपश्यति ॥ माथुरेविद्यमानेपिसंसृतिं
भजतेसदा ॥ ३३ ॥ मानुषींयोनिमतुलांलब्ध्वाभाग्यस्ययोगतः ॥ वृथैवायुर्गतंतेषांनदृ
ष्टामथुरापुरी ॥ ३४ ॥ अहोमतेःसुदौर्बल्यमहोभाग्यस्यदुर्विधिः ॥ अहोमोहस्यमहिमा
मथुरानैवसेव्यते ॥ ३५ ॥ मथुरांतुपरित्यज्ययोन्यत्रकुरुतेमतिम् ॥ मूढोभ्रमतिसंसारेमोहि
तोमममायया॥३६॥मथुरामपिसंप्राप्ययोन्यत्रकुरुतेस्पृहाम्॥दुर्बुद्धेस्तस्यकिंज्ञानंसोऽज्ञा
नेनविजृंभितः ॥३७॥मात्रापित्रापरित्यक्तायेत्यक्तानिजबंधुभिः ॥ येषांक्वापिगतिर्नास्ति
तेषांममपुरीगतिः ॥ ३८ ॥ पापराशिभिराक्रांतायेदारिद्र्यपराजिताः ॥ येषांक्वापिगतिर्ना
स्तितेषांममपुरीगतिः ॥ ३९ सारात्सारतरंस्थानंगुह्याद्गुह्यतरंपरम् ॥ गतिमन्वेषमाणानां
मथुरापरमागतिः ॥ ४० ॥ नतत्पुण्यैर्नतद्दानैर्नतपोभिर्नतुस्तवैः ॥ नलभ्यंविविधैर्योगैर्ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यंमदनुभावतः ॥ ४१ ॥ मयियेषांस्थिराभक्तिर्भूयसीयेषुमत्कृपा ॥ तेषामेवहिधन्यानां
मथुरायांभवेद्गतिः ॥ ४२ ॥ यागतिर्योगयुक्तस्यब्रह्मज्ञस्यमनीषिणः ॥ सागतिस्त्यजतः
प्राणान्मथुरायांनरस्यच ॥ ४३ ॥ काश्यादिपुर्योयदिसंतिलोकेतासांतुमध्येमथुरैवधन्या ॥
याजन्ममौंजीव्रतमृत्युदाहैर्नृणांचतुर्धाविदधातिमुक्तिम् ॥ ४४ ॥ नयोगैर्यांगतिर्लभ्यामन्वं
तरशतैरपि ॥ अन्यत्रहेलयासात्रलभ्यतेमत्प्रसादतः ॥ ४५ ॥ नपापेभ्योभयंयत्रनभयंय
त्रवैयमात् ॥ नगर्भवासभीर्यत्रतत्क्षेत्रंकोनसंश्रयेत् ॥४६॥ मथुरायांचयत्पुण्यंतत्पुण्यस्य
फलंशृणु ॥ मथुरायांसमासाद्यमथुरायांमृताहिये ॥ ४७ ॥ अपिकीटपतंगाद्याजायंतेतेच
तुर्भुजाः ॥ कूलात्पतंतियेवृक्षास्तेपियांतिपरांगतिम् ॥ ४८ ॥ मूकाजडांधबधिरास्तपोनि
यमवर्जिताः ॥ कालेनैवमृतायेचममलोकंव्रजंतिते ॥ ४९ ॥ सर्पदष्टाःपशुहताःपावकांबुवि
नाशिताः ॥ लब्धापमृत्यवोयेचमाथुरेममलोकगाः ॥ ५० ॥ सत्यंसत्यंमुनिश्रेष्ठब्रुवेशपथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वकम् ॥ सर्वाभीष्टप्रदंनान्यन्मथुरायाःसमंक्कचित् ॥ ५१ ॥ त्रिवर्गदाकामिनांयामुमुक्षू
णांचमुक्तिदा ॥ भक्तीच्छोर्भक्तिदाकस्तांमथुरांनाश्रयेद्बुधः ॥ ५२ ॥ एतादृशीमधुपुरीकर्त्त
व्यामार्गशीर्षके ॥ तस्याभावेपुष्करंहिकर्तव्यंविधिपूर्वकम् ॥ ५३ ॥ ज्येष्ठंहिब्रह्मणःकुंडंम
ध्यंकुंडंचवैष्णवम् ॥ कनिष्ठंरुद्रदैवत्यमितिजानीहिबुद्धिमन् ॥ ५४ ॥ एषुस्नानंचदानंचश्रा
द्धंचविधिपूर्वकम् ॥ पूजाचमहतीकार्याममप्रीतिकरासुत ॥ ५५ ॥ पूर्णायातुभवेत्पुत्रसहो
मासेममप्रिया ॥ तस्यांयत्क्रियतेपुण्यंममप्रीतिकरंभवेत् ॥ ५६ ॥ गोदानमन्नदानंचहेमदानं
चपुत्रक ॥ धरादानंचकर्तव्यंपूर्णायांविधिपूर्वकम् ॥ ५७ ॥ सहोमासेहिपूर्णायांसन्नदानंच
कारयेत् ॥ यत्किंचित्क्रियतेपूर्णंतदक्षय्यफलंभवेत् ॥ ५८ ॥ ब्रह्मभोज्यंहिकर्तव्यंयथाविभ
वसारतः ॥ पूर्णायामेवकर्तव्यउत्सवोव्रतपूर्त्तये ॥ ५९ ॥ यादृशीमथुरापुत्रसहोमासेममप्रि
या ॥ नतथातीर्थराजाद्यास्तदभावेचपुष्करम् ॥ ६० ॥ पुष्करेमथुरायांवैपूर्णाकार्याविचक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णैः ॥ यत्रकुत्रापिवाकार्याविधियुक्ताचपूर्णिमा ॥ ६१ ॥ स्नानंदानंतथापूजांपूर्णायांनकरो
तियः ॥ षष्टिवर्षसहस्राणिपच्यतेरौरवादिषु ॥ ६२ ॥ तस्मात्सर्वप्रयत्नेनमान्यापूर्णाविच
क्षणैः ॥ मार्गशीर्षेणसंयुक्ताअनंतफलदायिनी ॥ ६३ ॥ यथामेकीर्तितंवत्समार्गशीर्षंममप्रि
यम् ॥ करोतियोनरोभक्त्यातस्यपुण्यफलंशृणु ॥ ६४ ॥ तीर्थायुतेषुयत्पुण्यंयत्पुण्यंव्रतको
टिभिः॥सर्वयज्ञेषुयत्पुण्यंतत्पुण्यंसमवाप्नुयात् ॥६५॥ अपुत्रोलभतेपुत्रंनिर्धनोधनमेवच ॥
विद्यार्थीचतथाविद्यांरूपार्थीरूपमाप्नुयात् ॥६६॥ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोविजयीभ
वेत् ॥ वैश्योनिधिपतित्वंचशूद्रःशुद्ध्येतपातकात् ॥६७॥ यद्दुर्लभंचदुष्प्राप्यंत्रिषुलोकेषुमा
नद ॥ तत्सर्वंप्राप्नुयान्मर्त्यैःसहोमासेनसंशयः ॥ ६८ ॥ यद्यप्येतेषुकामेषुसक्तायेमानवाःसु
त ॥ तुष्टाह्यंतेचतुर्वर्गनकामाहोमहाभुज ॥ ६९ ॥ सुदुर्लभाहिसद्भक्तिर्ममवश्यकरीशुभा ॥
सावैसंप्राप्यतेपुत्रसहोमासेकृतेतथा ॥ ७० ॥ ममप्रीतिकरंमासंसर्वदाममवल्लभम् ॥ सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्राप्यतेऽमुष्मान्मत्प्रसादाच्चतुर्मुख ॥ ७१ ॥ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्री
विष्णुचतुर्मुखसंवादेसप्तदशोऽध्यायः ॥ १७ ॥ इतिमार्गशीर्षमाहात्म्यम् ॥
॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं मोहमय्याख्यनगर्यां भगीरथात्मजहरिप्रसादेन जगदीश्वराख्य
मुद्रणालयेमुद्रापितं एतत्पुस्तकस्यमुद्रणं खेंदुवस्विंदुमिते शके १८१०
मार्गशीर्षशुक्लप्रतिपादि १ समाप्तिमगमत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदिकग्रंथः

नाम.	रु०	डा० म०
१ यजुर्वेदसंहिता	३	।=
२ दशउपनिषद्मूल	३	-।=
३ उपनिषद्भाषाटीका....	४	-॥-
४ मंत्रसंहिता	-॥-	८–
५ रुद्री	-।-	८–
६ दंडक	-।-	८॥
७ पितृसंहिता........	८=	८॥

वेदांत ग्रंथाः

नाम.	रु०	डा० म०
८ वेदस्तुतिसटीक........	१।-	८=
९ वेदस्तुतिसटीक भाषाटीका	-॥=	८–
१० अपरोक्षानुभूति सटीक	-॥-	८–
११ आत्मपुराण सटीक....	१५	१॥
१२ द्वादशमहावाक्यविवरण	-।-	८॥
१३ पंचदशी सटीक........	२॥	-।-
१४ महावाक्यरत्नावली	-।=	८–
१५ अनुभूतिप्रकाश	२।	-।-
१६ श्रीमद्भगवद्गीता रामानुज भाष्य	५	-॥=
१७ शंकरभाष्यश्रीधरीटीका सहित........	५	-॥=
१८ शंकरानंदी गीता	५	-॥-
१९ गीता श्रीधरीटीका....	१।	८≡
२० गीता चिद्घनानंदस्वामीकृत गूढार्थदीपिका मूल अन्वय पदच्छेदसहितभाषाटीका	८	१
२१ गीता मधुसुदनीटीकासहित........	४	-॥-
२२ गीतावडेअक्षरकी गुटका	१	८=
२३ गीता गुटका रंगका....	१	८–॥
२४ पंचरत्न अक्षरमोठा गु०	२	-।-
२५ हठ्योगप्रदीपिका........	२॥	८≡
२६ योगवासिष्ठ संस्कृत....	२५	२।=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम.	रु०	डा० म०
पुराणग्रंथाः		
२७ श्रीमहाभारत सटीक....	४५	५
२८ वाल्मीकिरामायणसटीक	२०	१।।।=
२९ वाल्मीकिरामायण	१२	१।-
३७ श्रीमद्भागवत श्रीधरी	१२	१।।-
३१ श्रीमद्भागवत श्रीधरी	१०	१।।
३२ श्रीभद्भागवत श्रीधरी अक्षरमोटा	१३	२।।।
३३ भागवतसचूर्णिक	८।।	१

नाम.	रु०	डा० म०
३४ भागवतमूल...........	६	-।।।-
३५ भागवत गुटका.......	३।।	-।।-
३६ भागवतविजयध्वजीटी०	१६	२
३७ भागवतचूर्णिका	४	-।।-
३८ अध्यात्मरामायण सटीक................	४	-।=
३९ अध्यात्मरामायण सटीक शिला.........	३	-।≡
४० अध्यात्मरामायणभाषा	४	-।।-

नाम.	रु०	डा० म०
४१ महाशिवपुराण सटीक	१६	२
४२ मार्कंडेयपुराण........	५	-।।-
४३ हरिवंश................	७	१
४४ श्रीकृष्णजन्मखंड....	४	-।।-
४५ गर्गसंहिता नवी शुद्ध छपेली................	४	-।।-
४६ श्रीवाल्मीकिरामायणसुंदरकांड मूल वडाक्षर....	२	-।=
४७ काशीखंडसटीक........	७।।	१

पुस्तकमिलनेका ठिकाना

मुंबई काळकादेवीरोडमें
हरिप्रसाद भगीरथकी दुकान.

कानपूरमें
हनुमानदास व्रजबल्लभकी दुकान.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति मार्गशीर्षमासमाहात्म्य समाप्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu